Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

काशिकराजकीयसंस्कृतमहाविद्यालयमुखपत्रिका

015mN
J0

उपाधिवितरणोत्सवाङ्कः

(पञ्चमवर्षे चतुर्थः)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015mN 8371
J0
Upadhyay, Tribhuvan
Prasad
Saraswati sushma

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पञ्चम

उपाधिवितरणोत्सवाङ्कः

प्रधानसम्पादकः

श्री को० अ० सुब्रह्मण्य अय्यरः

सहायकसम्पादकः

श्रीजगन्नाथ उपाध्यायः

LIBRARY

सम्पादकमण्डलम्

श्रीव्रजवल्लभद्विवेदः श्रीराजारामभट्टभट्टः

श्रीरघुनाथपाण्डेयः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

015m N
JO

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDAL
LIBRARY
Jangamwadi Math, Varanasi
ACC No. 8371

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तमसो मा ज्योतिर्गमय

卐

यो वै भूमा तत् सुखम् ।
नाल्पे सुखमस्ति । भूमैव सुखम् ।
यो वै भूमा तद् अमृतम् ।
अथ यद् अल्पं तन् मर्त्यम् ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काशिक-राजकीय-संस्कृत-महाविद्यालय-पत्रिका

आवश्यकी सूचना

(१) पत्रिकेयं प्रतिवर्षं वारचतुष्टयं सरस्वतीभवनात् प्रकाशयिष्यते।

(२) अस्याः खलु सरस्वतीभवनस्थैर्विद्वद्भिर्विद्यालयीयाध्यापकैरन्यैश्च स्वोपज्ञविचारविचारकै र्निबद्धानामनुसन्धानमूलकानामन्येषाञ्चोपयोगिनां निबन्धानां प्रकाशनेन संस्कृतज्ञेषु मौलिकानुसन्धानप्रवृत्तेः सम्यगालोचनाप्रवृत्तेश्चोत्पादनं प्रोत्साहनं चैव मुख्यमुद्देश्यम्।

(३) उपरिनिर्दिष्टगुणविशिष्टानामेव लेखानामस्यां प्रकाशनविषये—

प्रिन्सिपल,
गवर्नमेण्ट-संस्कृत-कालेज,
बनारस।

इति सङ्केतेन पत्रव्यवहारो विधेयः।

(४) पत्रिकाया ग्राहकत्वमभिलषद्भिः,

सुपरिण्टेडेण्ट,
प्रिण्टिङ्ग एण्ड स्टेशनरी,
उत्तर प्रदेश, इलाहाबाद।

इति सङ्केतेनैव पत्रव्यवहारो विधेयः।

समुत्कृष्टसंस्कृतवाङ्मयस्य प्रकाशनम्

सरस्वतीभवनग्रन्थमाला

प्रधानसम्पादकः

प्रिन्सिपल, गवर्नमेण्ट-संस्कृत-कालेज, बनारस।

वेद-दर्शन-साहित्य-ज्यौतिष-तन्त्र-धर्मशास्त्रादिविषयकान् अद्य-यावदमुद्रितान् प्राचीनानुत्कृष्टग्रन्थान् विवेचनापुरःसरं तत्तच्छास्त्रनिष्णातैर्विद्वद्भिः सम्पाद्य प्रकाशयन्ती ग्रन्थमालेयं १९२० तमखिस्तवत्सरात्प्रभृति संयुक्तप्रान्तीयशासकानामाज्ञया प्रचलति। अस्यां चाद्य यावत् प्रायेणाशीतिसंख्यापर्यन्तं ग्रन्थाः प्रकाशिताः। तस्याः सूची संयुक्तप्रान्तीयगजटपत्रे प्रायेण प्रकाश्यते, अस्मिन्नङ्केऽपि यथास्थानं प्रकाशिता विद्यते। ग्रन्थमालायाः प्राप्तिस्थानम्—

सुपरिण्टेण्डेण्ट,
प्रिण्टिङ्ग एण्ड स्टेशनरी
उत्तर प्रदेश, इलाहाबाद।

JAGADGURU VISHWARADHYA
SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. ....

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयसूची

स्तम्भाः	विषयाः	लेखकाः	पृष्ठसङ्ख्याः
	श्रुति-निकणः		१
	सूक्ति-मुक्तावली		२
	भारतभूप्रशस्तिः (कविता)	—श्रीताराचरणभट्टाचार्यः साहित्याचार्यः गोयनका संस्कृत विद्यालय, काशी।	३
	शास्त्रमयो भारती (कविता)	—श्रीबटुकनाथशास्त्री खिस्ते, साहित्याचार्यः राजकीय संस्कृत महाविद्यालय, काशी।	४
शास्त्रनिबन्धः—			
	बौद्धदर्शने कर्मवादः	—भदन्तशान्तिभिक्षुः पालिसाहित्याध्यापक, शान्तिनिकेतन।	५–१८
	श्रौतस्मार्तपौराणदेवताविमर्शः	—श्रीभगवत्प्रसादमिश्रः वेदाचार्यः रा. सं० महा० काशी।	१९–२१
	मोक्षनिरूपणम्	—श्रीवीरमणिप्रसादोपाध्यायः एम. ए., बी. एल्., डी. लिट्., साहित्याचार्य इत्याद्युपाधिग्रस्तः, हि.वि.वि. काशी।	२२–२८
	बौद्धदर्शनम्	—आचार्यनरेन्द्रदेवः कुलपति- लखनऊ विश्वविद्यालय। अनुवादकः—श्रीभूपनारायण झा व्याकरणाचार्यः, रा. सं. म. काशी।	२९–३५
विज्ञाननिबन्धः—			
	अयनचलनम्	—श्रीकृष्णमिश्रः ज्यौतिषाचार्यः भू.पू. प्राध्यापकः–कलकत्ताविश्ववि.।	३६–५३
	वेधः	—श्रीबलदेवमिश्रः, ज्यौतिषाचार्यः सरस्वतीभवनम्, काशी।	५४–५६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

स्तम्भाः	विषयाः	लेखकाः	पृष्ठसङ्ख्याः
शब्दविज्ञानम्—			
	प्राचीनभारते भाषाविज्ञानम्	—श्री को. अ. सुब्रह्मण्य अय्यरः अध्यक्ष–राजकीयसंस्कृत-महाविद्यालय, काशी।	५७–६८
	वागव्यवहारः	—श्रीचारुदेव शास्त्री एम. ए., ओ. एल. (अम्बाला)	६९–८२
राजनीतिः—			
	भारतीयप्राचीनशासनपद्धतिः	—श्रीरघुनाथशर्मा व्याकरणाचार्यः रा. सं० म० काशी।	८३–९३
	भारतीयमर्थशास्त्रम्	—श्रीकेदारनाथशर्मा सारस्वतः सम्पादकः–सुप्रभातम्, काशी।	९४–१०९
संस्कृतिः कला च—			
	श्रमणसंस्कृतिः सौन्दर्यञ्च	—मुनिः कान्तिसागरः अनुवादकः–श्रीबटुकनाथशास्त्री खिस्ते	११०–११९
	काव्यप्रेरणा	—श्रीबलदेवोपाध्यायः साहित्याचार्यः हिन्दुविश्वविद्यालय, काशी। अनुवादकः–श्रीअनन्तशास्त्री फड़के	१२०–१२९
समालोचनम्—			
	काशिका-तद्रचयितारौ जयादित्यवामनौ च	—श्रीविश्वनाथशास्त्री भारद्वाजः एम. ए., काव्यतीर्थः हिन्दुविश्वविद्यालय, काशी।	१३०–१३७
	शाकुन्तलीयम्	—श्रीमुकुन्दशास्त्री खिस्ते साहित्याचार्यः रा० सं० म० काशी।	१३८–१४४
	प्रजापतिवधः	—श्रीअनन्तशास्त्री फड़के व्याकरणाचार्यः रा० सं० म० काशी।	१४५–१५५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारस्वती सुषमा

स्तम्भाः	विषयाः	लेखकाः	पृष्ठसङ्ख्याः
	भगवतो बुद्धस्य श्रुतिधर्माद्यविरोधः	—श्रीविभूतिभूषणभट्टाचार्यः न्यायाचार्यः उपाध्यक्ष–सरस्वती भवन, काशी ।	१५६–१६१
अनुसन्धानमन्दिरम्—			
	महीधरसङ्ग्रहः	—श्रीव्रजवल्लभद्विवेदः दर्शनाचार्यः सरस्वती भवन, काशी ।	१६२–१७४
सम्पादकीयम्—			
	सुस्वागतम्		१७४
	श्रद्धाञ्जलिः		१७४
	सुषमाया भाविस्वरूपम्		१७५–१७६
विविधम्—			
	अस्माकमीक्षणम्	—रघुनाथपाण्डेयः सरस्वती भवन, काशी ।	१७७–१८१
	संस्कृतसमाचाराः		१८२–१८३
	सुषमायामद्यावधिप्रकाशितलेखसूची		१८४–१९३
	सरस्वतीभवनग्रन्थमाला सूची		१–१०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi



भट्टश्रीगोविन्दविरचितं श्रुतिविकासनामकमश्रुतपूर्वमृग्वेदभाष्यम् ।
परिचयश्चतुर्थवर्षतृतीयेऽङ्के 'भट्टगोविन्दस्य श्रुतिविकासः' लेखे द्रष्टव्यः ।

[लिपिकालः—१३६७ वि०]

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS
CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



काशिकराजकीयसंस्कृतमहाविद्यालयपत्रिका

पौषः] विशिष्टाङ्कः [सं. २००७

श्रुति-निक्वणः

सरस्वति देवनिदो नि बर्हय
प्रजां विश्वस्य बृसयस्य मायिनः ।
उत क्षितिभ्योऽवनीरविन्दो
विषमेभ्यो अस्रवो वाजिनीवति ॥

[ऋग्वेदः ६।६१।३]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूक्ति-मुक्तावली

अस्ति यद्यपि सर्वत्र नीरं नीरजमण्डितम् ।
रमते न मरालस्य मानसं मानसं विना ॥

कामं वनेषु हरिणास्तृणेन जीवन्त्ययत्नसुलभेन ।
विदधति धनिषु न दैन्यं ते किल पशवो वयं सुधियः ॥

अनुकूले विधौ देयं यतः पूरयिता हि सः ।
प्रतिकूले विधौ देयं यतः सर्वं हरिष्यति ॥

कीर्तिः परेषां कुलनायिकेव
गेहात् खलास्यान्न बहिः प्रयाति ।
अकीर्तिरेतद्रसनाग्रवंशे
तनोति शैलूषसुतेव नृत्यम् ॥

किं जन्मना मलयभूधरगन्धसार
किं वा महाजनललाटसमाश्रयेण ।
सौरभ्यमर्जय वशीभवतीह येन
काकोदरोऽपि जठराहितकालकूटः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



महामान्याः श्रीमोदीमहोदया
उत्तरप्रदेशीयराज्यपालाः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भारतभूप्रशस्तिः

जय भारतभूमि भासि विश्वभुवनवन्दिता
मुहुरमराः सन्ति सुमुखि तव वैभवविस्मिताः।
हिमगिरिवरहीरकमयमुकुटस्तव भासते
सुरसरिदियमुरसि विमलहारस्तव राजते ॥ १ ॥

चुम्बति तव चरणाम्बुजमम्बुधिरपि दण्डवत्
कम्बुबहुलमौक्तिकदलमणिकदम्बमाददत्।
प्रणमति तव पादपद्ममम्बरतलचुम्बिभिः
शतसहस्रमूर्द्धभिरिव तुङ्गोज्ज्वलवीचिभिः ॥ २ ॥

करधृतनवपल्लवदलचामर इव किङ्करः
मलयशिखरिमरुदभिमुखमर्चति हिमशीकरः।
चन्दनरसबिन्दुभिरिव किरणैस्तव चन्द्रमाः
स्नपयति वपुरवनीश्वरि परिचरति च ते रमा ॥ ३ ॥

अमृतकुम्भधन्वन्तरिधन्यधवलवाजिभिः
सहगजेन्द्रमन्दारकनन्दनवनराजिभिः।
मन्दरगिरिगुरुमन्थनदुग्धसिन्धुमन्दिरा-
दुदगमदियमलसगतिभिरुद्यदिन्दुरिन्दिरा ॥ ४ ॥

साहित्याचार्यः श्रीताराचरणभट्टाचार्यः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शास्त्रमयी भारती

विद्यासारैरागमसङ्घैः कृतमौलिः
ज्योतिर्विद्याकल्पितनेत्राम्बुजकेलिः ।
वक्त्राम्भोजं व्याकरणाख्यं कलयन्ती
वाचां देवी शास्त्रमयी शर्म तनोतु ॥ १ ॥

छन्दोभेदैः कन्दलितोक्तिर्धृतशिक्षा-
ग्रीवारूपा कल्पितकल्पश्रुतियुग्मा ।
हृद्देशं या साम दधाति स्फटिकाभा
सा नो देवी शास्त्रमयी शर्म तनोतु ॥ २ ॥

ऋग्भिः साकं याजुषभागं स्तनयुग्मं
ज्ञानक्षीराऽऽपीनसमृद्धञ्च वहन्ती ।
मध्याथर्वा वन्दितपादा तनुमध्या
मेधामम्बा शास्त्रमयी नः प्रददातु ॥ ३ ॥

पार्श्वद्वन्द्वव्याजविकास्युज्ज्वलसाङ्ख्य-
श्रीमद्योगा कर्मविधिख्यापितपाणिः ।
तर्कोत्कर्षैरात्तजघन्याङ्कलक्ष्मी-
र्वाचां देवी शास्त्रमयी नः शुभदास्तु ॥ ४ ॥

पृष्ठस्थानस्थायुकशोभैरुपवेदैः
पौराणाख्यैः कौतुकवीक्षाचरितैश्च ।
नव्यैः काव्यैर्हासविलासं कलयद्भिः
क्लृप्ताङ्गी सा शास्त्रमयी नः सुखदास्तु ॥ ५ ॥

त्राह्मीं विद्यामाशयरूपेण दधाना
बौद्धैर्जैनैः शास्त्रविभेदैर्बहुभिश्च ।
रोम्णां कोटीश्चारुनखालीस्तनुते या
सा नो भव्यं शास्त्रमयी वाग् विदधातु ॥ ६ ॥

श्रीबटुकनाथशास्त्री खिस्ते

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

माननीयाः श्रीसम्पूर्णानन्दमहोदयाः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बौद्धदर्शने कर्मवादः ।

भदन्त शान्तिभिक्षुः ।

बौद्धधर्मे कर्मकाण्डस्य प्रायशोऽभावात्स शमथविपश्यनाबलमाश्रित एव लोकावर्जकः संवृत्तः । प्राणा इव शरीरे कर्मवादस्तद्दर्शने व्याप्तो वर्तते । मानवमनोजातानां विविधानां कौतूहलानां समाधानं तत्र द्वयक्षरात्मकेन कर्मपदेनैव क्रियते । तदेतत्स्पष्टमाख्यातुं मानवमनसि जातानां प्रधानभूतानां जिज्ञासानां तदुत्तराणां चैष मातृकोद्देशः—

(१) लोकवैचित्र्यस्य किं मूलम् ? सरागं संग्रहमूलकं च कर्म ।

(२) किमुपादाय मानवानां हीनप्रणीतभेदाः ? कुशलाकुशलकर्माण्युपादाय ।

(३) अवश्यंभावी किं सुचरितदुश्चरितयोर्विपाकः ? आम्, अवश्यंभावी ।

(४) सर्वः सुखदुःखविपाकः किंमूलकः ? दृष्टादृष्टकर्ममूलकः ।

(५) केन बन्धः ? सास्रवकर्मणा बन्धः ।

(६) कस्मान्मोक्षः ? आस्रवप्रहाणरूपात्कर्मणो मोक्षः ।

(७) किमपि ध्रुवतत्त्वमाश्रित्य किं कर्मजवैचित्र्याणि ? न, अध्रुवमेवेदं यदिदं सदिति ।

इमा जिज्ञासा एव सर्वेषु संप्रदायेषु मननहेतुकदर्शनानां प्रवर्तिकाः । बाढमेतासां समाधानानि नैकरूपाणि । बौद्धागमे यथैता जिज्ञासाः समाहितास्तथेह स्थाने स्थाने आनुश्रविकमताद् भेदनिदर्शनपुरःसरं निरूप्यन्ते ।

(१) श्रुतिप्रवर्तका ऋषयो जगतश्चरममूलं गवेषयन्तः किमपि परमं तत्त्वं विचिन्त्य वर्णयांबभूवुः—"न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः । तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति ॥" [कठ ५।१२] महाश्रमणगौतमोऽपि श्रमेण महता जगदादिमूलं विचिन्वन् नोपलभ्य तादृशं ज्ञानातीतं तत्त्वं परामेव दिशं संकेतयामास । ५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्ति दीर्घागमस्य अग्रण्यसूत्रान्ते जगदादिमूलमधिकृत्य कश्चित्पुराकल्पात्मकश्चर्चः । संवर्तमनु-विवर्तः, विवर्तमनु च संवर्तः पर्यायेण प्रवर्तते । संवर्तावस्थावर्णनपरा तत्रेयं पालिः—"एकोदकीभूतं खो तेन समयेन होति अन्धकारो अन्धकारतिमिस्सा । न चन्दिमसुरिया पञ्ञायन्ति, न रत्तिं दिवा, न मासद्धमासा, न उतुसंवच्छरा, न इत्थिपुमा, सत्ता सत्तात्वेव संख्यं गच्छन्ति ।" एतादृशीं संवर्तावस्थामनु विवर्तो भवति । प्रथमे विवर्तक्रमेऽव्यक्तभेदो लोकः प्रवर्तते । तत्र सत्त्वाः किंलक्षणा भवन्तीत्येषा पालिः—"ते च होन्ति मनोमया, पीतिभक्खा, सयंपभा, अन्तलिक्खचरा, सुभट्ठायिनो, चिरं दीघं अद्धानं तिट्ठन्तीति" । पुराकल्पलक्षणायामस्यां संवर्तविवर्तचिन्तायां विनिगूढोऽयमर्थस्तिष्ठति यत् संवृत्तमनु प्रवृत्तः प्रथमो विवर्तः सर्वथा प्रहीण-दोषो भवति । अग्रत्वेऽविज्ञानसाक्षिकोऽयं विश्वासः पुरातनानां विवर्तक्रमं ह्रासमुखेन जायमानं शंसति यत्र क्रमेण दोषाणामेव बहुलीभावः । एषोऽत्र समासेन अग्रण्यसूत्रान्तोद्दिष्टो विवर्तक्रमः—"तेषां सत्त्वानां कृते रसा प्रादुरभूत्, तद्यथा नाम क्षौद्रं मधु, एवमास्वादाभूत् । अथ खल्वन्यतरः सत्त्वः रसामाशीत् । तृष्णा चास्यावक्रमीत् । अन्यतरेऽपि सत्त्वास्तस्य दृष्टानुगतिमापद्यमाना रसामाशिषुस्तृष्णा तेषामक्रमीत् । अथ तेषां स्वयंप्रभान्तरधात् । स्वयंप्रभायामन्तर्हितायां सूर्याचन्द्र-मसौ प्रादुरास्ताम् । सूर्याचन्द्रमसोः प्रादुर्भूतयोः नक्षत्राणि तारकारूपाणि प्रादुरासुः । नक्षत्रेषु तारका-रूपेषु प्रादुर्भूतेषु रात्रिंदिवौ प्रज्ञायिषाताम् । रात्रिंदिवोः प्रज्ञायमानयोः मासार्द्धमासाः प्रज्ञायिषत । मा-सार्धमासेषु प्रज्ञायमानेषु ऋतुसंवत्सराः प्रज्ञायिषत । एतावताऽयं लोको पुनर्विवृत्तो भवति । यथा यथा सत्त्वा रसां परिभुञ्जन्तोऽतिष्ठन् तथा तथा तेषां काये वर्णविवर्णते प्रज्ञायिषाताम् । तत्र ये सत्त्वा वर्णवन्तस्ते दुर्वर्णान् सत्त्वानतिमन्यन्ते स्म 'वयमेतेभ्यो वर्णवत्तरा अस्मभ्यमेते दुर्वर्णतराः ।' तेषां वर्णातिमानप्रत्ययाद्रसान्तरधात् । रसायामन्तर्हितायां भूमिपर्पटकः प्रादुरभूद्रससंपन्नः । अथ सत्त्वा भूमिपर्पटकमुपाक्रमिषुः परिभोक्तुं यथा यथा तथा तथा तेषां सत्त्वानां काये भूयस्यां मात्रायां वर्णविवर्णते प्रज्ञायिषाताम् । तत्र ये सत्त्वा वर्णवन्तस्ते दुर्वर्णान् सत्त्वानतिमन्यन्ते स्म । तेषां वर्णातिमानप्रत्ययाद् भूमिपर्पटकोऽन्तरधात् । भूमिपर्पटकेऽन्तर्हिते भद्रालता प्रादुरभूद्र-ससंपन्ना । अथ ते सत्त्वा भद्रालतामुपाक्रमिषुः परिभोक्तुं यथा यथा तथा तथा तेषां सत्त्वानां काये भूयस्यां मात्रायां वर्णविवर्णते प्रज्ञायिषाताम् । तत्र ये सत्त्वा वर्णवन्तस्ते दुर्वर्णान्सत्त्वानति-मन्यन्ते स्म । तेषां वर्णातिमानप्रत्ययाद्भद्रालतान्तरधात् । भद्रालतायामन्तर्हितायामकृष्टपच्यः
६ शालिः प्रादुरभूदकणोऽतुषः सुगन्धस्तण्डुलफलः । यत्तत्सायं सायमाशायाहरन्ति प्रातस्तद्भवति पक्वं प्रतिविरूढम् । यत्तत्प्रातः प्रातराशायाहरन्ति सायं तद्भवति पक्वं प्रतिविरूढम् । नापदानं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(=लवनं) प्रज्ञायते स्म। अथ ते सत्त्वा अकृष्टपच्यं शालिं परिभुञ्जन्तोऽभूवन् यथा यथा तथा तथा तेषां सत्त्वानां काये भूयस्यां मात्रायां न केवलं वर्णविवर्णते प्रज्ञायिषातां प्रत्युत स्त्रीणां स्त्रीलिङ्गं प्रादुरभूत्पुरुषाणां च पुरुषलिङ्गम्। स्त्री चातिवेलं पुरुषमुपनिध्यायति पुरुषश्च स्त्रियम्। तयोश्चातिवेलमुपनिध्यायतोरन्योन्यं रागः समुदपद्यत, परिदाहः कायेऽवाक्रमीत्। तौ परिदाहप्रत्ययान्मैथुनं धर्ममसेविषाताम्। अधर्मसम्मतं पुनस्तेन समयेन भवति तदेतर्हि धर्मसंमतम्। अथागाराण्युपाक्रमिषुः, तस्यैवासद्धर्मस्य प्रच्छादनार्थम्। अथ खल्वन्यतरस्य सत्त्वस्यालसजातिकस्यैतदभूत्। किमेवं विहन्मि स्वात्मानं शालिमाहरन्सायं सायमाशाय प्रातः प्रातराशाय। सोऽहार्षीत् शालिं सकृदेव सायंप्रातराशाय। अथान्यतरः सत्त्वस्तस्य दृष्टानुगतिमापद्यमानः शालिमहार्षीत्सकृदेव द्व्यहाय 'एवमपि किल भोः साध्विति'। अथान्यतरः सत्त्वस्तस्य दृष्टानुगतिमापद्यमानः शालिमहार्षीत् चतुरहाय। अन्यतरस्तस्य दृष्टानुगतिमापद्यमानः शालिमहार्षीदष्टाहाय। अथ कणोऽपि तण्डुलं तुषोऽपि तण्डुलं पर्यवनद्ध। लूनमप्यविरूढं तेनापदानं प्रज्ञायते स्म। खण्डखण्डाः शालयोऽतिष्ठन्। अथ सत्त्वाः संनिपत्य शालिं व्यबीभजन् मर्यादामतिष्ठिपन्। अथान्यतरः सत्त्वो लोलजातिकः स्वकं भागं परिरक्षन् अन्यतरं भागमदत्तमादाय पर्यभुक्त। तमेनं गृहीत्वा परे सत्त्वा एतदवोचन्—'पापकं करोषि मा स्म भो पुनरप्येवं कार्षीः।' 'एवं भो इति स तेषां प्रत्यश्रौषीत्'। द्वितीयमपि स तृतीयमपि सोऽदत्तमादाय पर्यभुक्त। तमेनं गृहीत्वा परे सत्त्वाः केचित्पाणिना प्राहार्षुरन्ये लोष्टेनान्ये दण्डेन। तदग्रे खलु वतादत्तादानं प्रज्ञायते स्म, गर्हा, मृषावादः, दण्डदानम्। अथ सत्त्वाः संनिपत्य यस्तेषां सत्त्वोऽभिरूपतरो दर्शनीयतरः प्रासादिकतरो महेशाख्यतरश्च तमुपसंक्रम्यैतदवोचन्। एहि खलु सत्त्व सम्यक् ख्यातव्यं ख्यापय सम्यग् गर्हयितव्यं गर्हय, सम्यक् प्रव्राजयितव्यं प्रव्राजय। वयं पुनस्ते शालीनां भागमनु प्रदास्याम इति। क्षेत्राणां पतिरिति खलु क्षत्रियः, धर्मेण रञ्जयतीति खलु राजा। इति खल्वेवमेतस्य क्षत्रियमण्डलस्याभिनिर्वृत्तिरभूत्। तेषामेव खलु सत्त्वानामेकेषामेतदभूद् वयं पापकानकुशलान् धर्मान् वाहयेमेति ते ब्राह्मणा अभूवन्। तेऽरण्यायतने ध्यायन्तीति ध्यायकाः। तेषामेवैके ध्यानमनभिसंभावमाना ग्रामान्तं निगमान्तमवसृत्य ग्रन्थान्कुर्वन्त आसुः। नेदानीमिमे ध्यायन्तीत्यध्यायका इत्याख्याताः। हीनसंमतं खलु तेन समयेन तदेतर्हि श्रेष्ठसंमतम्। इति खल्वेवमेतस्य ब्राह्मणमण्डलस्याभिनिर्वृत्तिः। [एतादृशमेवाह यास्कः "साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्रादुः। उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च।" (निरुक्त

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१।२०) उभयत्र ग्रन्थरचनातः पूर्वं साक्षात्कृतधर्माणः पर्यायेण कथ्यते चेद् ध्यायका ब्राह्मणा निर्दिष्टा इति द्वयोरेकवाक्यता स्पष्टैवेति ।] तेषामेव सत्त्वानामेके मैथुनं धर्मं समादाय विश्रुत-कर्मान्तान् प्रायोयुजन्निति वैश्या इति वैश्यमंडलस्याभिनिर्वृत्तिः। अवशेषा क्षुद्राचारा इति शूद्रा इति शूद्रमण्डलस्याभिनिर्वृत्तिः। अभूत्स समयो यत् क्षत्रियः स्वकं धर्मं गर्हयन् अगारादनागार्यं प्रव्रजति श्रमणो भविष्यामीति। ब्राह्मणोऽपि प्रव्रजति, वैश्योऽपि प्रव्रजति, शूद्रोऽपि प्रव्रजति। एभ्यश्चतुर्भ्यो मण्डलेभ्यः श्रमणमण्डलस्याभिनिर्वृत्तिः। चतुर्णां मण्डलानां यो भवति भिक्षुः क्षीणास्रवः सम्यग्ज्ञानविमुक्तः स तेषामग्रमाख्यायते धर्मेणैव नाधर्मेण। ब्रह्मणाप्येषा सनत्कुमारेण गाथा भाषिता—

खत्तियो सेट्ठो जने तस्मिं ये गोत्तपटिसारिनो।
विज्जाचरणसंपन्नो सो सेट्ठो देवमानुसे ॥ इति।

अहमप्येवं वदामीति तथागतवचनपालिः संवर्त्तविवर्तविषयिण्यनूदिता।

एतेन पूर्वं सत्त्वा उत्कृष्टा बभूवुः। परस्ताद् रसरागेण वर्णभेदः, तेन रूपाभिमानः, तेन कामासङ्गः, तेन गृहभेदः, तेन सम्पत्तिभेदः, तद्विषयकं लोभमुपादायादत्तादानम्, तेन निन्दा-मृषावाद-दण्डोपक्रमाः, ततो निग्रहानुग्रहाधिपतिः समाजप्रमुखो राजा, ततः कर्मभेद-मूलिका वर्णव्यवस्था बभूव। सर्वमेतन्मनोदोषमूलकमेव प्रायशो विवर्तनम्। पौराणिका अपि एतादृशमेव विवर्तनं प्रतिपादयन्ति। पूर्वं कृतयुगे धर्मश्चतुष्पादन्यूनाविकलाङ्गो बभूव। त्रेतायुगे पादेनोनः स पङ्गुर्जातः। द्वापरयुगे द्वाभ्यां पद्भ्यां प्रहीणोऽसौ कष्टां दशामुपगतः। कलियुगे स एकपात्कण्ठगतप्राणो भवति। दोषमुखेन जायमानाद्विवर्तनात् केनापि जगतः पुण्येन श्रामण्यं विकसितम्। श्रामण्यस्य सर्वथैव वीतरागधर्मस्य प्रादुर्भावात् पूर्वतनो विवर्तः सरागाणि संग्रहमूलकानि कर्माण्युपादायैव भवतीत्यग्रण्यसूत्रान्तवचनैः स्पष्टीभवति। तमेनमर्थं सकलं वसुबन्धुः श्लोकेनैकेन संजग्राह—

प्रागासन् रूपिवत्सत्त्वाः रसरागात्ततः शनैः।
आलस्यात्संनिधिं कृत्वा साग्रहैः क्षेत्रपो भृतः ॥

[अभिधर्मकोश ३।९७]

(२) मानवानां हीनप्रणीतभेदानधिकृत्य 'चूलकम्मविभंग'- सूत्रान्ते दृश्यते तथागत-शुभमाणवकयोः संवादः। एषा तत्र शुभस्य पृच्छा—"को नु खलु भो गौतम हेतुः कः प्रत्ययो येन मनुष्याणामेव सतां मनुष्यभूतानां दृश्यते हीनप्रणीतता। दृश्यन्ते खलु गौतम मनुष्या अल्पायुष्का

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दीर्घायुष्काः, बह्वाबाधा अल्पाबाधाः, दुर्वर्णा वर्णवन्तः,अल्पेशाख्या महेशाख्याः,अल्पाभोगा महाभोगाः, नीचकुलीना उच्चकुलीनाः, दुष्प्रज्ञाः प्रज्ञावन्तः।'' तत्रेयं तथागतस्य प्रतिवचनपालिः ''कम्मस्सका माणव सत्ता कम्मदायादा कम्मबन्धू कम्मपटिसरणा। कम्मं सत्ते विभजति यदिदं हीनप्पणीततायाति।'' अकुशलकर्मणा हीनता भवति। तथाहि प्राणातिपातादल्पायुष्कता बह्वाबाधाश्च। क्रोधद्रोहावुपादाय दुर्वर्णता। ईर्ष्याद्वेषावुपादायाल्पेशाख्यता। श्रमणब्राह्मणेभ्योऽदानादल्पभोगता। अभिमानेन नीचकुलम्। श्रमणब्राह्मणेष्वजिज्ञासुभावेन भवति दुष्प्रज्ञता। कुशलकर्मणा प्रणीतता भवति। तथाहि प्राणातिपातविरतेर्दीर्घायुष्कता अल्पाबाधाश्च। अक्रोधाद्रोहावुपादाय वर्णवत्ता। ईर्ष्याद्वेषविरतिमुपादाय महेशाख्यता। श्रमणब्राह्मणेभ्यो दानाद् महाभोगता। निरभिमानेनोच्चकुलम्। श्रमणब्राह्मणेषु जिज्ञासुभावेन भवति प्रज्ञावत्ता। एवमिहैव कुशलाकुशलकर्मणां विपाकः। परत्र तु कुशलकर्मणा स्वर्गः। अकुशलकर्मणा नरकः। तदेवमनेन शरीरेण कृतानि कर्माणि इहैवास्मिन्नेव शरीरे वा विपचन्ति, परं शरीरपातादमुत्र वा विपचन्ति, प्रेत्यभावे सति वा शरीरान्तरे विपचन्ति—इत्यावस्थिको विपाकस्त्रिविधः। आहुश्च धर्मपदाभाणकाः—

गब्भमेके उपज्जन्ति निरयं पापकम्मिनो।
सग्गं सुगतिनो यन्ति परिनिब्बन्ति अनासवा॥ इति।

[धम्मपद १२६]

(३) एषा कर्मफलविपाकव्यवस्था केषांचित् श्रमणब्राह्मणानामनभिमतासीत्। ते हि समाधिभावनां प्रमाणीकृत्य वदन्ति स्म यदस्माभिस्तादृशाः सत्त्वा दृष्टा ये सुचरितकारिणोऽपि निरयमुपपन्नाः, दुश्चरितकारिणोऽपि स्वर्गमुपपन्नाः। तेन सुचरितात्सुगतिः, दुश्चरिताच्च दुर्गतिः, इत्येष न नियमः। महाकर्मविभंगसूत्रान्तं तमिमं वादमधिकृत्याह तथागतः—''तत्रानन्द, योऽयमेवमाह—अस्ति दुश्चरितस्य विपाकः, इतीदमस्यानुजानामि। योऽयमेवमाह—अस्ति सुचरितस्य विपाकः, इतीदमस्यानुजानामि। योऽयमेवमाह—नास्ति दुश्चरितस्य विपाकः, इतीदमस्य नानुजानामि। योऽयम् (अकुशलकर्मपथाचारी) परं मरणात्स्वर्गे लोकमुत्पद्यते पूर्वमेवास्य तत्कृतं भवति कल्याणकर्म, पश्चाद् वा, मरणकाले वास्य भवति सम्यग्दृष्टिः। योऽयमेवमाह—नास्ति सुचरितस्य विपाकः, इतीदमस्य नानुजानामि। योऽयं (कुशलकर्मपथाचारी) परं मरणान्निरयमुत्पद्यते। पूर्वमेवास्य तत्कृतं भवति पापकर्म, पश्चाद्वा, मरणकाले वास्य भवति मिथ्यादृष्टिः। इति खल्वानन्द, अस्तिकर्म अभव्यमभव्याभासम्, अस्ति कर्म अभव्यं भव्याभासम्, अस्ति कर्म भव्यं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नैव भव्याभासं च, अस्ति कर्म भव्यमभव्याभासमिति ." सोऽयं कर्मविभंगः श्रुतिप्रतिशरणानामपि संमतः । मरणकालदृष्टिप्रभाविता गतिर्भवतीत्यपि तत्र गीतम्—

"यं यं वापि स्मरन् भावं त्यजत्यन्ते कलेवरम् ।
तं तमेवैति कौन्तेय सदा तद्भावभावितः ।।" इति ।
[गीता ८।६]

(४) श्रौतस्मार्तधर्मवद्बौद्धधर्मेऽपि परलोकप्रेत्यभावकर्मफलविपाकसिद्धान्ताभ्युपगमादस्यात्मभावस्य (=कायस्य) जात्यायुर्भोगादिविपाकाः पूर्वकृतकर्महेतुका एव प्रायशः स्वीक्रियन्ते । वस्तुतस्त्वेतादृशोऽभ्युपगम एकान्तवाद एव । दृष्टानां विपाकानामिह दृष्टकारणानुबन्धे सति तेषामदृष्ट(=पूर्वकृतकर्म) कारणकल्पनमन्याय्यमेव । तमेनमेकान्तवादं मनसि निधाय तथागतस्तं विशोधयामास । तथागतमेवानुसरन् भदन्तनागसेनोऽपि तं पुनरपि परिष्कृतवान् । तत्रैव भदन्तनागसेनस्य मिलिन्दं प्रति वचनम्–"नहि महाराज, सर्वं वेदयितं कर्म्ममूलकम् । [मिलिन्दप्रश्न, पृष्ठ १३७]। अल्पं कर्मविपाकजं बहुतरमवशेषं । तद् बालाः सर्वं कर्मविपाकजमेवेत्यति धावन्ति ।" [तत्रैव, पृष्ठ १३८] तमेनमर्थं समर्थयितुं यत्तत्र भदन्तः संयुक्तनिकायात्तथागतवचनमन्ववोचत्तदिदम्—"पित्तसमुत्थानान्यपि खलु सीवक इहैकत्यानि वेदयितानि, श्लेष्मसमुत्थानान्यपि, वातसमुत्थानान्यपि, ऋतुपरिणामजान्यपि, विषमाहारजान्यपि, औपक्रमिकाण्यपि, कर्मविपाकजान्यपि । तत्र सीवक ये ते श्रमणब्राह्मणा एवं वादिनो यत्किंचिदयं पुरुषपुद्गलः प्रतिसंवेदयति सुखं वा दुःखं वा अदुःखमसुखं वा सर्वं तत्पूर्वकृतहेतुभिः । (ते) यच्च साम यच्च ज्ञातं तच्चाति धावन्ति । यच्च लोके सत्यसंमतं तच्चाति धावन्ति । तस्मात्तेषां श्रमणब्राह्मणानां (मतं) मिथेति वदामि ।" [तत्रैव, पृष्ठ १४०]

(५) एवं परिष्कृतः कर्मवादः सप्रयोजनः एव । स खलु दुःखानि प्रतिकर्तुं लोकान् दृष्टकारणाभिमुखीकरोति । अदृष्टकारणवैमुख्यं च परिहृत्य नास्तिकभावाद्रक्षति । यो दृष्टे जगति सत्यविमुखो भवति, अदृष्टे जगति 'नास्ति परो लोकः' इति नास्तिकतामुपादत्ते तस्य नाकरणीयं नाम किंचिदस्तीति तथागतहृदयम् । तथा चाहुर्धर्मपदाभाणकाः—

"एकं धम्मं अतीतस्स मुसावादिस्स जन्तुनो ।
वितिण्णपरलोकस्स नत्थि पापं अकारियं ।।" इति ।
[धम्मपद १७६]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कर्मवादमूलमेवेदं भवबन्धनम् । सत्त्वानां भवबन्धनानि हि कर्माणि मनोभावविशेषोपजीव्यानि। ते चैते मनोभावाः स्कन्धैः स्कन्धानाम्, फलैः कर्मणाम्, दुःखरूपेण संसारेण सत्त्वानां संयोजकत्वात् संयोजनानीत्युच्यन्ते । तानि चैवमभिधर्मकोशे निर्दिष्टानि—

मूलं भवस्यानुशयः षड् रागः[1] प्रतिघ[2]स्तथा ।
मानो[3]ऽविद्या[4] च दृष्टिश्च[5] विचिकित्सा[6] च तेषु नः ॥
षड् रागभेदात्सप्तोक्ता भवरागो द्विधातुजः ।
अन्तर्मुखत्वात्तन्मोक्षसंज्ञाव्यावृत्तये कृतः ॥
आत्मात्मीय[1]-ध्रुवोच्छेद[2]-नास्ति[3]-हीनाग्रदृष्टयः[4] ।
अहेत्वमार्गे तद्दृष्टिरेतास्ताः पंचदृष्टयः ॥

[५। १, २, ७]

एतेषु संयोजनेषु अविद्या = मोहः=सदसदविवेकः, विचिकित्सा = सत्यविषयको द्वैधीभावः सन्देहः, प्रतिघः=प्रतिहिंसा-इति त्रीणि पशुपक्ष्यादिसाधारणानि परमादिमचित्तवृत्तयः । मानः पशुपक्ष्यादिसाधारणोऽस्ति न वेति न जानीमः, परं स सकलमनुष्यसाधारणो मनुष्यजातिसहज एवेति तर्कयामः । रागो मन्ये सर्वमनोभावानामग्रजः सर्वसत्त्वसाधारणः प्रायो दृश्यते । सच पशुपक्ष्यादिषु केवलमाहारे मिथुनभावे च कृतास्पदोऽपि मानवेषु लब्धप्रतिष्ठो लोकत्रयमावृत्य तिष्ठति । त्रैधातुकोऽयं लोको बौद्धागमे विख्यातः । तत्र नरक-प्रेत-तिर्यग्-मनुष्य-षड्देवनिकाययुक्तो लोकः कामधातुः । तत ऊर्ध्वं सप्तदशभूमिको लोको रूपधातुः । तत ऊर्ध्वं भूमिकाभेदहीनो लोकोऽरूपधातुः । एतेषु यो रागः स धातुभेदेन कामरागो रूपरागोऽरूपराग इत्येवमुच्यते । रूपारूपरागयोः कृते भवराग इत्येकमधिवचनं तस्योत्तरोत्तरोत्कृष्टलोके भवाभिलाषरूपत्वात् । ताविमौ रूपारूपलोकौ ध्यानगम्यौ कैश्चिच्छ्रमणब्राह्मणैर्मोक्षरूपतयाभिमतावपि बन्धरूपतया तथागतेन स्वीकृतौ । अनया लोकलोकान्तरकल्पनया स्पष्टमेव यन्मानवरागः कीदृशीं परां भूमिमुपगतः । हन्त ! यथाऽयोधातुमलमयोधातुमुपादायोत्थितमयोधातुमेव खादति, तथैव मानवान् खादत्येष मानवानुपादायोत्थितो मानवरागः । रागादप्यधिकं मानवेषु कृतास्पदं संयोजनमस्ति दृष्टिः । दृष्टिमूलकान्येव मानवकर्माणि । दृष्टिरेव बन्धनं दृष्टिरेव बन्धनप्रहाणम् । बन्धनभूताः पंचदृष्टयो बौद्धागमाख्याताः । तथाहि—

११

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्कायदृष्टिः = आत्मात्मीयदृष्टिः=अहमस्मि ममेदमिति दृष्टिः ।

अन्तग्राहदृष्टिः = शाश्वतवादोच्छेदवाददृष्टिः ।

मिथ्यादृष्टिः = नास्तिकदृष्टिः = नास्ति सुकृतदुष्कृतकर्मणां फलं नास्ति परो लोक इति दृष्टिः ।

दृष्टिपरामर्शः = ममैव सत्यमन्यदनृतमिति दृष्टिः ।

शीलव्रतपरामर्शः = अहेतोः (ईश्वरादेः जगतो) हेतुतया, अमार्गस्य (हिंसा-प्रधानव्रतादीनां स्वर्गादेः) मार्गतया चाभ्युपगमस्य दृष्टिः ।

पुराद्यत्वे चैतद्दृष्टिमूलको हि लोकानां विविधकर्मकाण्डोपासनाप्रपंचो लोकपरलोक-प्रयोजनः प्रवृत्तः ।

(६) संयोजनानां प्रहाणान्मोक्षः । तदर्थं नहि तथागतमार्गे कस्यचित् सच्चिदानन्दस्य आश्रयो गृह्यते, प्रत्युत सर्वथैव तद्विपरीतस्य अनित्यानात्मदुःखरूपस्य दर्शनस्याश्रयो गृह्यते । एतद्दर्शनमुपादायैव संयोजनप्रहाणं भवति, आस्रवविशुद्धिश्च जायते । तथा चाहुर्धर्मपदाभाणकाः–

सब्बे संखारा अनिच्चाति यदा पञ्ञाय पस्सति ।
अथ निब्बिन्दति दुक्खे एस मग्गो विसुद्धिया ॥
सब्बे संखारा दुक्खाति यदा पञ्ञाय पस्सति ।
अथ निब्बिन्दति दुक्खे एस मग्गो विसुद्धिया ॥
सब्बे धम्मा अनत्ताति यदा पञ्ञाय पस्सति ।
अथ निब्बिन्दति दुक्खे एस मग्गो विसुद्धिया ॥

[धम्मपद २७७–२७९]

अनित्यदुःखानात्मवादो नामानुलोमज्ञानम् । [विसुद्धिमग्ग २१।१२८–१३३] तस्य मोक्ष-मार्गे सर्वत्रानुलोमभावेनानुकूलभावेनाविरोधभावेन विद्यमानत्वात् । तत्र तत्र जायमानं चित्तस्य बन्धनमिदं विमोचयति । स्वर्गं प्रति लोलुपं चित्तमेतद् ज्ञानं प्रबोधयति—

"कृत्वापि दुष्करं कर्म स्वर्गं लब्ध्वापि दुर्लभम् ।
नृलोकं पुनरेवैति प्रवासात्स्वगृहं यथा ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुखमुत्पद्यते यच्च दिवि कामानुपाश्नताम् ।
यच्च दुःखं निपततां दुःखमेवावशिष्यते ॥
तस्मादस्वन्तमत्राणमविश्वास्यमतर्पकम् ।
विज्ञाय क्षयिणं स्वर्गमपवर्गे मतिं कुरु ॥

[सौन्दरनंद ११।३६,५४,५५]

यदि पुनः स्वर्गमविचिन्त्य मनो लोकासक्तं जातं तदैतदनुलोमज्ञानं बलरूपयौवनानामभ्याख्यानमुखेन देशयिष्यति—

"क्व कार्तवीर्यस्य बलाभिमानिनः सहस्रबाहोर्बलमर्जुनस्य तत् ।
चकर्त बाहून्युधि यस्य भार्गवो महान्ति श्रृंगाण्यशनिर्गिरेरिव ॥
क्व तद्बलं कंसविकर्षिणो हरेस्तुरङ्गराजस्य पुटावभेदिनः ।
यमेकबाणेन निजघ्निवान् जरा क्रमागता रूपमिवोत्तमं जरा ॥
दितेः सुतस्यामररोषकारिणश्चमूरुचेर्वा नमुचेः क्व तद्बलम् ।
यमाहवे क्रुद्धमिवान्तकं स्थितं जघान फेनावयवेन वासवः ॥
बलं कुरूणां क्व च तत्तदाभवद् युधि ज्वलित्वा तरसौजसा च ये ।
समित्समिद्धा ज्वलना इवाध्वरे हतासवो भस्मनि पर्यवस्थिताः ॥"

[सौन्दरनंद ६।१६-२०]

रूपयौवनासक्तं च चित्तमेवं वदिष्यति—

"अहं वपुष्मानिति यच्च मन्यसे विचक्षणं नैतदिदं च गृह्यताम् ।
क्व तद्वपुः सा च वपुष्मती तनुर्गदस्य साम्बस्य च सारणस्य च ॥
यदि प्रतीपं वृणुयान्न वाससा न शौचकाले यदि संस्पृशेदपः ।
मृजाविशेषं यदि नाददीत वा वपुर्वपुष्मन्वद कीदृशं भवेत् ॥
ऋतुर्व्यतीतः परिवर्तते पुनः क्षयं प्रयातः पुनरेति चन्द्रमाः ।
गतं गतं नैव च संनिवर्तते जलं नदीनाञ्च नृणां च यौवनम् ॥"

[सौन्दरनंद ६।२४,२६,२८]

एवमिदमनुलोमज्ञानमासङ्गादुन्मोच्य मार्गप्रस्थितं लोकं करोति । प्राप्तमार्गस्य वीर्यमुपादायैव संयोजनप्रहाणान्मोक्षः । सकृदेव यस्य सर्वाणि संयोजनानि क्षीणानि सोऽर्हन् स मुक्तः । १३

३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यस्तु शनैर्गामी स यदात्मदृष्टिम्, चतुःसत्यसंदेहलक्षणां विचिकित्साम्, अहेत्वमार्गयोः हेतुमार्गाभ्युपरूपं शीलव्रतपरामर्शं विजहाति तदा स स्रोत आपन्नः = मोक्षगामिनं प्रवाहमुपगतो भवति। चिरेणाचिरेण वा तस्य विमोक्षो न संशयितो भवति। यश्च स्रोत आपत्तिफलमुपलभ्य कामरागप्रतिघौ तनूकरोति स सकृदागामी भवति, न च तस्य द्विः प्रेत्यभावो भवति। यश्च सकृदागामिफलं लब्ध्वा सर्वथैव कामरागप्रतिघौ जहाति सोऽनागामी भवति, स नेह जायते, शुद्धावासेषूत्पद्य तत एव परिनिर्वाति। अनागामिफलं प्राप्य यो प्रहीणभव (=रूपारूप) रागो भवति, क्षीणमानो भवति, व्यपगतमिथ्यादृष्टिः परिहीणान्तग्राहदृष्टिः प्रविलुप्तदृष्टिपरामर्शो भवति, सोऽर्हन् भवति मुक्तः कृतकरणीयः। एवं संयोजनप्रहाणकर्मोपादायैव मोक्षः। स च क्लेशप्रहाणं न तु कस्यचित् प्राप्तिः।

(७) बौद्धसंमतं कर्मवादं निरूपयन्तो वयं यदृच्छया तादृशं विषयमुपगता यो हि एतावत्कालं परिहृतोऽभूत्। मोक्षप्रसंगे तत्र न कोऽपि नित्यो ध्रुवः कूटस्थः शाश्वतोऽपरिवर्तनशीलः पदार्थ उपादेयतया गृहीतः प्रत्युत शाश्वतवादः संयोजनेषु परिगणितः, आत्मदृष्टिर्बन्धनभूता परिगृहीता। तदेतत्सर्वथैवेश्वरात्मवादिविरोधिदर्शनं स्वविरोधिभिर्बहुतरमभ्याख्यातं विवरीतुमेष मातृकोद्देशः—

(क) आत्मा, अर्थात् कर्मणां कर्ता भोक्ता च किं कूटस्थः?

(ख) जगतो हेतुः किं कूटस्थः?

(ग) बौद्धदर्शनं किमुच्छेदवादि, अभाववादि वा?

'न तथेति' उत्तरेण ता एता जिज्ञासा बौद्धागमे समाहिता भवन्ति।

(क) योऽयं कर्ता च भोक्ता च स न कूटस्थः प्रत्युत क्षणं क्षणं विपरिवर्तमान इत्यस्मिन् सिद्धान्तेऽयं प्रमुख आक्षेपः। यो हि कर्म करोति फलभोगकाले न स एव भवति प्रत्युत विपरिवर्तमानः कश्चिदन्य एव भवति। एवं यः कर्माकार्षीत् तस्याभावाद् यश्च नाकार्षीत्कर्म स फलभाग् भवति। आपत्तिरेषा कृतहानमकृताभ्यागमश्चेति प्रोच्यते*। परिहृता चैषा

* सत्त्वभेदे कृतहानमकृताभ्यागमः प्रसज्यते [न्यायसूत्र ३ । १ । ४] अण्णो करेइ अण्णो परिभुंजइ [सन्मतिप्रकरण १ । ५२] न बन्धमोक्षौ क्षणिकैकसंस्थौ [युक्त्यनुशासन]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्तानैक्यमाश्रित्य* । 'यः करोति स एव भुङ्क्ते'—मत्वा सोऽयं तर्कः प्रवृत्तः । परम् आत्मा निष्क्रियः, कारकं त्वात्माधिष्ठितं शरीरमेव । यच्छरीरं कर्मकाले भवति न तद्भोगकाले । एवं निष्क्रिय आत्मा येन शरीरेण कर्मणां कर्ता भवति न तेनैव शरीरेण भोक्ता । तथा चैषापत्ति-र्नित्यात्मवादपक्षेऽपि दुर्वारैव । अन्या चाप्यापत्तिस्तथाह नागार्जुनः—

असंप्राप्तस्य च प्राप्तिर्दुःखपर्यन्तकर्म च ।
सर्वक्लेशप्रहाणं च, यद्यशून्यं, न विद्यते ॥
यः प्रतीत्यसमुत्पादं पश्यतीदं स पश्यति ।
दुःखं समुदयं चैव निरोधं मार्गमेव च ॥

[माध्यमिककारिका २४।५६,५७]

(ख) कूटस्थहेतुवादं परीक्षमाण आह नागार्जुनः—

न कर्त्तव्यं भवेत्किंचिदनारब्धा क्रिया भवेत् ।
कारकः स्यादकुर्वाणः शून्यतां प्रतिबाधते ॥
अजातमनिरुद्धं च कूटस्थं च भविष्यति ।
विचित्राभिरवस्थाभिः स्वभावरचितं जगत् ॥

[माध्यमिककारिका २४।५४,५५]

धर्मकीर्तिस्तु—"अक्षणिकस्य क्रमयौगपद्याभ्यामर्थक्रियाऽयोगादर्थक्रियासामर्थ्यलक्षणमतो निवृत्तमित्यसदेव स्यात्" [वादन्याय, पृष्ठ ७] इति कूटस्थहेतुवादं निराचकार । अत्र समा-सेनोक्तं व्याकुर्वन्नाह शान्तरक्षितः—"अक्षणिकत्वेनाभिमतस्य भावस्य क्रमेण तावदर्थक्रिया न युज्यते । कार्यनिवर्तनयोग्यस्य स्वभावस्य सदा सत्त्वात् । अन्यथा पश्चादपि न कुर्यात् पूर्व-स्वभावाप्रच्युतः पुरावत् ।···· न चाप्यक्षणिकत्वेनोपगतस्य सकृत्कार्यमुत्पद्यमानमुपलभ्यते क्रम-संभवदर्शनात् । तदेवमक्षणिकः पदार्थः क्रमेण युगपद्वा न कांचिदप्यर्थक्रियामात्रामंशतोऽपि क्षमो निवर्तयितुमित्यसत्त्वमेवास्य ।" इति ।

तार्किकाणां तमिमं शिरःपीडाजनकं शुष्कं हेतुवादं परिहृत्य तथागताभिप्रायमत्र

* हेतुमान् फलयोगीति दृश्यते नैष संभवः ।
सन्तानस्यैक्यमाश्रित्य कर्ता भोक्तेति देशितम् ॥ [बोधिचर्यावतार ९ । ७३]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

निर्दिशामः। जगद्धेतुः कूटस्थं ब्रह्म तथागतयुगे जिज्ञासूनामासीदेकतमो वादविषयः। प्रश्न-प्रतिवचनाभ्यां श्रोतृवक्तृषु बहुधा विविच्यमानमपि तदिदं न कर्कशतर्कैर्व्याकुलीकृतमासीत्। तद्विषये बहुप्रश्नवाचाटां वाचक्नवीं गार्गीं 'शिरस्ते पतिष्यत्यतिप्रश्नकरणेने'ति वारयामास याज्ञवल्क्यः *। तदिदं नित्यं कूटस्थमानन्दमयं ब्रह्म संसारदुःखत्रस्तानां तत एवानन्दं विचिन्वतां जनानां ज्ञानोपासनयोरालम्बनमभवत्। "एषास्य परमा गतिरेषास्य परमा संपदेषोऽस्य परम आनन्दः" इति तस्यानन्दरूपतामुक्त्वास्यानन्दस्याप्रमेयतां निदर्शयितुमाह याज्ञवल्क्यः—"यो मनुष्याणां राद्धः समृद्धो···स मनुष्याणां परम आनन्दः, ये शतं मनुष्याणामानन्दाः स एकः पितॄणां जितलोकानामानन्दः, ये शतं पितॄणां जितलोकानामानन्दाः स एको गन्धर्वलोक आनन्दः, ये शतं गन्धर्वलोक आनन्दाः स एकः कर्मदेवानामानन्दः, ये ते शतं कर्मदेवानामानन्दाः स एक आजानदेवानामानन्दः, ये ते शतमाजानदेवानामानन्दाः स एकः प्रजापतिलोक आनन्दः, ये शतं प्रजापतिलोक आनन्दाः स एको ब्रह्मलोक आनन्दः।" [बृहदारण्यकोपनिषद् ४।३।३२–३३] तमिमं परममानन्दं रागस्य, तृष्णायाः, मारस्य च छलनामात्रमेवेति तथागतहृदयम्। न हि लोकेऽणुमात्रमप्यानन्दं स ददर्श, किं पुनर्नित्यं सर्वथैवाविनश्वरमानन्दम्। अस्य आनन्दमयस्य ब्रह्मलोकस्यानित्यतां ख्यापयितुं ब्रह्मनिमन्तणिकसूत्रान्ते श्रूयते बकब्रह्मणा सह तथागतस्य संवादः। तथागतं दृष्ट्वाह ब्रह्मा बकाभिधानः स्वागतं मार्ष, चिरेणागतोऽसि मार्ष, लोकोऽयं मार्ष ध्रुवो नित्य इति। एवं वादिनं ब्रह्माणमवोचद्भगवान् अविद्यायां निपतितो बको ब्रह्मा, अहो! अविद्यायां निपतितो बको ब्रह्मा यदनित्यं नित्यमिति अध्रुवं ध्रुवमिति चिन्तयति। तदा मारः अन्यतरं ब्राह्मपार्षदमाविश्योवाच तथागतम् 'भिक्षो! मावजानीहि ब्रह्माणमिमम्। एष ब्रह्मा, ईश्वरः, कर्ता, प्राणिनां पिता' इति। एवमुक्ते पापिष्ठ मार, जानाम्यहं त्वाम्। एष ब्रह्मा ब्रह्मपार्षदाश्च तव वशगाः। न चाहं ते वशगो भविष्यामीत्याह तथागतः। [मज्झिमनिकायसुत्त ४९] सेयं ब्रह्मविषयिणी चर्चा स्थविरैर्जयमङ्गलगाथासु प्रत्यहं गीयते—

"दुग्गाहदिट्ठिभुजगेन सुदट्ठहत्थं ब्रह्मं विसुद्धिजुतिमिद्धिबकाभिधानं।
ञाणागदेन विधिना जितवा मुनिन्दो तं तेजसा भवतु वो जयमंगलानि॥" इति।

* "कस्मिन्खलु ब्रह्मलोका ओताश्च प्रोताश्चेति। स होवाच गार्गि मातिप्राक्षीर्मा ते मूर्धा व्यपसद् अनतिप्रश्न्यां वै देवतामति पृच्छसि गार्गि मातिप्राक्षीरिति ततो ह गार्गी वाचक्नव्युपरराम।" [बृहदारण्यकोपनिषद् ३।६]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोक्षमार्गे एवंभूतमानन्दमयं नित्यं ब्रह्म प्रतीत्य स्थिरा नित्या तृष्णैव मनसि भवितुं शक्नोतीति सर्वथा निरुपयोगि। आत्मवाद्यपि वात्स्यायनो मोक्षरूपतयाभिप्रेतमानन्दं तथागतवदेव मोक्षानुपयोगीति निर्धारयामास। वाचा किंचिदुपहसन् स प्राहानन्दासक्तान्—"यथा दृष्टमनित्यं सुखं परित्यज्य नित्यं सुखं कामयते। एवं देहेन्द्रियबुद्धीरनित्या दृष्टा अतिक्रम्य मुक्तस्य नित्या देहेन्द्रियबुद्धयः कल्पयितव्याः। साधीयश्चैवं मुक्तस्य चैकात्म्यं कल्पितं भवतीति।" [न्यायसूत्र १ । १ । २२] अस्तु। आनन्दस्य तृष्णाजनकत्वात् तत्रापि आनन्दस्य नित्यस्य नित्यायास्तृष्णायाजनकत्वात् नित्यं ब्रह्म नाद्रियते मोक्षमार्गे—इति हि मन्ये हेतुर्येन न किंचिदपि नित्यं स्वीक्रियते।

(ग) एवमनित्यवादि बौद्धमतं भ्रमेण प्रमादेन वा वितथाभिनिवेशेन वा केचिदभाववादि आहुः *। परमुच्छेदवादापरपर्यायोऽभाववादस्तथागतमते प्रहातव्या अन्तग्राहदृष्टिरेव। शाश्वतोच्छेदवादपराङ्मुखा हि बौद्धा मध्यममार्गावलम्बिनो न पूर्वान्तमाश्रयन्ति न चापरान्तमाश्रयन्ति। पूर्वान्तापरान्तपरित्यागपथोऽयं भवति शोकदुःखग्रस्ते जगति जनालम्बनम्। तथा चाभिनन्द्यते—

अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत।
अव्यक्तनिधनान्येव तत्र का परिदेवना॥ इति।

[गीता, २।२८]

तदेवं बौद्धागमो न शाश्वतवादं प्रतिपादयति नाप्युच्छेदवादम्। आह चात्र नागार्जुनः—

स्कन्धानामेष सन्तानो यस्माद् दीपार्चिषामिव।
प्रवर्तते .... च युज्यते॥
पूर्वे यदि च भज्येरन्नुत्पद्येरन्न चाप्यमी।
स्कन्धाः स्कन्धान्प्रतीत्येमानथ लोकोऽन्तवान् भवेत्॥
पूर्वे यदि न भज्येरन्नुत्पद्येरन्न चाप्यमी।
स्कन्धाः स्कन्धान्प्रतित्येमान् लोकोऽनन्तो भवेदथ॥

[माध्यमिककारिका २७। २२-२४]

* स्थिरमनुयायिकारणमनभ्युपगच्छतामभावाद्भावोत्पत्तिरित्येतदापद्यते। [ब्रह्मसूत्र २। २ २६]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतावता कर्मवादस्य स्वरूपं तन्मूलकौ बन्धमोक्षौ चेति सर्वं स्पष्टमभूत् । दृष्टहेतुवज्जगद्वैषम्यस्यादृष्टोऽपि भवति हेतुरल्पीयस्यां मात्रायामित्यपि तथागताभिमतम् । ननु निदानेन किं यदि न भैषज्यम् ? तदस्य दृष्टादृष्टनिदानस्य वैषम्यस्य कः प्रतीकारः ? जगद्वैषम्यं हर्तुमेव बुद्धपुत्रा मोक्षपराङ्मुखाः सन्तो स्वकं त्रैकालिकं सुकृतं लोकानामदृष्टजनितां पीडां हर्तुमुत्सृजन्ति । आत्मभावान् (=कामान्) भोगांश्च दृष्टनिदानां पीडां हर्तुं प्रयच्छन्तीति कर्मवादस्य सकला कटुता हृता भवति । स्वकृतमेव सर्वो भुङ्क्ते इति मनसि कृत्वा न बुद्धपुत्रा लोकान् परिहरन्ति प्रत्युत सर्वेषां पीडां हरन्तो प्रणिदधति—

आत्मभावांस्तथाभोगान्सर्वं त्र्यध्वगतं शुभम् ।
निरपेक्षस्त्यजाम्येष सर्वसत्त्वार्थसिद्धये ॥ इति ।

[बोधिचर्यावतार ३ । १०]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रौत-स्मार्त-पौराण-देवताविमर्शः

श्रीभगवत्प्रसादमिश्रः ।

आर्या हि भारतगौरवमूलभूते लोककल्याणसाधने वैदिके शब्दराशौ परं श्रद्दधानाः—

"यः समिधा य आहुती यो वेदेन ददाश मर्तो अग्नये । यो नमसा स्वध्वरः ॥
तस्येदमर्वन्तो रंहयन्त आशवस्तस्य द्युम्नितमं यशः ।
न तमंहो देवकृतं कुतश्चन न मर्त्यकृतं नशत् ॥"

(ऋ०८।१९।५-६)

"मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत्स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥"

(ऋ० १०।११७.६; तै० ब्रा० २।८।८।३)

इति च तदीयमनुशासनं शिरसा हृदयेन च मन्यमाना अद्य यावद्यज्ञादिकर्मानुतिष्ठन्ति । यद्यपि पूर्वकालापेक्षया सम्प्रति सर्वस्यापि शास्त्रीयकर्मणो विशेषतश्च प्रत्यक्षश्रुतिसमुपदिष्टस्य श्रौतकर्मणो नानुष्ठानं भवतीत्यस्माकं कालशिक्षोभयसहकृतप्रमादपरिचय एव । तथापि बहुभिरनार्यैर्बहुवारं कर्ममार्गस्योन्मूलनाय कृतेऽपि बहुविधे प्रयत्ने सारभूयिष्ठत्वादस्य ग्रन्थतः सम्प्रदायतश्चाक्षुण्ण एवायं मार्गो विराजमान आस्ते ।

तत्र व्यक्तिशः कर्मणां भेदानन्त्येऽपि प्राधान्येन श्रौतस्मार्तपौराणिकभेदभिन्नतया त्रिविधानि कर्माणि विशेषतः प्रसिद्धानि । तत्र हि यानि प्रत्यक्षश्रुतिसमुपदिष्टानि श्रौतानि कर्माणि तेभ्यः स्मार्तेषु देवता–द्रव्यर्त्विगादिविषयकं किञ्चिदिव वैलक्षण्यम्, ततोऽभ्यधिकं पौराणिकेषु कर्मसूपलभ्यते । तदत्र देवतामुपलक्ष्य किञ्चित् प्रस्तूयते ।

तत्र तावद्वैदिकेषु केचन लोकत्रयाश्रयेण अग्निरिन्द्रः सूर्य इति देवतात्रयं मन्वते । १६
पौराणिकाश्च शिव–विष्णु–देवी–सूर्य–विनायकेति प्राधान्येन पञ्चानां देवतानामुपासनमुपदिशन्ति । तत्रैकस्या एव देवताया बहूनि नामानि गुणतः कर्मतश्च संभवन्तीत्युभये ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रौते कर्मणां बाहुल्येऽपि देवतानां बहुत्वं पौराणिकदेवतानामिव न दृश्यते। पौराणिक-कर्मसु हि श्रौतेऽनुपलभ्यमानानामपि वितथ-गृहक्षत-दौवारिक-भृङ्गराज-मृगलोचनेन्द्रचौरा-दीनां बह्वीनां देवतानां पूजनाद्यभ्यनुज्ञायते।

श्रुतौ एकस्या एव देवतायाः शान्तमशान्तं चेति नामद्वैविध्यं देशभेदेन च भिन्नानि नामानि श्रूयन्ते यथा—

'अग्निर्वै देवस्तस्यैतानि नामानि शर्व इति यथा प्राच्या आचक्षते भव इति बाहीकाः। पशूनां पतिः रुद्रोऽग्निरिति तान्यस्यांशान्तान्यस्येतराणि नामानि अग्निरिति शान्ततमम्॥'

—श० ब्रा० १।७।३।८.

श्रौतेषु कर्मसु बहुत्रैकस्मिन्नेव हविषि एकस्यामाहुत्यां भिन्नयोर्देवतयोः समुच्चित्य देवता-त्वमवगम्यते यथा—इन्द्राग्नी मित्रावरुणौ अग्नीमरुतौ इत्यादिः। स्मार्तेषु पौराणेषु च नैवं प्रायो देवताद्वन्द्वेन समुच्चित्य हविःप्रदानमवलोक्यते।

श्रौते स्मार्ते च कर्मणि मिथुनयोः स्त्रीपुन्देवतयोर्द्वन्द्वश्रुत्या ऐकरूप्येण वा देवतात्वं नोप-लभ्यते। पौराणे च कर्मणि लक्ष्मीनारायण—सीताराम—अर्द्धनारीश्वराद्याख्याभिस्तथाविधत्वं सुस्पष्टमुपलभ्यते।

श्रौते कर्मणि मरुतः सान्तपनाः, इन्द्रो विमृधः, अग्निरनीकवान्, इत्येवं देवतानां सवि-शेषणं नाम हविर्याज्यास्वनुश्रूयते। स्मार्ते पौराणे च कर्मणि प्रायो नैवं सविशेषतया देवताया हविःप्रदाने नाम समाद्रियते।

श्रौते स्मार्ते च कर्मणि देवतानां हविर्भाक्त्वस्तुतिभाक्त्वोभयभाक्त्वरूपेणास्ति त्रैविध्यम्। पौराणिके तु हविस्तुत्युभयभाक्त्वरूपमैकविध्यमेवोपलभ्यते। न हि पौराणिकी काचनेदृशी देवता दृश्यते या केवलं स्तुतिवचनेनान्विता तत्र वान्यत्र वा हविर्भाक्त्वेन न श्रुता स्यात्। तस्या हि किमप्यभिधानं त्वीदृगुपलब्धुं शक्यते यद्धि स्तुतिवचने प्रयुक्तमपि होमहविर्भाक्त्वेन न विहितं स्यात्, यथा शालग्रामनर्मदेश्वरेत्यादिकम्।

 स्मार्ते कर्मणि ब्रह्मणे हविः प्रदीयते। पौराणेषु कर्मसु सर्वतोभद्रादिमण्डलेषु ग्रहाधिदेवताप्रत्यधिदेवतासु दिक्पालेषु च ब्रह्मणो देवतात्वेन समर्चनं सृष्टि—स्थिति—संहारकर्त्रीषु

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तिसृषु देवतासु सृष्टयधिकारित्वेन च सङ्कीर्तनं भवदपि स्वातन्त्र्येण शिवविष्ण्वादिवदर्चनं नोपलभ्यते। श्रौते च सृष्टिकर्तुः प्रजापतित्वेन सङ्कीर्तनाद् ब्रह्मशब्देन देवतात्वमल्पस्थानेष्वेवोपलभ्यते।

याज्ञिकाः पौराणिकाश्च देवतानां विग्रहवत्त्वं बहुत्वं चाभिप्रयन्ति, न तु मीमांसकवन् मन्त्रात्मकत्वम्।

श्रौते कर्मणि देवतायाः कदाचिद् विग्रहवत्त्वाभ्युपगमेऽपि तद्विग्रहस्य शिलाद्युपादानेन निर्माणविधानाभावात् तस्य प्रतिष्ठादिसंस्कारस्य न्यासादिव्यापारस्य चोपयोग एव नास्ति। स्मार्ते पौराणे च कर्मणि देवतायाः स्वानुरूपं विग्रहं विरचय्य तत्र सात्मकत्वविधानार्थं प्राणप्रतिष्ठार्थं च तत्तदङ्गेषु अभीष्टाया देवताया अनुरूपकलान्यासो विधीयमानो दृश्यते।

श्रौतस्मार्तयोर्देवतानामग्निमुखत्वं ब्राह्मणादिमुखत्वं च दृश्यते। पौराणिकानां प्रतिमात्मकाधिष्ठानमुखत्वमेकं विशिष्यते। तदधिष्ठानमुपादानभेदेन शिलार्चनादिमयं बहुविधं दृश्यते। तथा हि—

शैली दारुमयी लौही लेप्या लेख्या च सैकती।
मनोमयी मणिमयी प्रतिमाष्टविधा स्मृता ॥ [श्रीमद्भागवते,]
प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु।
अपि वाक्षतपुञ्जेषु .... ॥ [इति छन्दोगपरिशिष्टे,]
स्ववर्णैर्वा पटे लेख्या गन्धैर्मण्डलकेषु वा। [याज्ञवल्क्यस्मृतौ]

सर्वासामपि देवतानां त्रिगुणातीतचिदात्मकत्वेनैकरूप्येऽपि प्रयोजनानुरोधेन कृत्यभेदाद् गुणात्मकरूपभेदपरिग्रहवशेन व्यवहारवशेन बहुरूपत्वं दृश्यते। तत्र महाभाग्याद्देवताया ऐश्वर्यात् सर्वविधफलदानसामर्थ्ये सत्यप्युपासकानां कामनानुसारं तत्तत्फलप्राप्त्यर्थं शास्त्रविधानानुसारेण तत्तद्देवताया एवोपासनाया औचित्यं प्रतीयते व्यवहारतः। तदेवं देवताविशेषस्य विशिष्टशक्तिमत्त्व-नियतफलदातृत्वविशेषश्चानेनैव हेतुना श्रीमद्भागवतादिपुराणेषु समुपलभ्यते।

तदेवमत्र सङ्क्षिप्य श्रौतस्मार्त-(सूत्रग्रन्थाननुसृत्य) पौराणिकात्मकतया निरूपिता सैषा देवता यथायथं शास्त्रविधया समुपासिता सद्बुद्धिप्रदानेन मनुष्यजातिं विशेषत उपकरोतीत्यौपक्रमिको वेदोपदेशोऽस्माभिरधुनापि सोत्साहं परिपालनीय एव श्रेयस इति शम्। २१

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मोक्षनिरूपणम् ।

श्रीवीरमणिप्रसादोपाध्यायः ।

नास्ति तिरोहितं विदितवेदितव्यानां वेदान्तनिष्णातानां यत्स्वभावतोऽपास्ताऽशेषविशेषो व्यपेतस्वातिरिक्तः प्रत्यक्चिदात्मैव अविद्याप्रत्युपस्थापितनामरूपक्रियात्मकप्रपञ्चोपप्लुतोऽस्वास्थ्यमिवापन्नोऽनादिकालमारभ्य चेतनाचेतनात्मकतया जीवरूपेण बम्भ्रमीति विश्वरूपेण च विभाति । स एव चानेकजन्मसञ्चितैः परमेश्वरपादपङ्कजसमर्पणबुध्द्या विहितैर्वर्णाश्रमानुसारिभिः श्रौतस्मार्तक्रियाकलापैः समासादितस्वान्तशुद्धिरिहामुत्रार्थफलनिर्विण्णो ब्रह्मनिष्ठश्रोत्रियकृपाप्राप्तमार्गो वेदान्तश्रवणमनननिदिध्यासननिहितमानसस्तदभ्यासजन्यसंस्कारसचिवयाग्र्यया बुद्ध्या वा सम्पन्नोऽनावृतप्रत्यक्चैतन्यं साक्षात्कृत्य कृतकृत्यो भवति । एष एवाद्वैतवेदान्तस्य सम्पिण्डितो वृत्तान्तः । तथाप्यसम्भावनाविपरीतभावनाविश्वासचापल्यादिदोषैः प्रतिबद्धः साक्षात्कारः स्वफलनिर्वर्त्तनाक्षमोऽनल्पकल्पकल्पनापरिप्रौढविचारसाहाय्यमपेक्षत एव ।

यदिहाशङ्क्यते वेदान्तमहावाक्यनिहितब्रह्मात्मैक्यबुद्धिबाधिते प्रपञ्चे द्वैतावगाहिवाक्यानाम्प्रत्यक्षादिप्रमाणानाञ्चापहृतविषयत्वेनाप्रामाण्यापत्तिरद्वैतवाक्यानां च स्वार्थपर्य्यवसायितया किञ्चिदविधायकत्वेनाप्रामाण्यापत्तिरित्युभयथा पाशारज्जुर्वेदवाक्यकलापस्येति तन्न, ब्रह्मात्मैक्यबुद्धया प्रत्यक्षादिविषयगतपारमार्थिकत्वापहारेऽपि व्यावहारिकत्वस्याक्षुण्णतया सुदूरपराहतमेवैतत्सर्वमनर्थपरिकल्पनम् । तत एव च नोपजीव्यविरोधोऽपि, अद्वैतावगाहिवाक्यानाम्प्रामाण्यस्य चरमलक्ष्यत्वेऽपि द्वैतप्रतिपादकवाक्यानामपि निषेधप्रतियोगिसमर्पणविधया विचारसाध्याभावप्रतियोगिप्रतिपादकतया वा* ऽवान्तरतत्त्वस्य स्वीकारात् । क्वचिदप्युपाधौ प्रतीयमानत्वानधिकरणत्वस्यैवासत्त्वलक्षणत्वात्तद्गतव्यावहारिकप्रामाण्यस्य चातिरस्करणीयत्वादुभयविधवाक्यानां सामञ्जस्यम् । यदपि चाद्वैतिनां नये वेदादीनामपि ब्रह्मसाक्षात्कारबाध्यत्वोपगमेन नास्तिकत्वा-

* तदुक्तम्–"विप्रतिपत्तिजन्यसंशयस्यानुमित्यङ्गत्वेऽपि व्युदसनीयतया विचाराङ्गत्वमस्त्येव ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पत्तिरिति तन्न, नहि वेदादिसत्त्वासत्त्वाभ्युपगम आस्तिकनास्तिकत्वप्रयोजकोऽपि तु तत्प्रामाण्याप्रामाण्याभ्युपगम एव, अन्यथा चार्वाकस्याप्यास्तिकत्वपरिगणनाप्रसङ्गः। अद्वैतिभिश्च प्रत्यक्चैतन्याभिन्ने पूर्णे ब्रह्मणि वेदानां स्वमहातात्पर्यविषयीभूतेऽबाधितविषयत्वेन प्रामाण्याभ्युपगमाद् न तन्निरादराशङ्का लेशतोऽपि पदमर्पयति। अपि च स्वस्य स्वावान्तरविषयाणाञ्च ब्रह्मसत्तातिरिक्तसत्ताशून्यत्वविशिष्टसत्त्वरूपमिथ्यात्वं वेदैरेव प्रसाध्यते, अन्यथा परमतात्पर्यविषयस्य सजातीयविजातीयस्वगतभेदशून्यस्यासिद्धया बाधितार्थविषयकत्वेन वेदानामप्रामाण्यमेव स्यादिति 'तस्य निश्वसितं वेदाः' इतिवचनानुरोधेन निश्वासभूता वेदाः स्वलक्ष्यं प्रसाध्य स्वोद्गमस्थान एव विलीयन्त इति समीचीना व्यवस्था। अतो यथा वाक्यार्थानुगुण्येन पदार्था नीयन्ते तथैव परमतात्पर्यानुगुण्येनावान्तरतात्पर्यविषयव्यवस्थापका वेदाः स्वयमेव पूर्णतः सङ्गता भवन्ति। विकाराणां कारणभावमपि गतानां कारणानतिरिक्तत्वं न दूषणम्। अत एव 'ब्रह्माक्षरसमुद्भवम्' इत्यनुसृत्याक्षरब्रह्मसमुद्भूतानां वेदानामक्षरब्रह्मानतिरिक्तत्वं न दूषणं प्रत्युत 'वेदास्तं पराद्युर्यो वै आत्मनोऽन्यत्र वेदान् वेद' इतिवचनानुसारेण प्रत्यक्चैतन्याभिन्नब्रह्मव्यतिरिक्ततया विदिता वेदा वेदितारं स्वार्थाच्च्यावयन्ति। ब्रह्मभावापत्तौ तु तत्पार्थक्येन वेदाभावो वेदादेवावगम्यते। यथोक्तम्—'अत्र वेदा अवेदा भवन्ति'।

ब्रह्मविश्लेष एवानन्तानर्थहेतुरत एवाविद्यया ब्रह्मविश्लिष्टा इवात्मानं मन्यमाना एव जीवा जाग्रत्स्वप्नयोर्भ्रामं भ्रामं क्वचिदपि विश्रान्तिमलभमानाः, सुषुप्तौ सता सम्पन्नाः, सुखमास्वादयन्तो दृश्यन्ते, 'सुखमहमस्वाप्सम्' इत्यादि परामर्शात्। अत एव वैषयिकक्षुल्लसौख्यदुर्वासनादूषितान्तःकरणानामद्वैतकथाप्रवचनमेव नोचितमिति व्यामोहमूलकमेव; वैषयिकसुखवासनामसृणितमानसानामनाघ्रातनिष्प्रपञ्चब्रह्मानुसन्धानसौख्यानामपि तादृशप्रवचनस्य सर्वथाप्रीतिकरत्वदर्शनात्। नहि चौर्येऽपि चौर्यनिन्दाचौर्यप्रशंसा वा न रोचते। सुषुप्तौ चावृतापि निष्प्रपञ्चब्रह्मात्मकता न केवलं प्राकृतानामपि तु स्वेष्टसालोक्यसामीप्यसारूप्यसायुज्यादिचतुर्विधपरमपुरुषार्थोपगतानाम्भक्तप्रवराणामप्यभिमता। तत एव च प्रेमास्पदमवाप्यापि स्वापत्यमिच्छन्ति जनाः, तदलाभे चोपचारमाचरन्ति। लोकोत्तरैश्वर्यशालिनो ब्रह्मादयोऽपि सततं स्वाधिकारपरिपालनोद्यता न तत्र विश्रान्तिमवाप्य तत्सौख्योपभोगादिनोद्विग्नास्तत्पदमनादृत्यैव निष्प्रपञ्चसत्सम्पत्तिरूपां सुषुप्तिं वाञ्छन्ति। तत एव गम्यते न विषयरजन्यां कुत्रापि सुखालोकावकाशः। यदा चावृतनिष्प्रपञ्चसत्सम्पत्तिरेवं समस्तप्राणिनिवहवाञ्छाविषयस्तदा कैव कथानावृतनिःशेषप्रपञ्चानुपद्रुतसच्चिदानन्दात्मिकाया मुक्तेः सर्वप्रेक्षावत्प्रेप्साविषयत्वे!

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ननु श्रीमद्भागवतादौ—

न किञ्चित्साधवो धीरा भक्ता ह्येकान्तिनो मम ।
वाञ्छन्त्यपि मया दत्तं कैवल्यमपुनर्भवम् ।।

इत्यादिभिर्वचनैर्भक्तप्रवराणां कैवल्यस्याप्यनपेक्ष्यत्वमुक्तं का कथा सौषुप्तसुखाभिलाषस्येति चेन्न, श्रुत्यनुभवोभयविरोधात् । श्रुतिश्च सूत्रानुबद्धशकुनीनां दिशो दिशं परिभ्रम्य विश्रामाय पुनरपि बन्धनोपश्रयणमिव जाग्रदादावितस्ततो विभ्रम्य स्वास्थ्यमनासादयतां जीवानां सुषुप्तौ सदाश्रयणं सुखलाभञ्च श्रावयति ।

तदुक्तम्—

शकुनिः सूत्रबद्धः सन्दिक्षु व्यापृत्य विभ्रमम् ।
अलब्ध्वा बन्धनस्थानं हस्तस्तम्भाद्युपाश्रयेत् ।।
जीवोपाधिमनस्तद्वद्धर्माधर्मफलाप्तये ।
स्वप्ने जाग्रति च भ्रान्त्वा क्षीणे कर्मणि लीयते ।।
श्येनो वेगेन नीडैकलम्पटः शयितुं व्रजेत् ।
जीवः सुप्त्यै तथा धावेद् ब्रह्मानन्दैकलम्पटः ।।

स्वापं विना जागरादुद्वेगः सर्वजनीनानुभवविषयः। उक्तवचनस्य तु स्वाभाविकस्वमहिमस्थितनिर्विकारस्वरूपालोचनेन तस्मिन्नेव प्रकल्पितयोराविद्यकयोर्बन्धतन्निवृत्त्योरनपेक्षत्वे तात्पर्यम् ।

तदुक्तं ब्रह्मस्तुतौ तत्रैव—

स्वजनसुतात्मदारधनधरासुरथैस्त्वयि सति किं नृणां श्रयत आत्मनि सर्वरसे ।
इति सदजानतां मिथुनतो रतये चरतां सुखयति को न्विह स्वविहते निरस्तभगे ।।
दुःखगमात्मतत्त्वनिगमाय तवात्ततनोश्चरितमहामृताब्धिपरिवर्तपरिश्रमणाः ।
न परिलषन्ति केचिदपवर्गमपीश्वर ते चरणसरोजहंसकुलसङ्गविसृष्टगृहाः ।।

एवञ्चाविद्यानिवृत्तिरूपाया मुक्तेरात्मातिरिक्तत्वपक्ष एवोक्तकथनावसरः । यदा तु समुत्खातनिखिलानर्थानावृतनिरतिशयानन्दरूपाया मुक्तेर्ब्रह्मात्मत्वमेव तदा त्वनावृतो भगवान्
 मुक्तिरित्येव पर्यवस्यतीति कथं भगवदेकान्तिनां भक्तानां भगवद्रूपाया मुक्तेरनपेक्षत्वम् । मुक्तेर्ब्रह्मात्मत्वं बन्धनिवृत्तिरूपायास्तस्या अधिष्ठानमात्रत्वात् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नन्वविद्यादिबन्धनिवृत्तेरधिष्ठानमात्रत्वेनात्माभिन्नायाः प्रागपि सत्त्वात्कथं ज्ञानसाध्यत्वं ज्ञातताविशिष्टाधिष्ठानस्य तत्त्वे विशेषणानित्यत्वेन तस्याप्यनित्यत्वापत्तिर्दुर्वारेति चेन्न, ज्ञातत्वोपलक्षितानावृताधिष्ठानस्य तत्त्वे आसन्नकालोपलक्षिताया वृष्टेः कारीरीफलभूताया इव मुक्तेः साध्यत्वे बाधाभावात् । यद्वा यस्मिन्सत्यग्रिमक्षणे यत्सत्त्वं यदभावे चाभावस्तस्यैव तत्साध्यत्वनियमेन ज्ञाने सत्यग्रिमक्षणेऽज्ञाननिवृत्तिसत्त्वं तदभावे चाज्ञाननिवृत्त्यभाव इत्यभ्युपगमे न कोऽपि दोषः । आत्मनोऽज्ञानाभावत्वेऽज्ञानस्यापि तदभावरूपत्वाद् व्यावहारिकतथाविधान्वयव्यतिरेकोभयविधव्याप्त्यङ्गीकारेऽप्यन्तस्थले पारमार्थिकरूपस्य सर्वदानुगतरूपेणात्मनोऽनुसीवनेऽनुपपत्त्यभावात् । अत एव 'नमः कैवल्यनाथाय निर्वाणसुखसंविदे' 'कैवल्ये स्थित आत्मनि' 'मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः' इत्यादौ परमात्मन एव कैवल्यनिर्वाणसुखादिरूपत्वमुपदर्शितम् । मुक्तिप्राप्तिर्भगवदवाप्तिश्चैकरूपैव । अत एव ज्ञानात्कैवल्यं ज्ञानान्मुक्तिरिति यथा श्रूयते तथैव 'ब्रह्मविदाप्नोति पर'मित्यादौ परब्रह्मावाप्तिरेव ब्रह्मवित्तिफलत्वेन श्रूयते । असङ्गस्य व्यापकस्य सदा प्राप्तस्य वियतः प्राप्तिर्न ग्रामादिप्राप्तिरिव कर्मनिर्वर्त्या, किन्तु विस्मृतग्रैवेयकस्येव प्रतिपत्तिरेव प्राप्तिस्तथैव नित्यप्राप्तस्यैवानवबोधात्प्रेप्सितस्य प्रतिपत्तिरेव प्राप्तिः । अत एवान्यथारूपहानिपूर्वकस्वरूपलाभरूपमुक्तिनिर्वचनमुपरिष्टादुपन्यस्तम् । प्रतिपादिता प्रतिपत्तिरपि स्वप्रकाशस्यावरणभङ्गरूपैव । आवरणञ्चास्वप्रकाशेऽनात्मनि घटादावालोकाभावेनैव प्रमाणापरिष्वङ्गदशायामसत्त्वाभानोभयापादकं प्रमाणेन स्वनिरासाय यथालोकसापेक्षं न तथा प्रयोजनाभावेन स्वयमेव देदीप्यमाने प्रदीपे स्वापहारायालोकान्तरसापेक्षम् । एवमेव चिदात्मनि नित्यस्वप्रकाशेऽसत्त्वाभानोपचये यथाकथञ्चित्सम्भवदप्यनाद्यविद्याप्रसूतमावरणं न स्वापसरणाय प्रकाशान्तरापेक्षम् । अत एवोक्तम्—

'फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवारितम्' ।
'ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यते' इति ।

'यन्मनसा न मनुते' 'मनसैवानु द्रष्टव्यः' इत्यादिश्रुत्योरविरोधो वृत्तिव्याप्यत्वाङ्गीकारेण फलव्याप्यत्वप्रतिषेधप्रतिपादनात् ।' तथा चानावृतनिष्प्रपञ्चनित्यस्वप्रकाशप्रत्यक्चैतन्याभिन्नपरमानन्दः पूर्णपरमात्मैव भगवत्प्राप्तिः कैवल्यमुक्तिश्च । इत्थञ्च कैवल्यानपेक्षा भगवत्प्राप्त्यनपेक्षा भगवदनपेक्षा चैकरूपैव । न च भक्तप्रवराणां भगवत्तत्प्राप्त्यनपेक्षा युज्यते संभवति वा । यदि चेमेऽपेक्ष्येते एव तर्हि तदनतिरिक्तायाः कैवल्यमुक्तेः कथायाः कुतः पलायनमनादरो वा केनापि सम्भाव्येत । २५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

ननु ब्रह्मसाक्षात्कार आत्महानिः, (Brahma-realisation is self-annihilation) कथं प्रेक्षावत्प्रेप्साविषय इति चेन्न, अहमर्थनाशेऽपि नात्मनाशः सुषुप्तौ तन्नाशेऽपि चिदात्मज्योतिषस्तत्रानुवृत्तत्वात् । अपि च देहाद्यनात्मतादात्म्याभिनिवेशवतां देहादिनाशोऽप्यात्मनाश इति परिकल्पनं न तथापि सुषुप्तिपरिहारेच्छा । तथैव मिथ्याहमर्थतादात्म्याभिनिवेशवतामेव तन्नाशेनात्मनाशव्यामोहः, न तु वस्तुत आत्मनाशः । अहमादिप्रपञ्चानुपप्लुतनिष्प्रपञ्चनिरुपमसत्संविदानन्दरसपिपासूनान्तु नाहमर्थादिबाधादधिकं सुखं क्वापि । तस्मान्मोहमूलकमेवाहमर्थादिबाधसम्भावनया प्रत्यक्चैतन्यानन्दघनपरमात्मस्वरूपावस्थानलक्षणात्मरूपकैवल्यकथायाः पलायनम् । तदुक्तम्—

अस्पर्शयोगो नामैष दुर्दर्शः सर्वयोगिनाम् ।
योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः ॥

यच्च भक्तप्रवराणां कैवल्यानपेक्षत्वं स्मर्यते तस्यायमाशयः—बन्धनिवृत्त्युपलक्षितस्य भगवतः स्वात्मत्वमेव सम्पन्नम्, तच्च नित्यमाप्तमेवेति तदतिरिक्तस्य कस्यापेक्षा स्यात्, नह्यनावृतस्वात्मनः प्रेप्साविषयत्वमुपपद्यत इत्येतादृशविचारप्रवृत्तानां पुरुषधौरेयाणां 'तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्' इतिसूत्रोक्तपरवैराग्येऽनास्था । यद्वा लोके यथा धर्मकामशेषभूतस्याप्यर्थस्यार्थलोलुपानां वित्तसंरक्षणार्थं न केवलं धर्मकामपरित्यागेन परन्तु प्राणपणेनापि प्रवृत्तिः अर्थस्य धर्मकामादिसाधनत्वेन साध्यापेक्षयापि साधने आदरातिशयप्रदर्शनञ्च तथैव । 'भक्त्या मामभिजानाति' इति भगवद्वचनस्मरणमनुसृत्य भक्तैर्भगवत्साक्षात्कार-मोक्ष-भगवत्प्राप्तिसाधनत्वेऽपि साध्यापेक्षया साधनभूतायां श्रीहरेरनुरक्तौ प्रेमातिशयो युज्यत एव । अन्यत्र कार्पण्यस्य निन्दितत्वेऽपि भगवत्सम्बन्धेन तस्यापि प्रशस्यत्वमेव ।

ननु अनावृतस्वप्रकाशप्रज्ञानानन्दघनस्य मुक्तिरूपत्वेऽपि कथं प्रत्यक्चैतन्याभिन्नत्वं तस्येति चेन्न, प्रत्यक्चैतन्याभिन्नत्वाभावेऽवेद्यत्वे सत्यपरोक्षत्वलक्षणस्य स्वप्रकाशत्वस्यैव तत्रासम्भवदुक्तिकत्वात् । ब्रह्मणश्च 'यत् साक्षादपरोक्षाद् ब्रह्म' इतिश्रुत्या वृत्त्यादिव्यवधानमन्तरेणापरोक्षत्वमुक्तम्, तत्र यदि ब्रह्मणः साक्षादपरोक्षत्वं स्यात्तदा तस्य परोक्षत्वानुभूतिर्बाधिता स्याद् इति प्रत्यग्रूपेणैव तस्य स्वतोऽपरोक्षत्वमभ्युपगन्तव्यम्, प्रमात्रादिभासकस्य तस्यापरोक्षत्वे कस्याप्यविप्रतिपत्तेः, किन्तु प्रमाणगर्भे तस्यापि परोक्षापरोक्षत्वव्यवस्था वरीवर्त्त्येव । तत एव यथा रूपावभासनाय प्रवृत्तं चक्षुस्तदवभासकमालोकं गृहीत्वैव रूपमव-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भासयितुं पारयति तथैव घटाद्यनात्मप्रकाशनाय प्रवृत्तानि प्रमाणानि चिदात्मानमादायैव घटादिकं प्रकाशयन्ति। यत्र असत्त्वापादकमात्रावरणभङ्गपर्य्यवसायी प्रकाशस्तत्र परोक्षत्वम्, यत्र चासत्त्वाभानोभयापादकावरणभङ्गानुविधायी प्रकाशस्तत्रापरोक्षत्वम्। न च प्रतीचोऽपि प्रत्यक्त्वमभ्युपगम्यते तस्येति वाच्यम्, यत्रैव प्रत्यक्त्वकल्पना विश्राम्यति तस्यैव प्रत्यक्त्वाभ्युपगमेन तदनुपपत्तेः। ब्रह्मणश्च प्रत्यक्चैतन्याभिन्नत्वाभ्युपगतावेव प्रत्यक्त्वम्, नित्यापरोक्षत्वम्, सर्वान्तरतमत्वेन निरतिशयनिरुपाधिकप्रेमास्पदत्वञ्चोपपद्यन्ते। अन्यथा पराक्त्वेनाऽनात्मत्वपरोक्षत्वबहिरङ्गत्वादिभिः सातिशयसोपाधिकप्रेमास्पदत्वमनिवार्य्यमेव तस्य स्यात्। प्रत्यगात्मनश्च ब्रह्माभिन्नत्वेन सद्वितीयत्वकर्तृत्वाद्यनेकोपद्रवराहित्यमपि सिद्ध्यति। एतत्सर्वं महावाक्यानुसारमेव न नवीनकल्पनाप्रत्युपस्थापितं किमपि। तथापि नानावादिव्रातविरुद्धविचारसमीरणेन दोधूयमानः श्रुतिमौलिमहावाक्यपद्मनिकरः श्रुत्युपष्टब्धसूत्रावनद्धो यथावस्थस्थितोऽपि प्रौढविचारनिगडनिबद्ध एव स्वतात्पर्यमुपस्थापयति।

अपि च निरतिशयनिरुपाधिकप्रेमास्पदत्वं प्रत्यक्चैतन्याभिन्नस्यैव परमात्मन उपपद्यते। यत्र प्रतीचि मुख्याभेदस्तत्रैव मुख्या प्रीतिः, यत्र देहादौ मिथ्याभेदस्तत्र प्रीतिरपि मिथ्यैव। यत्र पुत्रादौ गौणोऽभेदस्तत्र प्रीतिरपि गौणी। यत्र शत्रुव्याघ्रादौ कथमप्यभेदो नाऽस्ति तत्र कथमपि प्रीतिर्न भवति प्रत्युत भेदस्य प्राचुर्य्येण प्राखर्येण वा तत्र द्वेषः। एवमभेदतारतम्येन प्रीतितारतम्यमित्यभेदस्यैव प्रीतिप्रयोजकत्वं सिद्ध्यति। सेवापि स्वात्मनि नित्या स्वात्मसम्बन्धिनि कादाचित्कत्वादनित्या, स्वात्मासम्बन्धिनि कदाचिदपि न भवति। सेवाफलस्यापि स्वस्मिन्नेव पर्यवसानात् तस्याप्यभेद एव सामञ्जस्यात्। तदुक्तम्—'तथा च सर्वद्वयोच्छेदोपलक्षितपरमानन्दरूपात्मरूपकैवल्यप्राप्तिस्तत्त्वज्ञानोत्तरमेव।'

यदप्युच्यते यत्सुखावाप्तिः प्रेप्सितप्राप्तव्यभेदसापेक्षा प्राप्तृप्राप्तभेदसापेक्षा चेति कथमात्मन एव प्राप्तव्यत्वे सुखलाभः, तदप्यविचारितरमणीयमेव। केवलं गृहात्, पुत्रात्, परिजनादर्थाद्वा न सुखमपि तु स्वगृहात्, स्वपुत्रात्, स्वपरिजनात्, स्वार्थाच्च सुखमिति यत्र यत्र सुखं तत्र सर्वत्राप्यात्मसम्बन्धात्तथेति पर्यवस्यति। आत्मसम्बन्धादपि सुखं गौणमेव। वस्तुतस्त्वात्मैवातिरोहितस्वरूपो वास्तविकं पारमार्थिकञ्च सुखम्। नित्यनिरतिशयानन्दरूपस्वस्वरूपाज्ञानादेव सुखवियोगस्तत्प्रेप्सा च। सच्चिदानन्दस्वरूप आत्मा, तत्र सदंशावरणमसत्त्वमापादयति, चिदंशावरणमभानमापादयति, आनन्दांशावरणं सुखाभावमुपजनयति। २७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत एव चात्मनोऽन्यत्र देहादावात्मतादात्म्याध्यासादनात्मन्यासक्तानां सुखासादनप्रयासः। स्वरूपांशत्रयस्यापि कृते आवरणांशत्रयाभ्युपगमः। नैतावताऽऽवरणत्रैविध्यं कल्पनीयम्। नहि अंशबाहुल्यमंशिभेदं साधयति। ज्ञानविषयाकाराकारितमनःपरिणामभूतया वृत्त्या आवरणभङ्गे जननीये न नियमेनावरणसर्वांशापहारो भवति, किन्तु कदाचिदेकांशापसरणं कदाचिदंशद्वयापसरणं कदाचित्पूर्णावरणापसरणम्। परोक्षज्ञानेऽसत्त्वापादकैकांशापसरणमपरोक्षज्ञानेंऽशद्वयस्याप्यसत्त्वाभानापादकस्य सहैवापसरणम्, ब्रह्मसाक्षात्काररूपापरोक्षानुभूतौ तु सर्वात्मनाऽऽवरणापहारः। तत्रापि रिक्तलशुनभाण्डगन्धवदविद्यासंस्कारः प्रचलत्येव किञ्चित्कालं जीवन्मुक्तिदशायाम्। नन्वंशानामंशिरूपत्वेनांशिभङ्गे कथमेकतमांशस्यांशद्वयस्य वापसरणमपरस्य चावशेष इति चेन्न, यथा वह्निधर्मस्यांशद्वयमौष्ण्यं प्रकाशश्च, तयोरेकतरांश औष्ण्यमेव तप्ते वारिणि संक्रामति नापरांशः प्रकाशः। यद्वा, उष्णप्रकाशात्मकस्य दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता; नैतावता अंशांशिभावे कोऽपि व्याघातस्तथैव आवरणभङ्गेऽपि नोपर्युक्तांशांशिभावव्याघातशङ्कोन्नेया। तदुक्तम्—

मैवमुष्णप्रकाशात्मा दीपस्तस्य प्रभा गृहे।
व्याप्नोति नोष्णता तद्वच्चितेरेवानुवर्तनम्॥

एवञ्च ब्रह्मसाक्षात्कारेण आवरणसर्वांशापहारेऽनावृतानतिशयानन्दप्रत्यक्चैतन्याभिन्नो जीवभावमपहाय स्वपारमार्थिकरूपपरब्रह्मस्वरूपापन्नः परमपुरुषार्थभाग् भवतीति सर्वथाप्रतिहतोऽद्वैतवेदान्तडिण्डिमरवः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

बौद्धदर्शनम् ।

आचार्यनरेन्द्रदेवः ।

यावन्ति भारतीयदर्शनानि सन्ति, तेषां मोक्षावाप्तिरेवोद्देश्या । अनेनार्थेन सर्वाणि दर्शनानि मोक्षशास्त्रशब्देन व्यपदिष्टानि सन्ति । विज्ञानभिक्षुणा सांख्यप्रवचनभाष्यभूमिकायामलेखि यन्मोक्षशास्त्रं चिकित्साशास्त्रमिव चतुर्व्यूहं वर्तते । यथा रोगः, आरोग्यम्, रोगनिदानम्, औषधञ्चेति व्यूह-(समूह)चतुष्टयं चिकित्साशास्त्रप्रतिपाद्यं विद्यते तथैव हेयम्, हानम्, हेयहेतुः, हानोपायश्चेति चतुष्टयं मोक्षशास्त्रप्रतिपाद्यम् । त्रिविधं दुःखं हेयम्, तस्यात्यन्तिकी निवृत्तिर्हानम्, अविद्या हेयहेतुः, तत्त्वज्ञानञ्च हानोपायो वर्तते । एतदेव व्यूहचतुष्टयं पातञ्जलयोगसूत्रेषूपलभ्यते । किन्तु न्यायशास्त्रे हेयहेतुरपि हेयान्तर्भूत एवाङ्गीकृतः, हानं तत्त्वज्ञानम्, हानोपायश्च शास्त्रमुररीकृतम् । न्यायशास्त्रे हेयादिचतुष्कम् 'अर्थपद' पदेन प्रत्यपादि । वाचस्पतिमिश्रप्रणीततात्पर्यटीकानुसारं पुरुषार्थस्थानमर्थपदपदार्थो वर्तते । वार्त्तिककारेणाभ्यधायि यन्निखिलाध्यात्मविद्यासु सर्वेऽप्याचार्या इदमर्थपदचतुष्टयं वर्णयाञ्चक्रुः । न्यायपरिभाषायामिदमर्थपदचतुष्टयमेवंविधं वर्तते—हेयं दुःखम्, तदुत्पादकं हेयहेतुरित्युभयमेकम्, दुःखात्यन्तिकनिवृत्तिरूपहानात्मकमोक्षहेतुस्तत्त्वज्ञानं द्वितीयम्, शास्त्ररूपस्तदुपायस्तृतीयम्, तदुपेयमोक्षश्चतुर्थम् । तदेतदुक्तं प्रथमाध्यायप्रथमपादप्रथमन्याय-सूत्रभाष्ये । एवमेव बौद्धदर्शनस्य चतुःसूत्री वर्तते । इदमार्यसत्यचतुष्टयं वर्तते—दुःखम्, दुःखहेतुः, दुःखनिरोधः, दुःखनिरोधगामिनी प्रतिपत्तिः (मार्गः) ।

सांख्यदर्शनानुसारं प्रकृतिपुरुषसंयोगेन योऽविवेक उत्पद्यते स दुःखहेतुः, विवेकख्यातिपदव्यपदेश्यं तत्त्वज्ञानञ्च दुःखहानहेतुर्वर्तते । यतोऽस्मिन् शास्त्रे संख्यायाः सम्यग्विवेकेनात्मवर्णनमतस्तत्सांख्यमित्युच्यते । न्यायशास्त्रानुसारं दुःखापायेनार्थादासन्नविमुक्त्या निःश्रेयसं सिध्यति, तत्रोपात्तजन्मत्यागो जन्मान्तरानुपादानञ्च भवति । इयमपर्यन्तावस्थाऽपवर्ग उच्यते । प्रमाणादिषोडशपदार्थानां तत्त्वज्ञानं मोक्षकारणमुक्तम् । २९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तेषु पदार्थेषु प्रमेयपदार्थतत्त्वज्ञानमेव साक्षान्मोक्षकारणम्, शिष्टपञ्चदशपदार्थतत्त्वज्ञानन्तु प्रमेयपदार्थतत्त्वज्ञानस्य सम्पादकं रक्षकञ्च भवति। तत्तत्त्वज्ञानं पारम्पर्येण मोक्षमधिगमयति, यतः संसारबीजं मिथ्याज्ञानमुच्छिद्यैव तत्त्वज्ञानं मोक्षमनुभावयति। अनात्मन्यात्मग्रहो मिथ्याज्ञानम्, 'अहमस्मि' इत्येतादृशो मोहः, देहेन्द्रियादिष्वनात्मस्वात्मदृष्टिश्चाहङ्कार उच्यते। शरीरेन्द्रियमनोवेदनाबुद्ध्यात्मकं पदार्थजातमहङ्कारविषयः। जीवः शरीरेन्द्रियादिपदार्थजातमात्मत्वेनाध्यस्य तदुच्छेदमात्मोच्छेदं मन्यते। स शरीरादीनां चिरस्थितये व्याकुलो भवति। मुहुर्मुहुस्तान् गृह्णाति, गृहीत्वा जन्ममरणनिमित्तं यतमानश्च तिष्ठति।

किन्तु यो दुःखम्, दुःखायतनम्, दुःखानुषक्तं सुखञ्च सर्वमिदं दुःखमित्येवं दुःखत्वेनाध्यवस्यति; स दुःखं परीक्षते, परीक्षितञ्च दुःखं निरस्यति। एवमसौ दोषांस्तन्मूलककर्माणि च दुःखहेतुतया पश्यति निरस्यति च। दोषेषु प्रहीणेषु पुनर्जन्मप्रवृत्तिर्निवर्तते। इत्थं प्रमेयपदार्थांश्चतुर्धा विभज्य तदभ्यासेन सम्यग्दर्शनपदव्यपदेश्यं तत्त्वज्ञानमुत्पद्यते।

वैशेषिकदर्शनानुसारं पदार्थानां तत्त्वज्ञानान्निःश्रेयसं सिध्यति। प्रथमाध्यायप्रथमपादचतुर्थवैशेषिकसूत्रानुसारं तत्तत्त्वज्ञानं द्रव्यादिपदार्थानां साधर्म्यवैधर्म्याभ्यामुत्पद्यते। साधर्म्यं नाम समानो धर्मः, वैधर्म्यं नाम विरुद्धो धर्मः। तथा च पदार्थानां सामान्यविशेषलक्षणयोः (अनुगतधर्मव्यावृत्तधर्मयोः) ज्ञानात्तत्त्वज्ञानमिति निर्गलति।

सर्वेषु मोक्षशास्त्रेषु योगाभ्यासस्तत्त्वसाक्षात्कारकारणतयोक्तः। न्यायदर्शने 'समाधिविशेषाभ्यासात्' इति चतुर्थाध्यायद्वितीयपादाष्टत्रिंशसूत्रेण योगाभ्यासात्तत्त्वज्ञानोत्पत्तिरभिहिता। 'तदर्थं यमनियमाभ्यासात्मसंस्कारो योगाच्चाध्यात्मविध्युपायैः' इति चतुर्थाध्यायप्रथमपादषट्चत्वारिंशन्न्यायसूत्रेण यमनियमाभ्यां योगशास्त्रोक्ताध्यात्मविधिभिरुपायसमूहेन च तदर्थमात्मसंस्कार उक्तः। योगाभ्यासजनितधर्मो जन्मान्तरेऽप्यनुवर्तते। तत्त्वज्ञानार्थमसौ धर्मो वृद्धेः परां काष्ठामापद्यते (प्रचयकाष्ठागतो भवति)। तत्साहाय्येन कुत्रापि जन्मनि समाधिप्रयत्नः प्रकृष्यते च। तदा समाधिविशेष उत्पद्यते, ततश्च तत्त्वज्ञानम्। वैशेषिकदर्शने योगिनामात्मप्रत्यक्षम्, आत्मकर्मभिर्मोक्षश्च भवतीति षष्ठाध्यायद्वितीयपादषोडशसूत्रेणासूत्रि, तदेव न्यायदर्शनोक्त आत्मसंस्कारः। श्रवणमननयोगाभ्यासनिदिध्यासनासनप्राणायामशमदमा आत्मकर्माणीति वैशेषिकदर्शनोपस्कार उक्तम्। योगस्तु योगशास्त्रप्रतिपाद्यो विषयः। वैशेषिकशास्त्रे संकेतमात्रमकारि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यत्तन्त्रान्तरेणात्मकर्मणामेषां प्रतिपत्तिर्भवति। वेदान्तेऽप्यभाषि यत्सूक्ष्मदर्शी योगी प्रज्ञानद्वारा आत्मानं साक्षात्कुरुते।

एवमेव बौद्धधर्मेऽपि तत्त्वज्ञानाय योगस्योपयोग उदीरितः। बौद्धा यद्यपीश्वरस्यात्मनश्च नास्तित्वमङ्गीकुर्वन्ति, तथापि दुःखात्यन्तनिवृत्तिर्निर्वाणपदप्राप्तिश्चेत्युभयमेव तेषामप्युद्देश्यम्। गन्तव्यपदगमनमार्गोऽपि प्रायस्तुल्य एव। योगोपायः सर्वैरैकरूप्येणाङ्गीकृतः।

बौद्धागमानुसारं स धर्मो यः स्वलक्षणं धत्ते पुष्पवदवकीर्यते च। धर्मः सास्रवोऽनास्रवश्च वर्तते। अतो बौद्धा अनास्रवसास्रवरूपाभ्यां धर्मान् प्रविचिन्वते विभजन्ते च। सैव प्रक्रिया धमप्रविचयपदेन प्रतिपाद्यते। धर्मप्रविचयादृते न कोऽपि क्लेशशान्तिप्रतीकारः। क्लेशैरेव लोका भवाम्भोनिधावस्मिन् बम्भ्रम्यन्ते। धर्मप्रविचयः प्रज्ञया भवति। यथा पदार्थानां तत्त्वज्ञानान्निःश्रेयसं सिद्ध्यति तथैव सर्वधर्मेष्वग्रनिर्वाणप्राप्तिर्धर्मप्रविचयात्। अयमेव परमज्ञानपदार्थः। यद्यपि भगवतो बुद्धस्य शिक्षा सूत्रान्तेषु विकीर्णरूपोपलभ्यते तथाप्यभिधर्मशास्त्र एकपद्धतिरूपेणोपनिबद्धा वर्तते। धर्माणां स्वलक्षण-सामान्यलक्षणाभिमुख्यादेव तदभिधर्ममित्यभिधीयते।

कीदृशोऽसौ धर्मो यत्प्रविचयोऽभिधर्मशास्त्रेणोपदिष्टः? धर्मः सास्रवोऽनास्रवश्चास्ति। द्वितीयोऽप्येको विभागः—संस्कृतोऽसंस्कृतश्चेति। निर्वाणन्तदन्यद्धर्मद्वयञ्चासंस्कृतम्, धर्मान्तरन्तु संस्कृतम्; तत्सास्रवमनास्रवं वा वर्तते। आर्यमार्गं वर्जयित्वाऽन्ये संस्कृतधर्माः सास्रवा उक्ताः। यतस्तत्र मलं प्रतिष्ठां पुष्टिं वा लभते। स संस्कृतधर्मो यः प्रत्ययैरन्योक्तसमागमेन द्वितीयमेकमपेक्ष्य कृतः। तस्मात्संस्कृतः सहेतुकः। सास्रवसंस्कृतधर्म उपादानस्कन्धशब्देनोच्यते, क्लेशानामुपादानपदप्रतिपाद्यतया तत्सम्भूतत्वात्तद्विधेयत्वाद्वा। सास्रवसंस्कृतधर्मो दुःख–समुदय–लोक–दृष्टिस्थान–भवपदैरप्यभिधीयते। 'दुःख' शब्देन लोकानुभूतदुःखवेदनामात्रं नाभिधीयते, अपि तूपादानस्कन्धः। 'तेन दुःखेन जन्मनात्यन्तं विमुक्तिरपवर्गः' इत्यस्मिन् प्रथमाध्यायप्रथमपादद्वाविंशसूत्रस्थन्याय–(वात्स्यायन) भाष्यवाक्ये तद्दुःखं जन्मपदेनाभ्यधायि। 'दुःखशब्देन सर्वे शरीरादय उच्यन्ते' इति वाचस्पतिमिश्रोऽपि स्वटीकायामवोचत्। तन्मुख्यं दुःखमिति न भ्रमितव्यमित्यपि पुनरसौ तत्रालेखीत्। तथैव जयन्तोऽपि न्यायमञ्जर्यां सप्ताधिकपञ्चशततमे पृष्ठे 'न च मुख्यमेव दुःखमवमृश्यते किन्तु तत्साधनं तदनुषक्तं सर्वमेव' इत्युक्तवान्। इत्थमेवाभिधर्मकोशे षष्ठस्थानतृतीयकारिकायां प्रतिपादितं यत् पञ्चोपादानस्कन्धाः (रूपादिस्कन्धपञ्चकम्) दुःखमुच्यते। वेदनैकदेशोऽपि दुःखस्वभावो नास्ति। त्रिदुःखतया सर्वेऽपि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सास्रवसंस्कृतधर्मा अविशेषतो दुःखात्मकाः। विपरिणामदुःखतया 'मनापस्या'पि दुःखरूपता। दुःखहेतुतया सास्रवसंस्कृतधर्मः समुदयशब्देन, विनाशप्रवृत्ततया लोकशब्देन, पञ्चदृष्टीनामवस्थानप्रतिष्ठानास्पदतया दृष्टिस्थानशब्देन, अस्तितया भवशब्देन चोच्यते।

उपर्युक्तं यद् रूपादिस्कन्धपञ्चकं संस्कृतधर्मः। स्कन्धपदार्थो राशिः। स्कन्धेष्वसंस्कृतधर्मः संगृहीतो नास्ति। रूप–वेदना–संज्ञा-संस्कार–विज्ञानानि पञ्चस्कन्धाः सन्ति। रूपस्कन्धे पञ्चेन्द्रियाणि, पञ्चार्था (तद्विषयाः) अविज्ञप्तिश्च संगृहीता। चक्षुः–श्रोत्र–घ्राण–रसना-कायानि पञ्चेन्द्रियाणि। रूप–शब्द–गन्ध–रस–स्प्रष्टव्या यथाक्रमं पञ्चेन्द्रियार्थाः। चक्षुरादीनीन्द्रियाण्येषामर्थानां विज्ञानाश्रयाः सन्ति। विज्ञप्ति-समाधिसम्भूता कुशलाकुशलात्मिकाऽविज्ञप्तिः। यद्यप्ययमनुबन्धः कायविज्ञप्ति-वाग्विज्ञप्तिवद् रूपस्वभावः क्रियास्वभावश्च वर्तते तथापि विज्ञप्तिरिव नान्यं किमपि विज्ञापयति, तस्मादविज्ञप्तिरित्युच्यते। इयं रूपस्कन्धे गण्यते।

सौत्रान्तिका आहुः—अविज्ञप्तिर्द्रव्यात्मा नास्ति, तदनुसारमसौ रूपं नास्ति। वैभाषिका आहुः—यद्यविज्ञप्तिर्नास्ति तर्हि यः स्वयं कर्म न कुरुते किन्त्वन्यमाज्ञापयति स कर्मपथात् समन्वागन्तुं (प्रत्यावर्तितुं) न शक्नुयादिति। सौत्रान्तिका अविज्ञप्तिमनङ्गीकृत्य सन्ततिपरिणामविशेषमङ्गीकुर्वन्ति। तदनुसारं यदा वधनियुक्तः पुरुषो वधमाचरति तदाऽयं न्यायो वर्तते यत् प्रयोक्तुश्चित्तसन्ततावेकः सूक्ष्मपरिणामविशेष उत्पद्यते, यत्प्रभावेणासौ सन्ततिरायतौ फलमभिनिष्पादयिष्यति। असौ परिणामो यदि कायक्रियाफलभावं भजते तर्हि कायिक इत्युच्यते, यदि वाक्क्रियाफलभावं तदा वाचिक इति।

सुखम्, दुःखम्, अदुःखसुखञ्चेति त्रिविधा अनुभूतयो वेदनास्कन्धः। निमित्तोद्ग्रहणं संज्ञापदार्थः। नीलत्व-पीतत्व–दीर्घत्व–ह्रस्वत्व–पुरुषत्व–स्त्रीत्वादिविविधस्वभावानामुद्ग्रहणं संज्ञास्कन्धः। अन्यस्कन्धचतुष्टयाद्भिन्नः संस्कारस्कन्धः। सर्वोऽपि संस्कृतधर्मः संस्कारपदेनोच्यते, किन्तु संस्कारस्कन्धस्तेषामेव संस्कृतानां कृते प्रयुज्यते येऽन्यस्कन्धचतुष्टये न संगृहीताः सन्ति। सत्यमिदं यत् सूत्र उक्तम् 'संस्कारस्कन्धः षट्चेतनाकायाः'। एतल्लक्षणानुसारं संस्कारस्कन्धे सर्वेषां विप्रयुक्तसंस्काराणां चेतनावर्जितसम्प्रयुक्तसंस्काराणाञ्चा-

संग्रह आपद्यते। किन्त्वभिसंस्करणे चेतनायाः प्राधान्येनेदृशः सूत्रनिर्देशः। चेतना कर्मस्वभावा, लक्षणतोऽसौ सहेतुर्यो जन्माभिसंस्करोति। अन्यथा सूत्राक्षरस्वारस्यादरे चेतनाव्यति-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रिक्तचैतसिक-(सम्प्रयुक्त) धर्माणामखिलचित्तविप्रयुक्तधर्माणाञ्च कुत्रापि स्कन्धे संग्रहो न स्यात्। तथा चैषां दुःखसमुदयसत्यत्वम्, परिज्ञा प्रहाणञ्च न स्यात्। किन्तु भगवद्वचनं वर्तते यद् 'यद्येकोऽपि धर्मोऽनभिज्ञातोऽपरिज्ञातः स्यात्तदा दुःखान्तः कर्तुमशक्यः' अतश्चैत्त-चित्तविप्रयुक्तकलापः संस्कारस्कन्धे संगृहीतः। प्रत्येकविषयोपलब्धिर्विज्ञानपदार्थः। षड्विज्ञानकाया विज्ञानस्कन्धः। चक्षुरादिपञ्चेन्द्रियविज्ञानानि मनोविज्ञानञ्चेति षड्विज्ञानकायाः।

देशनायास्त्रयः प्रकाराः—स्कन्धः, आयतनम्, धातुश्चेति। आयतना द्वादश धातवश्चाष्टादश वर्तन्ते। चक्षुरादीनि पञ्च, रूपादयः पञ्च, अविज्ञप्तिश्चेति रूपस्कन्धः। चक्षुरादीनि रूपादयश्च दशायतनानि दशधातवः, वेदनास्कन्ध-संज्ञास्कन्ध-संस्कारस्कन्धाः, अविज्ञप्तिः, असंस्कृतत्रयञ्चेति सप्त वस्तूनि धर्मायतनानि धर्मधातवः। विज्ञानं च मन आयतनम्। इदं षड्विज्ञानधातुमनोधातुभेदैः सप्तविधधातुरूपम्।

प्रश्नोऽयमुत्तिष्ठते यत् पञ्चेन्द्रियविज्ञानमनोविज्ञानरूपविज्ञानकायव्यतिरिक्तं मनो वा मनोधातुर्वा को भवितुमर्हति, विज्ञानव्यतिरिक्तमनोऽभावादिति चेदत्रोच्यत एषु षट्सु विज्ञानेषु यद्विज्ञानमन्तरमतीत्य तिष्ठति तन्मन इत्युच्यते। यद्यद्विज्ञानं समनन्तरमेव निरुध्यते तत्तन्मनोधातुसमाख्यां लभते। षष्ठस्य विज्ञानधातोराश्रयप्रसिद्धयेऽपि मनोधातुर्धातुश्रेण्यां गण्यते। इन्द्रियरूपाणां षण्णामाश्रयाणाम्, तदाश्रितानां षण्णां विज्ञानानां षण्णामालम्बनानां (विषयाणां) च भेदैर्धातुरष्टादशधा भिद्यते। मनस आलम्बनधर्मो धातुरित्यभिधीयते।

सर्वे संस्कृता धर्मस्कन्धसंग्रहे, सर्वे सास्रवधर्मा उपादानस्कन्धसंग्रहे, सर्वे धर्मा आयतनधातुसंग्रहे संगृहीता वर्तन्ते। चित्तचैत्तानामायविस्तारकत्वादायतनमित्युच्यते, धातुः स्वजात्याकरो वर्तते।

स्कन्धादित्रयदेशनैतदर्थं वर्तते, यतो मोहेन्द्रियरुचीनां त्रयस्त्रयः प्रकाराः सन्ति; एकश्चैत्तान् पिण्डभावेन गृहीत्वा तानेवात्मतया गृह्णाति तथैव सम्मुह्यति च। एको रूपपिण्डमात्मभावेन गृहीत्वा सम्मुह्यति। एको रूपाणि चित्तानि च पिण्डात्मना गृहीत्वा सम्मुह्यति। श्रद्धादीनीन्द्रियाणि तीक्ष्ण-मध्य-मृदुभेदैस्त्रिविधानि। रुचिरपि संक्षिप्त-मध्य-विस्तीर्ण-भेदैस्त्रिविधा। स्कन्धदेशना प्रथमप्रकारकश्रावकाणां कृते वर्तते ये चैत्तविषयेषु सम्मुह्यन्ति। एषामिन्द्रियाणि तीक्ष्णानि रुचिश्च संक्षिप्तदेशनया भवति। आयतनदेशना द्वितीयप्रकारकाणां धातुदेशना च तृतीयप्रकारकाणां श्रावकाणां कृते वर्तते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वेदना-संज्ञयोः पृथक्स्कन्धत्वे अन्याखिलचैत्तधर्माणां संस्कारसंगृहीतत्वे किं बीजमिति चेदत्रोच्यते, विवादमूलहेतुतया संसारकारणतया च पृथक्स्कन्धत्वमनयोर्व्यवतिष्ठते। कामाध्यवसायदृष्ट्यभिष्वङ्गश्च विवादमूलम्। वेदना संज्ञा च तयोर्मूलयोः प्रधानहेतुः। वेदनाऽऽस्वादवशेन कामाभिष्वङ्गो विपरीतसंज्ञावशेन दृष्ट्यभिष्वङ्गश्च जायते। वेदना-संज्ञे संसारस्यापि कारणभावम्भजेते। वेदनागृद्धो विपर्यस्तसंज्ञकश्च संसारे जन्मपरम्परां लभते।

मया सास्रवसंस्कृतधर्मा निर्दिष्टाः। मार्गसत्यास्त्रयोऽसंस्कृतधर्माश्चानास्रवाः। आकाशम्, प्रतिसंख्यानिरोधोऽप्रतिसंख्यानिरोधश्चासंस्कृताः। तदेवाकाशं यन्नावृणोति स्वयमपि रूपेण नाव्रियते च, यत्र रूपाणामप्रतिहतगतिश्च।

सौत्रान्तिका आकाशं न वस्तुसत्त्वेनाभ्युपगच्छन्ति, तदनुसारं रूपाभावमात्रगोचर आकाशमिति व्यवहारः। सास्रवधर्मेभ्यो विसंयोगः,प्रतिसंख्या निर्वाणमिति वोच्यते। प्रतिसंख्यया अनास्रवप्रज्ञया दुःखाद्यार्यसत्यज्ञानस्य च ग्रहणं भवति। अनेन प्रज्ञाविशेषेण यो निरोधः प्राप्यते स प्रतिसंख्यानिरोध उच्यते। तदन्यो यो निरोध उत्पादनमत्यन्तं विहन्ति सोऽप्रतिसंख्यानिरोध उच्यते। प्रत्ययवैकल्येनायं निरोधः प्राप्यते। यथा यदा चक्षुरिन्द्रियं मनइन्द्रियञ्चैकस्मिन् रूपे व्यासजति तदा रूपान्तरम्, शब्दः, गन्धः, रसः, स्प्रष्टव्यञ्चातीतमध्वानं प्रतिपद्यते। इदमसंस्कृतत्रयमध्वविनिर्मुक्तमस्ति। सौत्रान्तिका आहुर्यदिदं निरोधद्वयमप्यभावात्मकं वर्तते। अतो निर्वाणमद्रव्यं निःस्वभावकञ्चास्ति। सर्वास्तिवादिनो नैनमर्थमूरीकुर्वन्ति। ते कथयन्ति यदसंस्कृतद्रव्याणि सन्ति, किन्तु नित्यानि निष्क्रियाणि च। अतस्तेषामुत्पादको नास्ति कश्चन हेतुः, न चास्ति किमपि तस्य प्रयोजनम्, ते यदुत्पादयन्ति।

धर्माणामेषु विभागेष्वात्मनः पुरुषस्य वा स्थानं नास्ति, अपि तु प्रज्ञप्तिमात्रमात्मा। यथा रथनामा कश्चन स्वतन्त्रपदार्थो नास्ति, वस्तुतो रथाङ्गसमूह एवासौ। तस्यैव वाचकशब्दमात्रं तत्। तथैव आत्मा, सत्त्वं जीवश्च नामरूपमात्रं (स्कन्धपञ्चकं) वर्तते। नासौ कश्चिदविपरिणामी शाश्वतः पदार्थः। बौद्धा अनीश्वरवादिनोऽनात्मवादिनश्च सन्ति। सर्वास्तिवादिनः सस्वभाववादिनो बहुधर्मवादिनश्च वर्तन्ते। किन्तु कोऽपि शाश्वतपदार्थं न मन्यते। तेषां नये द्रव्यं सत्, किन्तु क्षणिकं वर्तते। तद् द्रव्यं चैत्तं रूपिधर्मश्चास्ति। सर्वास्तिवादे किमपि मूलकारणं न व्यवस्थितम्। सर्वास्तिवादीश्वरान्महादेवाद्वा वासुदेवाद्वा पुरुषाद्वा प्रधानादेर्वा कस्माचिदेकस्मात्कारणात् सर्वजगत्प्रवृत्तिं न मन्यते। यद्येकस्मात् कारणाद् भावा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्पद्येरंस्तर्हि युगपत्सर्वं जगदुत्पद्येत, न च तथोत्पद्यते; किन्तु क्रमेणैव, तथैवास्माकमनुभवादित्ययमदसीयस्तर्कः।

बौद्धदर्शनानि चत्वारि वर्तन्ते—सर्वास्तिवादः, सौत्रान्तिकः, विज्ञानवादः (योगाचारः) माध्यमिकः (शून्यवादः)। सर्वास्तिवादानुसारं बाह्यं जगत् प्रत्यक्षगोचरम्। सर्वास्तिवादी प्रकृतिमनसोः स्वतन्त्रसत्तामभ्युपैति। प्रकृतेः प्रत्यक्षोपलब्धिर्मनसा भवति। सौत्रान्तिका अपि बाह्यजगतः सत्तां मन्यन्ते, किन्तु तदनुसारं तत्प्रत्यक्षगोचरतां नाञ्चति। बाह्यवस्तूनि मनस्यवभासन्ते, येन वयं बाह्यवस्तुसत्तामनुमिनुमः। मतवादद्वयमिदं बहुस्वभाववादात्मकम्। विज्ञानवादानुसारं ज्ञानप्रत्यक्षविषया मनोविकल्पात्मका वर्तन्ते। अस्मिन् वादे त्रैधातुकं चित्तमात्रतया व्यवस्थापितम्। तेन बाह्यार्थाः प्रतिषिध्यन्ते। रूपाद्यर्थान् विनैव रूपादीनां विज्ञप्तिरुत्पद्यते। इदं विज्ञानमेव (चित्त–मनो–विज्ञान–विज्ञप्तीनां पर्यायता) यदर्थरूपेणावभासते। वस्तुतोऽर्था असन्तः। ते तथैव, यथा केनापि तिमिररोगिणा दृश्यमाना असत्कल्पाः केशचन्द्रादयः। अर्थानामस्तित्वं नास्ति। माध्यमिकाः (शून्यवादिनः) ग्राह्य-ग्राहकयोः सत्तायाः प्रत्याख्यानमाचक्षते, ततः परं शून्यपर्यन्तं गच्छन्ति च, यज्ज्ञानातीतम्। विज्ञानवादिनस्तद्वादद्वयमयथार्थमतवादं मन्यन्ते ततो व्यावर्तन्ते च। सर्वास्तिवादिनो विज्ञानं विज्ञेयञ्चेत्युभयं द्रव्यसन्मन्यन्ते। शून्यवादिनस्तु विज्ञानविज्ञेययोः परमार्थतोऽस्तित्वं न मन्यन्ते, अपि तु केवलसंवृतितः। विज्ञानवादिनः केवलं चित्तं विज्ञानञ्च द्रव्यसन्मन्यन्ते। यस्तु विविध आत्मोपचारो धर्मोपचारश्च प्रथितस्तममी मिथ्योपचारं मन्यन्ते। तदनुसारं परिकल्पित आत्मा धर्मश्च विज्ञानविज्ञप्त्योः परिणाममात्रम्, चित्तं चैत्तञ्चेत्येकमात्रं वस्तुसत्।

काशीस्थराजसुरगीर्महाविद्यालयेशितुः।
प्रवर्तितोऽहमाज्ञप्त्या सुब्रह्मण्यमनीषिणः॥

या श्रीमदाचार्यनरेन्द्रदेवेनाग्रन्थि बौद्धागमरूपरेखा।
तत्पञ्चमाध्यायमनूद्य हृद्यं स्वसंस्कृतैरद्य कृती भवानि॥

श्रीभूपनारायण झा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयन-चलनम् ।

श्रीकृष्णामिश्रः ।

अयनचलनमयनांशा वा ज्यौतिषिकाणां समाजे चिरादेव प्रसिद्धतरम्। 'अयनं वर्त्म मार्गाध्वपन्थानः' इतिकोषोक्त्या मार्गमेवायनशब्दार्थः । तेनायनचलनं मार्गापसरणं तथाऽयनांशाश्च भागात्मकमयनचलनं वा वक्तुं शक्यते । परमिदमयनचलनं प्राचीनानां ज्यौतिषसिद्धान्तकाराणां गणनागोचरं नासीदिति सर्वथैव प्रतीयते । यदिह ज्यौतिषसिद्धान्तकारकुलगुरुद्व्यूनचतुःशतशकाब्दजन्मा श्रीमानार्यभटाचार्यस्तदनु नवाधिकपञ्चशतशकाब्दनिधनसमयो वराहमिहिराचार्यस्तथैव साम्प्रतिकानामनेकेषामज्ञातोऽपि बृहद्भास्करीयलघुभास्करीयनाम्नोर्ज्यौतिषतन्त्रयोः प्रणेता चतुश्चत्वारिंशदधिकचतुःशतशकाब्दसामयिकः प्रथमभास्करस्ततो विंशत्यधिकपञ्चशतशकाब्दजन्मा श्रीमान् ब्रह्मगुप्ताचार्यस्ततो नवीनः सार्धषट्शतशकाब्दासन्नसामयिको लल्लाचार्यः सार्धनवशतशकाब्दासन्नसामयिकः श्रीपतिरपि न कुत्राप्ययनांशानामयनचलनस्य वा चर्चां चकारेति स्वत एव प्रामाण्यात् । परमयनचलनमजानन्तोऽपि पुरातनास्ते वर्षारम्भसमयमयनपरिवर्त्तनसमयञ्च सूक्ष्मरूपेण सर्वेऽपि जानन्ति स्म । यद्विषुवत्क्रान्तिमण्डलयोः सम्पातः कस्मिन्नक्षत्रे कियति स्फुटभोगे वर्त्तत इति तैः स्थिरीकृतमासीत् । कस्यापि ज्यौतिषसिद्धान्तस्य मान्यता तदुक्तगणितसाधितग्रहादीनां चाक्षुषावलोकनतुल्यतयैव प्रसिद्धमासीत् । तत्रापि विशेषतः सम्पातसमयदृग्गणितैक्यस्यैव प्रधानता ब्रह्मगुप्ताचार्यादिभिः—

"यदि भिन्नाः सिद्धान्ता भास्करसंक्रान्तयोऽपि भेदसमाः ।
स स्पष्टः पूर्वस्यां विषुवत्यर्कोदयो यस्य ॥" इत्यादिप्रौढोक्त्या प्रतिपाद्यते ।

भिन्नमतेषु बहुविधेष्वपि सिद्धान्तेषु तिष्ठत्स्वपि यदनुसारसाधितविषुवद्दिने दिक्साधनविधिना स्थिरीकृतपूर्वबिन्दौ सूर्योदयो दृश्यते स एव स्पष्टः सिद्धान्तो मूलाधारशुद्धिहेतोः सूक्ष्मगणितविधिहेतोर्मान्य इति ब्रह्मगुप्ताभिप्रायः । अत्र सर्वापेक्षया विषुवद्दिनस्यैव दृग्गणितैक्यतावश्यकता स्फुटं दृश्यते ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथात्र प्राचीनग्रन्थेषु वर्षारम्भसमयस्यायनपरिवर्त्तनसमयस्य च स्वस्मादन्यादृशत्वमवगत्य श्रीमता वराहमिहिराचार्येणैवमुच्यते—

"आश्लेषार्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम् ।
नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु ॥
साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् ।
उक्ताभावो विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः ॥"

प्रत्यक्षपरीक्षणप्रकारश्चायम्—

दूरस्थचिह्नवेधादुदयेऽस्तमयेऽपि वा सहस्रांशोः ।
छायाप्रवेशनिर्गमचिह्नैर्वा मण्डले महति ॥

[बृहत्संहिता, आदित्यचार]

अत्र विषुवद्दिने समायामवनौ बृहदाकारं वृत्तमालिख्य दिगङ्कितं कृत्वा तन्मध्ये शङ्कुं संस्थाप्य सूर्योदयास्तमययोः प्राच्यपररेखायां शङ्कोश्छाया पतति, ततो यथा यथार्को मिथुनान्तं याति तथा तथाऽर्कोदयकाले छाया दक्षिणेन याति प्राच्यपररेखायाः । एवं प्रतिदिनं कृते कस्यां दिशि सूर्यचलनं कदा वाऽयननिवृत्तिरिति ज्ञायत इति ।

अयनचलनमीदृशलक्षणन्तु—

"स्वराक्रमे ते सोमार्कौ यदा साकं सवासवौ ।
स्यात्तदादियुगं माघस्तपः शुक्लोऽयनं ह्युदक् ॥
प्रपद्येते श्रविष्ठादौ सूर्याचन्द्रमसावुदक् ।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा ॥"

इत्युक्त्या वेदाङ्गज्यौतिषे, तथैव—

"रविशशिनोः पञ्चयुगं वर्षाणि पितामहोपदिष्टानि ।
अधिमासस्त्रिंशद्भिर्मासैरवमस्त्रिषष्ट्याह्नाम् ॥
द्व्यूनं शकेन्द्रकालं पञ्चभिरुद्धृत्य शेषवर्षाणाम् ।
द्विगुणं माघसिताद्यं कुर्याद् द्युगणं तदह्न्युदयात् ॥
. . . . शशिभं धनिष्ठाद्यम् ।"

[पञ्चसिद्धान्तिका, अध्यायः १२]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्युक्त्या वराहमिहिरोक्तपञ्चसिद्धान्तिकापैतामहसिद्धान्ते च वर्तत इति तावेत्र लक्ष्यीकृत्य 'नूनं कदाचिदासीद्येनोक्तं पूर्वशास्त्रेषु' इति वराहोक्तिः।

एतयोरनुसारेण धनिष्ठानक्षत्रादौ सूर्यसंक्रमण उत्तरायणारम्भ आश्लेषार्धे च दक्षिणायनारम्भः। तेऽयने च माघश्रावणयोर्मासयोर्भवत इति। अथ धनिष्ठादिविन्दौ सूर्यचन्द्रमसोः सङ्गमे यदैवोत्तरायणारम्भस्तदैव वर्षारम्भोऽपि प्रचलित आसीत्। इतः पूर्वं तु वर्षारम्भो वासन्तविषुवद्दिनतः प्रसिद्ध आसीत्। वेदाङ्गज्यौतिषानुसारेण पैतामहसिद्धान्तानुसारेण चैकस्मिन् पञ्चवर्षात्मके युगे सौरमासाः = ६०। चान्द्रमासाः = ६२। सावनदिवसाः = १८३०। तिथयश्चान्द्रदिनानि वा = १८६०। क्षयतिथयः = ३०। नाक्षत्रमासाः = ६७। नक्षत्राणि = १६०६। नक्षत्रवृद्धिः = २१। परवर्त्तिषु ज्यौतिषसिद्धान्तग्रन्थेष्वितो भिन्नाः सूक्ष्माः संख्या वर्त्तन्त इति। अथैतयोर्ग्रन्थयोः सूर्यचन्द्राभ्यामतिरिक्तस्य कस्यापि ग्रहस्य मेषवृषादिद्वादशराशेश्च कुत्रापि नोल्लेखः।

परमत्र वेदाङ्गज्यौतिषं कस्मिन् समये रचितमभूदित्यत्र बहून्येव मतान्तराणि सन्तीति तद्भवतु, वराहोक्त्यनुसारेण वर्षारम्भादिस्थित्यनुसारेणापि वेदाङ्गज्यौतिषरचनासमयः स्थूलगणनया ज्ञातुं शक्यते। यथा वेदाङ्गज्यौतिषसमय आश्लेषार्धाद्दक्षिणायनं कृत्तिकायां वासन्तं विषुवद्दिनमिति कृत्तिकादिर्नक्षत्रगणना। वराहमिहिराचार्याणां समये च कर्कटकाद्ये दक्षिणायनमश्विन्यादौ वासन्तं विषुवद्दिनमित्यश्विन्यादिर्नक्षत्रगणना। आर्यभटवराहमिहिरयोः समयात् प्रचलितेयमश्विन्यादिर्नक्षत्रगणनैवाद्यावधि भारतवर्षे प्रचलति। अस्मात् पूर्वमेवं प्रचलितमासीन्नवेत्यत्र संशय एव। अत्राश्लेषार्धतः पुनर्वसूनक्षत्रस्य तृतीयचरणं यावन् मिथुनान्तं कर्कादिर्वेति पादोननक्षत्रद्वयेन पृष्ठत एव तिष्ठति रवौ दक्षिणायनम्। तथैव धनिष्ठादितो मृगादितश्चेति धनिष्ठात उत्तराषाढानक्षत्रस्य प्रथमचरणं यावद् धनुरन्तं मकरादिर्वेति पादोननक्षत्रद्वयेन पृष्ठत एवोत्तरायणमिति। अथ च वेदाङ्गज्यौतिषे कृत्तिकादिर्नक्षत्रगणनाऽऽर्यभटवराहमिहिरयोः समये चाश्विन्यादिरिति चैतदनुसारेणापि नक्षत्रद्वयेन पृष्ठत एव विषुवद्दिनमिति तत्रायनचलनमेकस्मिन् वर्षे सूर्यसिद्धान्तमतानुसारं चतुःपञ्चाशद्विकलासमानं पश्चिमाभिमुखं मन्यते चेत्, स्थूलगणनया सप्तदशशतवर्षासन्नः समयो भवतीति सम्प्रति त्रिभिः सहस्रैर्वर्षैर्न्यूनः समयो वेदाङ्गज्यौतिषस्य भवति। महाभारतसमरसमयश्चेतः पञ्चषट्शतैर्वत्सरैः प्रथमं सिद्धोऽपि वर्षारम्भायनपरिवर्त्तनयोर्न कोऽपि भेद इति कृत्तिकादिनक्षत्रगणनया भीष्मपितामहस्योत्तरायणप्रतीक्षया शरशय्यां गतस्य

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'माघोऽयं समनुप्राप्तो मासः सौम्यो युधिष्ठिर' इत्याद्युक्त्या धनिष्ठादावेव सौम्यायनं परीक्षया स्थिरीकृत्य शरीरविसर्जनं प्रसिद्धमित्यत्रापि वेदाङ्गज्यौतिषोक्तैव स्थितिरिति ।

अथ लोकमान्यबालगङ्गाधरतिलकमहोदयैर्ऋग्वेदप्राचीनतानुसन्धानविषयक आङ्ग्ल-भाषया लिखिते 'ओरायन' नाम्नि ग्रन्थेऽनेकाभिर्ऋग्वेदर्ग्भिः प्रमाणीकृतमस्ति यद्वैदिके समये मृगशिरोनक्षत्रे वासन्तं विषुवद्दिनं तत्पृष्ठवर्त्तिन्यष्टमे नक्षत्रे पूर्वभाद्रपदायां मार्गशीर्षे मास्युत्तरा-यणारम्भः । एवमधुना वासन्तसमरात्रायनपरिवर्त्तनयोश्चतस्रः स्थितयो व्यक्तीभवन्ति । यथा—

(१) वैदिके समये मृगशिरोनक्षत्रे वासन्तं समरात्रम् । मूलनक्षत्रे शारदं सम-रात्रम् । पूर्वभाद्रपदायामुत्तरायणारम्भः । उत्तरफाल्गुन्याञ्च दक्षिणायनारम्भः ।

(२) महाभारतसमये ज्यौतिषवेदाङ्गसमये वा कृत्तिकायां वासन्तं समरात्रमनुराधायाञ्च शारदं समरात्रम् । धनिष्ठादावुत्तरायणारम्भस्स एव वर्षारम्भसमयोऽपि । आश्लेषार्धाच्च दक्षिणायनारम्भः ।

(३) अथार्यभटाचार्याणां समये वराहमिहिराचार्याणां समये चाश्विन्यादौ मेषादौ वा वासन्तं विषुवद्दिनम् , चित्रायां तुलादौ वा शारदं विषुवद्दिनम् । उत्तराषाढानक्षत्रे मकरादौ वोत्तरायणारम्भः, पुनर्वसौ कर्कादौ वा दक्षिणायनारम्भः ।

(४) अधुना सप्तत्यधिकाष्टादशशततमे शकाब्देऽश्विन्यादितः प्रथममेव द्वाविंशत्या दिवसैः पूर्वाभाद्रपदायां वासन्तं विषुवद्दिनम्, तुलादितः प्रथममेव हस्तनक्षत्रे शारदं समरात्रम् । तथैव मकरादितः कर्कटादितश्च पूर्वमेव पूर्वाषाढानक्षत्र आर्द्रानक्षत्रे चोत्तरायणं दक्षिणायनञ्च भवत इति । अतश्च प्रत्यक्षमेवावलोक्यते विषुवद्दिनमयनपरिवर्त्तनदिनञ्च यथोत्तरं प्रथममेव भवतीति तदयनचलनं क्रान्तिमण्डलविषुवन्मण्डलसम्पातयोः पश्चिमाभिमुखं शनैर्गमनं वा प्रत्यक्षत एव प्रतीतियोग्यं स्वीकृतियोग्यञ्चेति नात्र संशयलेशोऽपि विषयविवेचकानां ज्यौतिषि-काणाञ्च भवितुमर्हतीति ।

आर्यभटवराहमिहिरयोः समयेऽश्विन्यादिस्थसमरात्रिन्दिवकाले क्रान्तिमण्डलनिष्ठसप्त-विंशतिनक्षत्रात्मकभचक्रस्य मेषवृषादिद्वादशराशिकल्पनया तदानीमयनचलनानवबोधेन च तत्रैवाश्विन्यादौ मेषादौ वा वासन्तं समरात्रम्, ततो राशित्रयान्तरे पुनर्वस्वन्ते वा याम्यायना- ३९
रम्भस्तुलादौ चित्रार्धे वा शारदं समरात्रं, मकरादावुत्तराषाढानक्षत्रे वोत्तरायणारम्भश्च स्थिरी-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूत इव तदानीन्तनैर्गगननिरीक्षकैर्वर्षायनादिपरीक्षकैरार्यभटादिभिर्गृहीतोऽभवदिति । समरात्रिन्दिवकालात्मकं वास्तविकं विषुवद्दिनं क्रान्तिविषुवन्मण्डलसम्पातबिन्दुस्थे रवावेव भवति । तत एव च त्रिभान्तरयोः सौम्ययाम्यायनारम्भावपि वास्तविकौ भवत इति मेषादिगणनाकारिभिर्ज्यौतिषिकैः सायनगणना निरयनगणना च प्रकल्पिते, साम्प्रतं सर्वैः सूरिभिः श्रूयेते मतभेदशालिविषयवत्याविव स्वेच्छानुसारं मन्येते च । अस्यैव विषयस्य विवेचनमिदमस्मिन् प्रबन्धे सिद्धान्तपक्षश्च ।

आर्यभटवराहमिहिराभ्यां किञ्चित् परवर्त्ती सपादशतवर्षासन्नसामयिको ब्रह्मगुप्ताचार्योऽयनचलनसम्बन्धे सन्दिहानोऽपि तदानीन्तनैर्बहुभिरुपलब्धमयनचलनं शृण्वन्नासीदिति तदुक्त्या तन्निराकरणयुक्त्या च स्फुटमेव प्रतीयते । यथाऽत्र ब्रह्मगुप्तः—

"परमाल्पा मिथुनान्ते द्युरात्रिनाड्योऽर्कगतिवशाद्दतवः ।
नायनयुगमयनवशात् स्थिरमयनद्वितयमपि तस्मात् ॥"

(ब्रा. स्फु. सि. तन्त्रपरीक्षाध्यायः)

मिथुनान्त एव परमाल्पा रात्रिनाड्यो भवन्ति तथार्कचलनवशादेव ऋतवश्च भवन्तीति सौम्यायनं याम्यायनं स्थिरमेव न चलं गतिशालि वेति । कर्कटादौ मकरादौ च नियतरूपेणैव सौम्यायनं याम्यायनञ्च भवतीति । मेषादौ क्रान्तिविषुवन्मण्डलयोः सम्पातकालिकस्थितेस्तत्काले प्रायो द्वाभ्यामंशाभ्यां सम्पातः पश्चिमतश्चलित इति चाक्षुषावलोकने तच्चलनसन्देहः स्वाभाविक एवेति ।

अत्र ब्रह्मगुप्ततः प्राचीनेन वासिष्ठसिद्धान्तस्य रचयित्रा संस्कर्त्रा वा केनचिद् विष्णुचन्द्रेण—

'तस्य चात्र युगं रुद्रकृतनन्दाष्टकेन्दवः ।
अयनस्य युगं प्रोक्तं ब्रह्मार्कादिमतं पुरा ॥"

इत्युक्त्याऽयनयुगमभिहितं तद्दूषणमेतद्ब्रह्मगुप्तस्य ।

अष्टशतशकाब्दसामयिको ब्राह्मस्फुटसिद्धान्तटीकाकारश्चतुर्वेदाचार्यः पृथूदक एतद्व्याख्या-
४० याम् "असद्दूषणमेतत्, सम्प्रत्येव मिथुनान्ते न रात्रिदिनयोः परमापचयोपचयौ यत इदानीं सार्धाः षडंशा [६।३०] अयनचलनं दृश्यते ।" इत्याह ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

किञ्च ब्रह्मगुप्तकृतखण्डखाद्यककरणस्य वासनाभाष्यटीकायाम्—"प्रद्योतनसिद्धान्ते तु अयनांशाख्या नक्षत्राणां प्राचीनगतिरित्युक्तम् । अतः प्रत्यक्षोपलब्धिरेवायनांशोत्पत्तावुपपत्तिः । नवाधिकपञ्चशतशकाब्दे वराहमिहिराचार्यो दिवंगतस्तस्मिँश्च कालेऽयनांशाभाव आसन्न एवेति"—इत्युक्त्याऽऽमराजदैवज्ञेनायनचलनसम्बन्धे युक्तियुक्तमैतिहासिकविवेचनं कृतमिति ।

अथ ब्रह्मगुप्तात्परतो मुञ्जालाचार्येणैवायनचलनं सर्वप्रथमं स्फुटमुपलभ्य विवेचितम् । मुञ्जालाचार्येणानेन बृहन्मानसं लघुमानसञ्चेति करणद्वयं लघूपायसाध्यग्रहाद्यानयनं विरचितम् । तत्र बृहन्मानसनामा ग्रन्थः सम्प्रति नोपलभ्यते । लघुमानसञ्च षष्ट्याऽनुष्टुप्श्लोकैर्निबद्धमद्याप्यमुद्रितमेव बहुत्रोपलभ्यते । तत्र लघुमानसे करण आर्यभटीयतन्त्रटीकाकारस्य परमेश्वरस्य, यल्लायनाम्नः कस्यचन गणकस्य, प्रशस्तिधरनाम्नो ज्योतिर्विदश्च विवृतय उपलभ्यन्ते । तासु बहून्यपि बृहन्मानसकरणस्य वचनानि विद्यन्ते । तेषु कतिचनोपयोगीन्यत्रोल्लिख्यन्ते । तत्र प्रशस्तिधरस्य टीकारम्भो यथा—

"एकं चास्ति बहुधा यद्ब्रह्म परं प्रणम्य तद्भक्त्या ।
लघुमानसकरणस्य तनुते विवृतिं प्रशस्तिधरः ॥ १ ॥
अल्पग्रन्थमनल्पं प्रयासरहितं परिस्फु व्यापि ।
समदृग्गणितमतो मे तद्विवृतावस्ति बहुमानः ॥ २ ॥

अतः परं बृहन्मानसकरणस्य कतिचिद्वचनानि लिखितानि । यथा—

"कृतशरवसुमितशाके चैत्रादौ सौरिवारमध्याह्ने ।
राश्यादिरजनृपार्का रविरिन्दुर्भवधृतिद्वियमाः ॥ १ ॥
सूर्यान्मन्दोच्चांशा वसुतुरगाः पर्वतास्तु सत्र्यंशाः ।
स्वररवयोः खाकृतयो द्विनगभुवोऽशीतिरद्रिजिनाः ॥ २ ॥
द्युत्कृतिखानि युगोत्कृतिकराब्धयः खाष्टनवंदशत्रिसुराः ।
गोऽष्टाविंशतितानाः कुजादयः सूर्यभगणान्ते ॥ ३ ॥
संक्रान्तितिथिध्रुवकः शक्रा वसुनवरसेषवो राहोः ।
कृतयमवसुरसदशका दशाहताः क्षेपपातांशाः ॥ ४ ॥
अयनचलनाः षडंशाः पञ्चाशल्लिप्तिकास्तथैकैका ।
प्रत्यब्दं तत्सहितो रविरुत्तरविषुवदादिः स्यात् ॥ ५ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अन्तरयुक्ते हीने भानौ चन्द्राधिके क्रमादूने ।
चक्रोने शतगुणिते स्वरनिधिभक्ते तु संक्रमतिथिः स्यात् ।६।।

आर्याभ्य आभ्यश्चतुःपञ्चाशदधिकाष्टशतसंख्यकशकाब्दे चैत्रशुक्लप्रतिपदादौ शनिवासरे मध्याह्नसमये मुञ्जालाचार्येण रव्यादयो ग्रहास्तेषां मन्दोच्चांशाश्च ये समानीतास्तेषामवगमो भवति। संक्रान्तितिथिश्चतुर्दशेति चैत्रसितादितः प्रथमं चतुर्दशभिर्दिनै रविसंक्रान्तिरिति। अथ तत्र चन्द्रपातो राश्यादिः ८।६।५६। ततो भौमादीनां ग्रहाणां पातांशाश्च कृतयमवसुरसदशका दशाहता इत्यनेन ४०-२०-८०-६०-१०० एतावन्त उक्ताः। अयनचलनांशाश्च पञ्चाशत्कलाधिकाः षडंशास्तस्मिन् समय उपलब्धाः। ततश्च प्रतिवर्षमेकैकया कलया अयनचलनांशा वर्धन्ते। मुञ्जालोक्तभगणानुसारेण वार्षिकी गतिः ५६।५४।२।३१।१२। अयनचलनांशसहितो रविरुत्तरविषुवदादिर्वासन्तविषुवद्दिनतः क्रान्तिविषुवन्मण्डलयोरुत्तरदिगाख्यसम्पाततो भवति। अयनचलनांशासंस्कृतस्तु मेषादिबिन्दोरेवायातीति। एवं स्फुटोक्त्या सपरिष्कारं प्रथमं मुञ्जालेनैवायनचलनस्थितिस्तद्गतिश्चोक्ते। अथैतत्परतोऽपि मुञ्जाल एवायनचलनस्य विशदं विवेचनमेवं करोति—

उत्तरतो याम्यदिशं याम्यान्तात्तदनु सौम्यदिग्भागम् ।
परिसरतां गगनसदां चलनं किञ्चिद्भवेदपमे ।। १ ।।

विषुवदपक्रममण्डलसम्पाते प्राचि मेषादिः ।
पश्चात्तुलादिरनयोरपक्रमासम्भवः प्रोक्तः ।। २ ।।

राशित्रयान्तरेऽस्मात् कर्कादिरनुक्रमान्मृगादिश्च ।
तत्र च परमा क्रान्तिर्जिनभागमिताऽथ तत्रैव ।। ३ ।।

निर्दिष्टोऽयनसन्धिश्चलनं तस्यापि संभवति ।
तद्भगणाः कल्पे स्युर्गोरसरसगोऽङ्कचन्द्रमिताः ।। ४ ।।

सततमपक्रमवृत्ते भ्रमति रविस्तेन तत्क्रान्तेः ।
चलनमभिव्यक्तमभूदितरखगापक्रमाणाञ्च ।। ५ ।।

ग्रहाणां दक्षिणोत्तरा क्रान्तिर्यथा परिवर्त्तते परिवर्धते च तथैवायनचलनमपि पूर्वदिशि पश्चिमदिशि च पुनः पुनर्भवतीति मुञ्जालोक्त्या पूर्वपश्चिमदिशोश्चतुर्विंशतिमंशानेव चलतीति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथात्र षट्त्रिंशदधिकसहस्रमितशकाब्दजन्मा श्रीमान् भास्कराचार्योऽयनचलनसम्बन्धे मुञ्जालमतमेवं प्रतिपादयति—

"अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम् ।
तत्पक्षे तद्भगणाः कल्पे गोऽङ्कर्तुनन्दगोचन्द्राः ॥" इति ।

मुञ्जालोक्तम् 'तद्भगणाः कल्पे स्युर्गोरसरसगोऽङ्कचन्द्रमिताः' इति संख्या एव स्फुटं कथयति । ब्रह्मगुप्तानन्तरं दृग्गणितैक्यकृत्प्रकारकथने मुञ्जालाचार्यः सुप्रसिद्ध आसीदिति तदुक्तलघुमानसकरणटीकाकृतां यल्लायपरमेश्वरप्रशस्तिधराणामुक्तितः श्रीभास्करोक्तितश्च सुदृढमेव व्यक्तीभवतीति ।

श्रीभास्कराचार्येण स्वस्मात्पुरातनयोर्द्वयोरेव ग्रन्थग्रन्थकारयोरयनचलनसम्बन्धे मतोल्लेखः कृतः । तत्रैकः श्रीसूर्यसिद्धान्तोऽपरश्च मुञ्जालाचार्यः । तत्र मुञ्जालमतं यथाऽवगतं प्रदर्शितमेव । श्रीसूर्यसिद्धान्तस्तु प्रकृते तादृशरहस्यावृतो दृश्यते यदेतन्मतं किमित्यत्र सूर्यसिद्धान्तव्याख्याकृतां विदुषामपि नैकमत्यमिति स्पष्टं तन्मतं वक्तुं न शक्यते । यथा सूर्यसिद्धान्ते—

"त्रिंशत्कृत्वो युगे भानां चक्रं प्राक् परिलम्बते ।
तद्गुणाद् भूदिनैर्भक्ताद् द्युगणाद्यदवाप्यते ॥ ९ ॥
तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः ।
तत्संस्कृतग्रहात् क्रान्तिच्छायाचरदलादिकम् ॥ १० ॥
स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद्द्वये ।
प्राक्चक्रं चलितं हीने छायार्कात् करणागते ॥ ११ ॥
अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाऽधिके ।

[त्रिप्रश्नाधिकारे]

युगे खचतुष्करदार्णववत्सरोन्मिते महायुगे भानां चक्रमश्विन्यादिनक्षत्राणां मण्डलं क्रान्तिवृत्तमित्यर्थः । त्रिंशत्कृत्वस्त्रिंशद्वारं प्राक् परिलम्बते पूर्वस्यां दिशि लम्बितं भवति। युगोक्तवत्सरैस्त्रिंशद् भगणा लभ्यन्ते चेदेकेन वर्षेण किमित्यनुपातेनायनचलनस्य वार्षिकी गतिर्भवति । ततो दिनगतिश्च सुखेनैव ज्ञातुं शक्याप्यत्यल्पतया नोपलभ्यते । अथ 'तद्गुणाद् भूदिनैर्भक्तात्' इति युगसावनदिनैर्युगोक्ता अयनचलनभगणा लभ्यन्ते तदाऽहर्गणेन किमिति भगणाद्ययन-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चलनं स्यात् । अत्रायनचलनभगणाः सूर्यसिद्धान्तटीकाकारैरेवंविधा मन्यन्ते यद्विषुवन्मण्डलक्रान्तिमण्डलयोः सम्पातो रेवत्यन्तबिन्दुतः प्रथमं पश्चिमदिशि स्वगत्या सप्तविंशतिमंशान् गत्वा ततः पूर्वाभिमुखं तयैव गत्या रेवत्यन्तबिन्दुमायाति । पुनरपि तयैव गत्या पूर्वाभिमुखं सप्तविंशत्यंशपर्यन्तं गत्वा पुनः परावृत्त्य पश्चिमाभिमुखं सप्तविंशत्यंशपर्यन्तमर्थाद् रेवत्यन्तबिन्दावायाति । एवं चतुर्धा सप्तविंशत्यंशचलनेन वस्तुतस्त्वष्टोत्तरशतमितांशचलनेनैको भगण इति प्रयोजनाभावाद् भगणं विहाय राश्यादिरेव गृहीतः । तत्रापि केन्द्रपदवच्चतुर्धा चलनभेद इति नवत्यंशैः सप्तविंशतिरंशास्तदा राश्यादेर्भुजांशैः किमिति भाजकभाज्ययोर्नवभिरपवर्त्तने दत्ते 'तद्दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः' इत्युक्तमुपपद्यते । 'स्फुटं दृक्तुल्यतां गच्छेत्' इत्यादि कथनन्त्वयनचलनस्य पूर्वोपपादितस्थितिभावनया सिद्ध्यति ।

परमत्र सूर्यसिद्धान्ते बहून्येव विवादास्पदानि मतान्तराणि विद्यन्ते । यथा—'त्रिंशत्कृत्वो युगे भानाम्' इत्यत्र 'त्रिंशत्कृत्यो युगे भानाम्' इति पाठं प्रकल्प्य त्रिंशत्कृत्यः त्रिंशद्गुणिता विंशतिः ३०×२०=६०० इति तदभिप्रायञ्च मत्वा षट्शतान्ययनचलनभगणा युगे भवन्तीति—

"युगे षट्शतकृत्वो हि भचक्रं प्राक् प्रलम्बते" इति सोमसिद्धान्ते ।

"क्रान्तिपातभगणा इत्येतदेकं प्राक् चलनं युगे तानि च षट्शतम्" इति शाकल्यसंहितायाम् ।

"अब्दा खखर्त्तुभिर्भाज्यास्तद्दोस्त्रिघ्ना दशोद्धृताः" इति वसिष्ठसंहितायाम् ।

वचनेभ्य एभ्य एकवाक्यतानुरोधेनाधुनिकाः सर्वेऽस्माकं गुरवः श्रीसुधाकरद्विवेदिनश्च स्वकृतसूर्यसिद्धान्तटीकायां सुधावर्षिण्याममेव सूर्यसिद्धान्ताभिप्रायं वर्णयन्ति । तदेवमेव सर्वेऽपि निगदन्ति । तत्र 'त्रिंशत्कृत्य' इति पाठस्यौचित्ये 'कृत्य' इति आर्षप्रयोगञ्च मन्यन्ते । अपरे चायनचलनप्रतिपादकोऽयं प्रकारः सूर्यसिद्धान्ते केनचित् प्रक्षिप्त इति च निगदन्ति । यदिहायनचलनभगणांस्तद्गतिं चोक्त्वापि तदितरत्रकुत्राप्ययनचलनसंस्कारो नोक्तः । किञ्च—

"शङ्कुच्छायाकृतियुतेर्मूलं कर्णोऽस्य वर्गतः ।
प्रोज्झ्य शङ्कुकृतिं मूलं छायाशङ्कुर्विपर्ययात् ॥"

 इत्ययनांशानयनात् प्राग्ग्रन्थेन 'एवं विषुवती छाया स्वदेशे या दिनार्धजा' इत्युत्तरग्रन्थस्य सर्वथैव संगतिर्दृश्यते । अयनांशानयनप्रकारे तदभ्यन्तरे तिष्ठति न कथमपि ग्रन्थसंग-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तिर्भवतीति श्रीमतां बापूदेवशास्त्रिणामन्येषां बहूनां विदुषाञ्च विमर्शः। अपरञ्चात्र विचारणीयमिदमाविर्भवति यत् प्राचीनतमे सूर्यसिद्धान्तेऽस्मिन् अयनचलनप्रतिपादनं वस्तुतः संभाव्यते न वा। पूर्वोक्तविवेचनेन ग्रहाद्यानयनप्रकारस्योत्तरोत्तरं वैशद्यं सूक्ष्मत्वञ्चेति प्रथममयनचलनोपलम्भो नासीद्गणकानाम्। यथार्यभटवराहमिहिरब्रह्मगुप्ताचार्याणां नासीत्। ते च रेवत्यन्तबिन्दावेव भगणपूर्त्तिं शाश्वतीं मन्यन्ते स्म। तदिह सूर्यसिद्धान्तोऽयं तेभ्यः पुरातनो नवीनो वा। पुरातने स्वीकृत एतादृश उपयोगी संस्कारस्तदर्वाचीनैः कथं तैर्नोक्तः? आर्यभटेन कुत्राप्येतस्य चर्चाऽपि न क्रियते। वराहमिहिरोऽपि स्वस्मात् प्रथममयनपरिवर्त्तनमन्यादृशमुक्तमाशङ्क्य कथयति—

आश्लेषार्धादासीद्यदा निवृत्तिः किलोष्णकिरणस्य।
युक्तमयनं तदाऽऽसीत् साम्प्रतमयनं पुनर्वसुतः॥

अथैतत्परतोऽपि क्रान्तिविषुवन्मण्डलयोः सम्पातस्य चलनादयनपरिवर्त्तनमन्यदा भविष्यतीति कुत्रापि नोवाच। ब्रह्मगुप्तस्तच्चलनं कैश्चिदभिहितमपि नाङ्गीचकार। भारतीयगणकेषु प्रायो मुञ्जालाचार्य एव प्रथमं सविवेचनं सविशदञ्चायनचलनं प्रतिपादितवानिति विदुषां निर्णये सूर्यसिद्धान्तोक्तमिदमयनचलनोपपादनं वस्तुत एवाश्चर्यकारकम्। अत एव सूर्यसिद्धान्तोऽयं तेभ्यो नवीन इति वक्तुं नानुचितम्। वस्तुतस्तु सूर्यसिद्धान्त इति नाम्ना तत्तत्समये बहवोऽपि ग्रन्था आसन्निति। वराहमिहिरेण स्वपञ्चसिद्धान्तिकायां सूर्यसिद्धान्तानुसारीणि बहून्येव भगणादिमानानि लिखितानि, तानि साम्प्रतिकसूर्यसिद्धान्तानुसारिभ्यो भगणादिमानेभ्यो भिन्नानि। वराहबृहत्संहिताटीकाकारेण भट्टोत्पलेन तट्टीकायां बहून्येव सूर्यसिद्धान्तवचनानि प्रमाणरूपेणोपन्यस्तानि, तेषु नैकमपि साम्प्रतिके सूर्यसिद्धान्त उपलभ्यते। यद्यपि भारतीयं ज्यौतिषशास्त्रं वैदिकसमयादेव प्रयोजनानुसारितत्तद्विषयनिर्णायकमस्त्येवेति सिद्धेऽपि गणितादिवैशद्यमुत्तरोत्तरं सूक्ष्ममित्यत्र नास्ति संशयलेशोऽपि। तत्प्राचीनतमे कस्मिन्नपि ग्रन्थे सूर्यसिद्धान्ते वा नूतनोपलब्धविषयाणां विवेचनं कथं भवितुमर्हति। वस्तुतस्तु पुरातन एकः सूर्यसिद्धान्त आसीत्। तस्मिन्नेव नवीनोपलब्धविषया अपि तत्तत्सामयिकैर्ज्यौतिषिकैः प्रक्षिप्ता बभूवुरिति ग्रन्थावलोकनतोऽपि प्रतीयते। यथाऽत्र सूर्यसिद्धान्ते स्पष्टाधिकारे 'अदृश्यरूपाः कालस्य मूर्त्तयो भगणाश्रिता' इत्यादयः प्रायो दशैकादश वा श्लोकाः प्राचीनं सूर्यसिद्धान्तमतं प्रकाशयन्ति। ४५
तत्रैव तत्परतो 'राशिलिप्ताष्टमो भाग' इत्यादिना सूक्ष्मजीवानयनं तत्परतोऽपि प्रतिवृत्तनीचोच्च-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वृत्तभङ्गिभ्यां ग्रहाणां स्पष्टीकरणं ग्रहाणां स्पष्टगतिसाधनञ्चेत्यादि विषयजातमार्यभटाचार्यात् परतो विवेचितं गणितोन्नतिनिदर्शनं तन्नूतनत्वं प्रकाशयति। साम्प्रतिकः पञ्चशतश्लोकात्मकः सूर्यसिद्धान्तः 'अल्पावशिष्टे तु कृते मयो नाम महासुरः।'........ 'न मे तेजस्सहः कश्चिदाख्यातुं नास्ति मे क्षणः।' इत्यादितदैतिह्यसत्त्वेऽपि ब्रह्मगुप्ताचार्यात् परतो रचित इति साम्प्रतिकाना-मैतिहासिकविवेचनाविधायकानां विदुषां सिद्धान्तो दृश्यते। सूर्यसिद्धान्तसुधावर्षिणीटीका-कारोऽस्माकमध्यापकः श्रीमान् सुधाकरद्विवेदी तद्भूमिकायाम् 'उपरिलिखितहेतुना भट्टोत्पला-नन्तरं (शाके ८८८) श्रीभास्कराचार्यतः (शाके १०७२) प्रागेव भारतवर्षेऽस्य सूर्य-सिद्धान्तस्य प्रचारो जात इति स्फुटम्।' अथ च वराहोक्तपञ्चसिद्धान्तिकाटीकायां प्रकाशिकायाम् "सूर्यसिद्धान्तरचनाकालस्तु नित्यानन्देन सिद्धान्तराजकृता कलेः षट्त्रिंशच्छतमितेऽब्दगणे व्यतीते निगद्यते। स कालस्तु आर्यभटकृतसिद्धान्तस्य प्रसिद्ध एव, तेन सूर्यसिद्धान्त आर्यभटकृतसिद्धान्तसमकालिक एव सिध्यति विभाति च तथ्यं नित्यानन्दप्रतिपादितमार्यभटीय-सिद्धान्ते न कुत्रापि सूर्यसिद्धान्तमतप्रतिपादनात्। साम्प्रतं प्रचलितः कृतयुगान्तकालिकः सूर्यसिद्धान्तस्तु केनचिदन्येन प्रकल्पितो नवीन इति स्फुटमेव सूक्ष्मविचारप्रवृत्तानां गणकानाम्।" इत्याद्युक्तिभिर्नवीनत्वमेवास्य प्रमाणयति। तदत्रोल्लिखितमयनचलनप्रतिपादनमपि नूतनोप-लब्धमेवेत्यत्र न कश्चित् सन्देहावसरः।

अधुनाऽस्मत्पाठ्यग्रन्थस्य सिद्धान्तशिरोमणेः प्रणेतुः श्रीभास्कराचार्यस्य तदयनचलन-सम्बन्धे विवेचनं शृणु—

"विषुवत्क्रान्तिवलययोः सम्पातः क्रान्तिपातः स्यात्।
तद्भगणाः सौरोक्ता व्यस्ता अयुतत्रयं कल्पे ॥ १ ॥
अयनचलनं यदुक्तं मुञ्जालाद्यैः स एवायम्।
तत्पक्षे तद्भगणाः कल्पे गोऽङ्गर्तुनन्दगोचन्द्राः ॥ २ ॥
तत्सञ्जातं पातं क्षिप्त्वा खेटेऽपमः साध्यः।
क्रान्तिवशाच्चरसुदयाश्चरदललग्नागमे ततः क्षेप्यः ॥ ३ ॥

क्रान्त्यर्थं पातः क्रान्तिपातः। पातो नाम सम्पातः। कयोर्विषुवत्क्रान्तिवलययोः। नह्य-नयोर्मेषादावेव सम्पातः। किन्तु तस्यापि चलनमस्ति। येऽयनचलनभागाः प्रसिद्धास्त एव क्रान्ति-पातस्य विलोमगस्य भागाः। मेषादेः पृष्ठतस्तावद्भागान्तरे क्रान्तिवृत्ते विषुवद्वृत्तं लग्नमित्यर्थः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नहि क्रान्तिपातो नास्तीति वक्तुं शक्यते प्रत्यक्षेण तस्योपलब्धेः। तत्कथं ब्रह्मगुप्तादिभिर्निपुणैरपि नोक्त इति चेत्तदा स्वल्पत्वात्तैर्नोपलब्धः। इदानीं बहुत्वात् साम्प्रतिकैरुपलब्धः। अत एव तस्य गतिरस्तीत्यवगतम्। यद्येवमनुपलब्धोऽपि सौरसिद्धान्तोक्तत्वादागमप्रामाण्येन भगणपरिध्यादिवत् कथं तैर्नोक्तः। सत्यम्, अत्र गणितस्कन्ध उपपत्तिमानेवागमः प्रमाणम्। तर्हि मन्दोच्चपातभगणा आगमप्रामाण्येनैव कथं तैरुक्ता इति न च वक्तव्यम्। यतो ग्रहाणां मन्दफलाभावस्थानानि प्रत्यक्षेणोपलभ्यन्ते। तान्येव मन्दोच्चस्थानानि। यानि विक्षेपाभावस्थानानि तान्येव पातस्थानानि। किन्तु तेषां गतिरस्ति नास्ति वेति सन्दिग्धम्। तत्र मन्दोच्चपातानां गतिरस्ति चन्द्रमन्दोच्चपातवदित्यनुमानसिद्धा। सा च कियतीति तदुच्यते। यैर्भगणैरुपलब्धस्थानानि तानि तानि गणितेनागच्छन्ति तद्भगणसंभवा वार्षिकी दैनन्दिनी वा गतिर्ज्ञेया। नैवम्, यद्यन्यैरपि भगणैस्तान्येव स्थानान्यागच्छन्ति तदा कतरस्या गतेः प्रामाण्यम्। सत्यम्, तर्हि साम्प्रतिकोपलब्ध्यनुसारिणी कापि गतिरङ्गीकर्त्तव्या। यदा पुनर्महता कालेन महदन्तरं भविष्यति तदा महामतिमन्तो ब्रह्मगुप्तादीनां समानधर्माण उत्पत्स्यन्ते ते तदुपलब्ध्यनुसारिणीं गतिमुररीकृत्य शास्त्राणि करिष्यन्ति। अत एवायं गणितस्कन्धो महामतिमद्भिर्धृतः सन्ननाद्यनन्ते कालेऽपि खिलत्वं न याति। अतोऽस्य क्रान्तिपातस्य भगणाः कल्पे अयुतत्रयं तावत् सूर्यसिद्धान्तोक्ताः। तथा मुञ्जालाद्यैर्यदयनचलनमुक्तं स एवायं क्रान्तिपातः। ते गोऽङ्गर्त्तुनन्दगोचन्द्रा उत्पद्यन्ते। अथ च ये वा ते वा भगणा भवन्तु। यदा येंऽशा निपुणैरुपलभ्यन्ते तदा स एव क्रान्तिपात इत्यर्थः। तं विलोमगं क्रान्तिपातं ग्रहे प्रक्षिप्य क्रान्तिः साध्या।"

इत्यनेन विवेचनेनायनचलनसम्बन्धि सर्वमपि विषयजातं स्फुटं विदितं भवति। अत्र सिद्धान्तशिरोमणेष्टीकाकारेण मुनीश्वरदैवज्ञेन स्वटीकायां मरीचौ भास्करोक्तायनचलनव्याख्यायां 'व्यस्ता अयुतत्रयं कल्पे' इत्यत्र कस्यचिदिदं वचनम्—

"खाभ्रखाभ्राग्नयः कल्पे क्रान्तिपातविपर्ययाः।
व्यस्ता अङ्कविलिप्ताया गतेः प्रत्यक्षदर्शनात्॥"

इति कल्पे त्रिंशत्सहस्रसूर्यसिद्धान्तोक्तभगणानां तद्गतेश्च नवविकलामितायाः प्रतिपादकं दृश्यते। किन्तु भास्कराचार्येण मुञ्जालमतानुसारिभगणानेवादायानुपातेन तद्गतिमेतावतीं ४७
विकलाद्यां ५६।५४।२।३१।१२ स्वीकृत्य पञ्चदिक्चन्द्रमिते शकाब्देऽयनग्रहं भगणाद्यमेनम् ६११८९।०।१०।५४।३५।२३।५५।४२।४८ आनीय भगणानां प्रयोजनाभावात्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्यागाद्राशेश्च शून्यतया तदंशादिकस्य स्वल्पान्तरेणैकादशांशानङ्गीकृत्य प्रतिवर्षं तद्गतिं कलातुल्यां चाङ्गीकृत्य स्वीये करणकुतूहले—'अथायनांशाः करणाब्दयुक्ता भवा' इत्यनेनायनांशसाधनमुपनिबद्धम् ।

अथात्र विनायकात्मजश्रीढुण्ढिराजदैवज्ञेन श्रीरुक्माङ्गददीक्षिताज्ञया विरचिते सायनतत्त्वविवेकनाम्नि ग्रन्थे "अत एव सम्पातस्य प्रत्यक्चलनेन स्वस्थानस्थिरीभूतेष्वप्यश्विन्यादिषु नौकागमनेन तिर्यक्स्थितेष्विव तद्विपरीतं प्राक्चलनमिवोपचारात् प्रतीयेत, इत्यभिप्रेत्य प्राक्चलनकालेऽयनांशा धनमित्युक्तम् । एवमेव च तादृशसम्पातस्य निर्दिष्टमेषादिस्थानात् प्राक्चलितस्य तत एव प्राक्प्रचलितस्य च ग्रहस्यान्तरजिज्ञासायां उभयोरनुलोमगतिकत्वेनोक्तयोरन्तर एवान्तरावगमात् तदायनांशा ऋणमित्युच्यन्ते । अत एव सम्पातस्य प्राक्चलनेन स्वस्थानस्थिरीभूतेष्वपि भेषु पूर्वोक्तदृष्टान्तत्वेन तद्विपरीतं प्रत्यक्चलनमिवोपचारात् प्रतीयते इत्यभिप्रेत्य प्रत्यक्चलनकालेऽयनांशा ऋणमित्युक्तम् ।" एवं च धनर्णताया यथोक्ताया एव संभवेन नार्षग्रन्थविरोध इत्यवसेयमिति तदयनचलनसम्बन्धे विशेष उक्तः । सायनसंक्रान्तेः प्रधानतासम्बन्धे चानेनोक्तं लघुवसिष्ठोक्तमिदं वचनम्—

"चलसंस्कृततिग्मांशोः संक्रमो यः स संक्रमः ।
अजागलस्तन इव राशिसंक्रान्तिरुच्यते ॥"

वस्तुगत्याऽयनचलनस्वीकृतिमेव प्रतिपादयतीति ।

अत्र सिद्धान्तसुन्दररचयितुर्ज्ञानराजदैवज्ञस्यात्मजेन सूर्यदैवज्ञेन प्रणीते 'सिद्धान्तसंहितासारसमुच्चय' नाम्नि ग्रन्थेऽयनांशविचारे सूर्यसिद्धान्तमतं श्रीमुञ्जालाचार्यमतञ्च विविच्य स्वोक्त्येदमुच्यते—

"सम्पातेऽपमनाडिकावलययोर्मेषादिरासीत् पुरा
यः सम्प्रत्ययनांशकैः प्रचलितः प्राक्तन्नतैरन्वितात् ।
भानोर्लम्भचरापमादिर्विहितं पूर्वर्षिभिः प्रत्यया—
देतन्मेषतुलादिरात्रिदिनयोः साम्योपलम्भाचिरम् ॥ १ ॥
चेदित्थं विषुवोपलब्धिजनकान्मेषादितः स्याद्द्विनै-
स्त्रिंशद्भिर्वृषभादिरस्य पुरतस्तावद्भिरन्यस्य च ।
खेटानां भगणादिरप्यविकलं तत्स्यादिवालोच्यताम्
चेदास्तामिदमेव तद्धि गगने सूर्यादिखेचारिणाम् ॥ २ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नक्षत्रानुगता गतिर्नहि भवेत् किन्त्वग्रतस्तारका—
रूपात्स्यादयनांशकैरथ खगे गेहोच्चसंस्थे सति।
न स्याज्जातकभाषितं फलमिदं तद्वोचरोक्तं पुन-
स्तस्मात् का गतिरत्र चेत् सुगणकास्तत्सम्यगालोच्यताम् ॥ ३ ॥

वायोर्वा स्खलनाददृष्टिवशतः किं वेश्वरेच्छावशाद्
नित्यं प्रागपरत्र चक्रचलनं यत्प्रोक्तमस्थानतः।
तस्यारम्भविरामकौ च भवतो यत्रास्पदे मध्यमे
तत्रास्ते भगणोऽवधिर्दिविषदां न स्याच्चलादेव तत् ॥ ४ ॥

प्राक्पश्चाच्चलनं हि यद्यपि भवेद्भानां युगादिस्थिताद्
मेषादेर्न चरेत्तथापि भगणारम्भो नभोवासिनाम्।
त्यक्त्वा राशिमधिष्ठितं दिविचरो वक्रातिचारोऽथवा
पृष्ठाग्रस्थितराशिगोऽपि न भजेत्किं मौलिराशेः फलम् ॥ ५ ॥"

इत्यनेनायनचलनसम्बन्धे स्वाभिमतं प्रश्नोत्तरं प्रदर्शितमिति विलोकनीयं विद्वद्भिरिति।

क्रान्तिमण्डले प्रकल्पितो रेवत्यन्तबिन्दुरश्विन्यादिबिन्दुर्वाऽऽर्यभटकालिकक्रान्तिविषुवन्मण्डलसम्पातरूपस्तथा प्रसिद्धोऽभूद्यदित एव सर्वग्रहाणां समन्दोच्चपातानां चलनानि सृष्ट्यादित आरब्धानि भगणपूर्तिस्थानमवधिर्वा तदेवेति सर्वेषामेव प्राचीनानां प्रतीतिरासीदिति तदनुसारेण ग्रहाणां राश्यादिभोगऋतुप्रवृत्तिर्द्वादशमासानां नामानि चेत्यादि तं बिन्दुमवधीकृत्यैव कृतं प्राचीनेनाद्यावधि तथैव प्रचलतीति तदन्यबिन्दोरवधित्वे सर्वमस्तव्यस्तं विपर्यस्तं वा भवतीति नवीना व्यवस्था स्वीकृता न भवति। सर्वापेक्षया प्राचीनो ब्रह्मसिद्धान्तस्त्रिविधोऽधुनोपलभ्यते। तत्र ब्रह्मगुप्तभास्करादयो विष्णुधर्मोत्तरपुराणान्तर्गतं गद्यरूपं ब्रह्मसिद्धान्तमेव स्वागमरूपेण स्वीकुर्वन्ति। तदुक्तं चैतत्—"तत्र सूर्योच्चपातैः सममेव लङ्काधो दक्षिणोत्तररेखायां फाल्गुनान्ते सर्व एव कल्पादावर्कदिने मीनमेषसन्धिगा भवन्ति कल्पावसाने चेति।" वेदवाक्यमिव मन्यमानास्तदन्यादृशीं स्थितिं स्वीकर्त्तुं तेषामापत्तिरासीदिति निष्कर्षोऽत्र प्रतीयत इति।

अथात्रैतादृशः प्रश्नो भवितुमर्हति। आकाशे कस्यापि मण्डलस्य स्थितिः कल्पनारूपैव भवति। तत्र किमप्यवधिस्थानं तस्य केनचिदन्येन मण्डलेन युक्तस्यैव सर्वत्रापि दृश्यते, परमत्र ४९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

क्रान्तिमण्डले रेवत्यन्तविन्दुरेवावधिरित्येव वा कथं स्वीक्रियते। अयनांशगत्या सर्वदैव पश्चिमाभिमुखं भ्रमतो भपञ्जरस्य क्रान्तिविषुवन्मण्डलसम्पातबिन्दोरेवावधित्वेन युक्त्या सिद्धत्वाद् रेवत्यन्तविन्दोस्तदन्यविन्दुर्निर्विशेषत्वेन सिद्धेश्च कथं ततः प्रभृत्येव सर्वदैव राश्यादिगणना प्राचीनगणकानामभिमता ? अस्याप्युत्तरं रेवत्यन्तविन्दौ सम्पातसमये नक्षत्रगणनाया मेषवृषादिगणनायाश्च प्रवृत्तिरेव जातेति सर्वथैव सिद्ध्यतीति विचारयन्तु विज्ञाः।

अथायनचलनसम्बन्धे प्राचीनानां ज्यौतिषिकाणां मतानि विवेचनानि च यथोपलब्धानि संक्षेपतो दर्शितानि। अधुना सिंहावलोकनवदेवायनचलनस्यैतिहासिकविवेचनेन तदनुकूलवर्षायनादिव्यवहार एव समीचीन इति सिद्धान्तं पुनरपि पुनरुक्तमिव प्रतिपादयामि। 'समरात्रिन्दिवे काले विषुवद्विषुवञ्च तत्' इति लक्षणलक्षितं विषुवद्दिनं वर्षद्वयसन्धिदिनं वा वर्षपूर्वापरार्धसन्धिदिनं वा ज्योतिःशास्त्रोक्तानां बहूनामेव गणनानां ज्ञातव्यविषयाणां चाधारभूतं वर्षाभ्यन्तरे वारद्वयमेव भवति। पञ्चषष्ट्यधिकशतत्रयमितेषु वार्षिकदिनेषु द्वे एव दिने विषुवद्दिनसंज्ञके भवत इति। अत्र ज्यौतिषोक्तभाषया परिभाषयैवमपि वक्तुं युक्तं यत् सर्वदैव क्रान्तिमण्डले सञ्चरन्नादित्यो यदा विषुवन्मण्डलं स्पृशति तदैव विषुवद्दिनमिति। त्रिज्याव्यासार्धवतोः कयोरपि द्वयोर्वृत्तयोरिव क्रान्तिविषुवन्मण्डलयोरपि स्थानद्वये योग इति तत्र गतवति भास्वति विषुवद्दिनमिति वस्तुतः क्रान्तिविषुवन्मण्डलयोः सम्पात एव विषुवत्स्थानम्। इदं स्थानञ्च शनैः शनैः पश्चिमदिशि सरतीति। अत्रेदमपि विदितमेव यत् क्रान्तिमण्डलं नाम रविचलनमार्गः। एतन्मार्गस्य महत्त्वं सर्वाधिकं ज्यौतिषशास्त्रे वर्त्तते यन् कुत्राप्यस्माद्बहिर्वर्त्तमानोऽपि ग्रहो नक्षत्रं वैतत्सहसमसूत्रद्वारेण क्रान्तिवृत्तस्थ एव कल्प्यते मन्यते वा। क्रान्तिवृत्तमिदञ्च स्वरूपवत्। यथाऽश्विन्यादिसप्तविंशतिनक्षत्राणि समसूत्रद्वारेणात्र तत्तद्बिन्दौ प्रकल्पितानि, तदनुसारेण मेषवृषादिद्वादशराशयोऽप्यत्र तथैव तत्तद्बिन्दुषु निवेशिता इति। अथ लङ्कादेशानुसारिपूर्वापरमण्डलरूपविषुवन्मण्डलं कल्पनास्वरूपमपि क्रान्तिमण्डलसम्पातबिन्दुद्वारेण चिह्नितं स्थिरीभूतं भवति। इदं विषुवत्स्थानं स्वलघुगत्या पश्चिमतश्चलति। तद्गतिः श्रीसूर्यसिद्धान्तोक्तभगणानुसारेणैकस्मिन् वत्सरे चतुःपञ्चाशद् विकलाः। मुञ्जालाचार्यमतेनैका कला। वेधकुशलानां साम्प्रतिकानां पाश्चात्यविदुषां मतेन प्रायः पञ्चाशद्विकला एवेति स्वल्पत्वात्तच्चलनं नयनगोचरं न केषामपि भवतीति। एकस्मिन् कृतत्रेताद्वापरकलियुगानां योगात्मके युगे ब्रह्मदिनस्वरूपे कल्पे वा ग्रहभगणानामत्रत्यायनचलनभगणानाञ्च तत्तत्सिद्धान्तपठिताः संख्यास्तत्तद्गतिवशेनैव पुरातनैर्निर्णीताः। ते च सर्वप्रथममार्यभटेनैव प्रकल्पिताः पठिता वेति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

साम्प्रतिकानामैतिहासिकं विवेचनम्। वस्तुत आर्यभटतः प्राचीनो न कोऽपि ज्यौतिषग्रन्थोऽधुनोपलभ्यते। वेदाङ्गज्यौतिषं पितामहसिद्धान्तश्चेति परमलघुग्रन्थद्वयं तदासन्नकालिक एव सूर्यप्रज्ञप्तिनामा जैनानां ज्यौतिषग्रन्थश्चेत्येतेषु वर्षारम्भायनारम्भप्रभृतिसमये निर्णीतेऽपि नायनचलनस्य कुत्राप्युल्लेखः। आर्यभटवराहमिहिरयोः स्वल्पान्तर एव समयः। तावेतौ ज्यौतिषिकौ गगनावलोकनगणितकुशलौ स्वसत्ताकाले रेवत्यन्तबिन्दावेव व्रासन्तं समरात्रमवलोक्य तदनुसारिग्रहगणितमकल्पयताम्। प्रायोऽस्मिन्नेव समये 'पौष्णान्ते भगणः स्मृत' इति प्रचलितमभूत्। एतयोरार्यभटो नायनचलनं जानाति स्म। वराहमिहिरस्त्वयनचलनं वस्तुगत्या स्वीकरोतीति 'नूनं कदाचिदासीत्' 'साम्प्रतमयनं पुनर्वसुत' इत्याद्युक्तिभिः प्रतीयते। अस्मात् किञ्चित्परवर्त्ती ब्रह्मगुप्तः 'स्थिरमयनद्वितयमपि तस्मात्' इत्युक्त्याऽयनचलनं खण्डयति। यतस्तत्समयेंऽशद्वयादल्पमेव रेवत्यन्तबिन्दोः सम्पातचलनं सिद्ध्यति। मुञ्जालाचार्याणां समये चतुर्वेदाचार्यपृथूदकसमये च स्वल्पान्तराः सार्धाः षडंशा रेवत्यन्तात् सम्पातस्यान्तरम्। भास्कराचार्याणां समये चैकादशांशास्तदन्तरमिति प्रत्यक्षोपलब्धं पश्चिमाभिमुखं सम्पातचलनं निर्विवादमुपपन्नम्। बहुत्रापि ज्यौतिषग्रन्थे ऋणायनांशचर्चा च श्रूयते। तत्र 'पौष्णान्ते भगणः स्मृत' इतिपरिभाषाविदो ज्योतिर्विदः सर्वेऽपि रेवत्यन्तबिन्दुमेव भचक्रस्यादिबिन्दुं मन्यमानास्तत्पूर्वदिशि विषुवद्दिनोल्लेखेन सम्पातः पूर्वाभिमुखमेव चलन्नासीदिति प्रत्ययवन्त आसन्। यन्मुञ्जालाचार्यः क्रान्तिचलनवदेव पूर्वपश्चिमयोर्दिशोरयनचलनं चतुर्विंशतिमंशान् यावन्मन्यते। श्रीसूर्यसिद्धान्ते तथा स्पष्टमनुल्लेखेऽपि तद्व्याख्यातृतः सर्वेऽपि मुञ्जालवदेव तत्सम्पातचलनं सप्तविंशत्यंशान् यावन्मन्यन्ते। यथा रेवत्यन्तबिन्दुतः पूर्वापरयोर्दिशोर्द्विर्द्विवारं सप्तविंशतिमंशान् यातीति चतुर्धा सप्तविंशत्यंशैरेकं भगणमिति रेवत्यन्तात् पूर्वदिशि सम्पातस्थितिमवलोक्य मेषादिगणनाहेतोर्ऋणायनांशमङ्गीकुर्वन्ति। वस्तुतस्तदानीन्तना गणकाः किमवगच्छन्त आसन्निति ज्ञातुमशक्यम्। क्रान्तेश्चलनवदयनचलनं भवतीति कथं ते ज्ञातवन्त इति नास्माकं ज्ञानगोचरयोग्यमस्ति। क्रान्तेश्चलनं तु वर्षाभ्यन्तरे दक्षिणोत्तरयोर्दिशोश्चतुर्विंशतिमंशान् यावत् चतुर्धा भवतीति प्रत्यक्षमापामरजना विलोकयन्ति जानन्ति च। अयनचलनं प्रायोऽष्टादशशतैर्वत्सरैः सप्तविंशत्यंशतुल्यं भवतीति स्थूलगणनया द्विसप्ततिशतमितैर्वत्सरैरेकोऽयनचलनभगण इति स्थिरीकरणं मानवप्रयासबाह्यमिति। समुपलब्धप्राचीनपरिस्थितिपर्यालोचनया तु पश्चिमाभिमुखमेव सम्पातापसरणमवगतं भवति। लोकमान्यतिलकलिखितस्य 'ओरायन'नाम्नो ग्रन्थ-

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. ...8371...

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्यावलोकनेन प्रथमं देवमातुरदितेर्नक्षत्रे पुनर्वसौ ततोऽपि मृगशिरसि नक्षत्रे सम्पात आसीदिति प्रमाणीभवति। पुनश्च महाभारतसमरसमये कृत्तिकानक्षत्रे सम्पात आसीदिति पूर्वं प्रतिपादितत्वादिदानीमपि ज्यौतिषोक्तदशाविचारादौ बहुत्रैव कृत्तिकादिनक्षत्रगणनावलोकनेन कुत्रचिच्च नष्टजातकगणितानुसारिनक्षत्रानयने धनिष्ठादिनक्षत्रगणनावलोकनेनावश्यं तदानीं कृत्तिकायां वासन्तं विषुवद्दिनं धनिष्ठायां चोत्तरायणारम्भ इति निःसंशयं सिद्ध्यति। इतो बहोः कालात्परतः सार्धसहस्रद्वयवत्सरानन्तरमार्यभटवराहमिहिरयोः समये चाश्विन्यां वासन्तं विषुवद्दिनमिति। तत्समयपर्यन्तं प्रायोऽयनपरिवर्त्तनदिनमस्थिरमिति न केषामप्यवगतमासीत्। अयनांशा इति प्रसिद्धं गणितं सायनगणना निरयनगणना वेति न कोऽपि भेदो विवादो वाऽऽसीत्। अतोऽनन्तरमेककलासन्नस्वगत्या पश्चिमाभिमुखं सञ्चरन् सम्पातबिन्दुः किञ्चित् कालान्तरे विवादास्पदमभूद्यद् विष्णुचन्द्रादयोऽनेके गणका रेवत्यन्तात् पश्चिमदिशि चलितं सम्पातबिन्दुमूचुर्यं ब्रह्मगुप्तादयो नाङ्गीचक्रुः। तस्मात् परतो मुञ्जालाचार्यश्चतुर्वेदाचार्यः पृथूदकश्च विशदं व्याख्याय क्रान्तिवत्तदपसरणं स्थिरीकृतवन्तौ। तत्परवर्त्ती महासिद्धान्तरचयिता द्वितीय आर्यभटोऽप्ययनचलनं स्फुटोक्त्या प्रतिपादयति। एतत्परवर्त्ती भास्कराचार्यस्तु हेतुवादपुरस्सरं तदयनचलनं प्रतिपादयति। भास्करतोऽर्वाचीनानां ग्रन्थकाराणां मध्ये न कस्याप्येतत्सम्बन्धे संशयलेशोऽप्यासीदिति तत्तद्ग्रन्थानामवलोकनेन विदितं भवति। अथाधुना द्वाविंशत्यंशासन्ना अयनांशाः पञ्चशतवर्षाभ्यन्तर एव सप्तविंशत्यंशात्मका भविष्यन्ति, तस्मात् परतः सम्पातबिन्दुरेवमेव पश्चिमाभिमुखमेव यास्यति परावृत्त्य पूर्वाभिमुखं वाऽऽयास्यतीति साम्प्रतिकानां गणकानां विवेचनीयं विद्यते। मुञ्जालाचार्यमतानुसारेण चतुर्विंशत्यंशपर्यन्तमेव सम्पातापसरणं मन्यते चेत् पञ्चशतवत्सरेभ्यः प्रथममेव सम्पातस्य पश्चिमाभिमुखमेव चलनं परावृत्त्य पूर्वाभिमुखं वेति परीक्षासमय आगमिष्यति।

अथात्र सम्पातस्थितिवशेन विवेचितः समयोऽत्यन्तं स्थूल इति तत्र पञ्चशतवर्षाण्यपि स्वल्पान्तरमेव भवितुमर्हति यन्नक्षत्रनिष्ठसम्पातबिन्दुवशेन सूक्ष्मसमयावबोधो दुःसाध्य एव। त्रयोदशांशेभ्योऽधिकः क्रान्तिमण्डलावयव एकनक्षत्रभोग इत्येकस्मिन्नक्षत्रे सम्पातावस्थितिः सहस्रवर्षासंन्नसमयं यावद्भवतीति तत्स्फुटभोगज्ञानमन्तरा न वास्तविकः समय आयातीति। प्राचीनग्रन्थेषु सम्पातस्थितेः स्फुटभोगो न वा तदानीं तदवबोधस्य कश्चिद्विधिरपि दृश्यत इति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अथ च विषयोऽयं सर्वजनविचारसापेक्ष इति मत्वा सकलसुधीजनावगमहेतोर्यथासाध्यं ज्योतिःशास्त्रोक्तभाषापरिभाषे विहायैव सर्वावगम्यभाषयैव प्रबन्धोऽयं लिखित इति तन्न्यूनतां तदतिरिक्तामप्युपलभ्यमानां त्रुटिं तथाऽयथोक्तमन्यथोक्तं वा यद्भवेत्तत्सकलमप्यमत्सरा मनीषिणः क्षमन्तामिति तान् सुजनान् मुहुरभ्यर्थयामि ।

पुरातनोक्तं विशदं विविच्य यदायने सञ्चलने रहस्यम् ।
ज्ञातं तदूचे बबुवाजिमिश्रः श्रीकृष्णमिश्रापरनामधेयः ॥

५३.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वेधः ।

श्रीबलदेवमिश्रः ।

यन्त्रादिना स्फुटग्रहज्ञानमेव वेधः, वेधो ग्रहदर्शनम् । इदानीं तदर्थं काशिकराजकीय-महाविद्यालये ज्यौतिषशास्त्रोन्नायकानां श्रीमतां शिक्षासचिवानां बाबूश्रीसंपूर्णानन्दमहोदयानां कृपया बहूनि यन्त्राणि संपादितानि सन्ति । तेषां सम्यगुपयोगार्थञ्च यत्नो विधीयते । अत्र विषये किं कर्त्तव्यमिति प्रस्तूयते—

प्राचीनानां गणकानां वेधविषये भिन्ना रीतिरासीत् । ते तु रेवत्यन्ततः क्रान्तिवृत्ते राशिगणनामकुर्वन् । तत्र तावद्भास्कराचार्येण ग्रहवेधार्थं या रीतिः प्रकाशिता सा चैवम्—

"तत्रादौ तावद्ग्रहवेधार्थं गोलबन्धोक्तविधिना विपुलं गोलयन्त्रं कार्यम् । तत्र खगोल-स्यान्तर्भगोल आधारवृत्तद्वयस्योपरि विषुवद्वृत्तम् । तत्र च यथोक्तं क्रान्तिवृत्तं भगणांशाङ्कितञ्च बद्ध्वा कदम्बद्वयकीलकयोः प्रोतमन्यचलं ग्रहवेधवलयम् । तच्च भगणांशाङ्कितं कार्यम् । ततस्तद्गोलयन्त्रं सम्यग् ध्रुवाभिमुखयष्टिकं जलसमक्षितिजवलयञ्च यथा भवति तथा स्थिरं कृत्वा रात्रौ गोलमध्यचिह्नगतया दृष्ट्या रेवतीतारां विलोक्य क्रान्तिवृत्ते यो मीनान्तस्तं रेवतीतारायां निवेश्य मध्यगतयैव दृष्ट्या चन्द्रं विलोक्य तद्वेधवलयञ्चन्द्रोपरि निवेश्यम् । एवं कृते सति वेधवृत्तस्य क्रान्तिवृत्तस्य च यः संपातस्तस्य मीनान्तस्य च यावदन्तरं तस्मिन् काले तावान् स्फुटचन्द्रो वेदितव्यः । क्रान्तिवृत्तस्य चन्द्रबिम्बमध्यस्य च वेधवृत्ते यावदन्तरं तावांस्तस्य विक्षेपः । ततो यावतीषु रात्रिगतघटिकासु वेधः कृतस्तावतीष्वेव पुनर्द्वितीयदिने कर्त्तव्यः । एवं द्वितीयदिने स्फुटचन्द्रं ज्ञात्वा तयोर्यदन्तरं सा तद्दिने स्फुटा गतिः । अथ तौ चन्द्रौ 'स्फुटग्रहं मध्यखगं प्रकल्प्य' इत्यादिना मध्यमौ कृत्वा तयोरन्तरं सा मध्यमा चन्द्रगतिः । तयाऽनुपातः । यद्येकेन दिनेनैतावती चन्द्रगतिस्तदा कुदिनैः किमित्येवं चन्द्रभगणा उत्पद्यन्ते । तथा चाह श्रीमान् ब्रह्मगुप्तः—

ज्ञातं कृत्वा मध्यं भूयोऽन्यदिने तदन्तरं भुक्तिः ।
त्रैराशिकेन भुक्त्या कल्पग्रहमण्डलानयनम् ।। इति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अनेन प्रकारेण प्राचीनगणका वेधेन ग्रहज्ञानं तद्वशतश्च कल्पभगणानयनमकुर्वन्। कल्पभगणज्ञाने इष्टकालेऽहर्गणं संसाध्य त्रैराशिकेन मध्यमग्रहज्ञानं ततो मन्दफलशीघ्रफलाभ्यां स्पष्टं ग्रहज्ञानं क्रियते। तथा चात्र विषये ब्रह्मगुप्तभाष्यकारश्चतुर्वेदाचार्य आह—

"यथा वैयाकरणाः प्रकृतिप्रत्ययागमलोपविकारैरसत्यरूपैः सत्यं शब्दसाधुत्वं प्रतिपादयन्ति यथा च भिषग्वरा उत्पलनालादिभिः शिरावेधादीन् प्रतिपादयन्ति तथैव सांवत्सराः पलावलम्बमन्दशीघ्रप्रतिमण्डलादिभिर्ग्रहगतितत्त्वं प्रतिपादयन्ति।"

परमिदानीं सा रीतिर्नष्टा। कोऽपि सांवत्सरो वेधं न करोति। जयपुराधीशेन महाराजेन जयसिंहेन पञ्चसु स्थानेषु यन्त्राणि वेधोपयोगीनि निर्मितानि, यत्रैकं स्थानं काश्या मानमन्दिरम्। परं कुत्रापि गणकेन वेधो न क्रियते। तत्र कालान्तरवशात् किञ्चित् स्थौल्यमपि जातम्।

युरोपदेशे सर्वत्र वेधालयः। तत्र गणका निरन्तरं वेधकार्यमेव कुर्वन्ति। तदर्थं राजकोषतस्तेषां गणकानां योगक्षेमरक्षणार्थं वृत्तयश्च कल्पिताः सन्ति।

अनेन वेधप्रकारेण तथा ग्रहज्ञानं न भवति यथा प्राचीनगणकैः पूर्वं कृतम्, किन्तु ग्रहाणां क्रान्तयः शरा विषुवांशाश्च ज्ञाता भवन्ति। तद्वशतः सायनग्रहज्ञानं भवति। अपेक्षितं तु मेषादितो ग्रहज्ञानम्, तदर्थं सायना ग्रहा निरयनाः कर्त्तव्याः, तदर्थमयनांशज्ञानमपेक्षितम्। अयनांशज्ञाने महान् विवादः, अत एव प्रथममयनांशा एव स्फुटीकर्त्तव्याः। एतदन्यदपि विचारणीयं वर्त्तते। अस्माकं ये ग्रहास्ते भूगर्भाभिप्रायिकाः, वेधेन ये ग्रहाः साधिता भवन्ति ते भूपृष्ठाभिप्रायिकाः, अतस्तदर्थं धरातलान्तरादिसंस्कारोऽपि देय एव।

एवं वेधोद्यता गणका मनसि सर्वं संप्रधार्य तदर्थं सन्नद्धा भवन्तु। विषुवांशादीनां ज्ञानात् क्षेत्रादीनां ज्ञानं प्राचीनपद्धतावप्यस्ति, परन्तु नवीनगणितप्रक्रियया सरलेनैव मार्गेण तेषां ज्ञानं भवति। तेन तदुपयुक्ता नवीनगणितविषया अपि प्रथममध्येतव्याः। आशासेऽत्र कार्यकुशला वेधविषयकयोग्यतानियमानपि शीघ्रं प्रकाश्य तत्रोद्यतान् सुयोग्यानाह्वयिष्यन्ति।

अत्र विषये उत्तरप्रदेशीयशिक्षासचिवानामुद्घाटनभाषणे[1] कथित एषोऽप्यंशः स्मरणीयः— "अस्माकं पाठशालानामियं परिपाटी अर्थहीनास्ति यदस्माभिः गणितसिद्धान्तज्यौतिषप्रभृतयो

१ १९५० ईशवीयमईमासस्य प्रथमदिवसे समस्तसंस्कृतपरीक्षासन्तुलनपरिषदि।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयास्तु साग्रहमध्यापयितुमिष्यन्ते, परन्तु गतायां शताब्दीत्रय्यां गवेषणमूलकतथ्यानां पाठ्यक्रमे समावेशो न विधेयः। एतत् कथयितुमसाम्प्रतं यदेतस्य यथार्थज्ञानस्याभावे फलित-ज्यौतिषस्य मूलभित्तिः– यां वयं वास्तविकविज्ञानं मत्वा पाठयामः-सन्देहास्पदमत्यन्तं द्रढिम्ना रहिता च भविष्यति।"

एतत्कथनस्यायमेवाभिप्रायो यद् वेधप्रक्रियया गतायां शताब्दीत्रय्यां गवेषणमूलकतथ्यानां निश्चयं कृत्वा तानि तथ्यानि च संगृह्य या वास्तवभित्तिर्ज्यौतिषस्य निर्मिता स्यात् तस्या उपर्येव फलितज्यौतिषमपि वस्तुतो फलिष्यति। तेनात्र वेधविषये बुभुत्सुभिर्ज्यौतिषच्छात्रैरुपेक्षा न विधेया; किन्तु नवीना परिपाटी सर्वथोपादेयरूपेणाधिगन्तव्या। प्रथमावस्थायामवश्यं कठिनता समागमिष्यति, यतो हि ज्यौतिषच्छात्राः प्राचीनपद्धतावाविष्टास्सन्ति तयैव पद्धत्या कार्यं कर्तुञ्च शक्ष्यन्ति। किन्त्वत्र नवीना रीतिः, नवीनं गणितम्, नवीनं यन्त्रम्, नवीना एवोपदेष्टारस्तेन प्राचीनपद्धत्या नवीनविषयाणां समन्वयं कृत्वा कार्यं संपादनीयं येन ज्यौतिषस्य कृते नवीनयुगारंभो भवेत्। ये गणकाः स्वस्वमतपोषणाय परस्परं विवादं कुर्वन्ति, तैः प्रत्यक्ष-शास्त्रस्य ज्यौतिषस्य सत्यता स्वचक्षुर्भ्यो विभाव्य सत्यप्रतिष्ठा करणीया—इति शम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शब्दविज्ञानम्

प्राचीनभारते भाषाविज्ञानम् ।

श्री को० अ० सुब्रह्मण्य अय्यर ।

भाषाविज्ञानमिति प्रसिद्धं यच्छास्त्रं तदाधुनिकं किञ्चिच्छास्त्रमित्येव प्रायेण सर्वेषां शिक्षितानां जनानां विचारः। अंशतो यथार्थ एवायं विचारः। यत आधुनिकैः शाब्दिकैर्जगति तत्र तत्र पुराद्यत्वे च प्रचलितानां भाषाणां यथा सविस्तरमध्ययनं क्रियते न तथा प्राचीनैः शाब्दिकैर्भारतीयैर्विदेशीयैर्वाऽध्ययनं कृतं दृश्यते। प्रायेण हि प्राचीनैः शाब्दिकैः स्वदेशीयानामेव भाषाणामध्ययनं कृतं न विदेशीयानामपि। पाणिनिकात्यायनपतञ्जलिप्रभृतिभिः प्राचीनैर्भारतीयैः शाब्दिकैर्भारतीयानां भाषाणां विशेषतः संस्कृतभाषाया अध्ययने महान् प्रयत्नः कृतः। तेषां प्रयत्नस्याद्भुतं फलमद्याप्यस्माकं पुरतो विलसति। आस्वाद्यते च तदस्माभिः। तेन च भवत्यस्माकं महती बुद्धिवृद्धिः शास्त्रज्ञानञ्च। परन्तु पाणिनिप्रभृतिभिः प्राचीनाचार्यैस्तदात्वे तत्र तत्र प्रचलितानां प्राप्तविकासानां लेटिन-ग्रीक्-आदिविदेशीयभाषाणामध्ययनं कृतमासीदित्यत्र किमपि प्रमाणं नोपलभ्यते। तथैव सुक्रात-अरस्तूप्रभृतीनां प्राचीनयवनाचार्याणां तदानीं समवाप्ताश्चर्यजनकविकासायाः संस्कृतभाषाया लेशतोऽपि ज्ञानमासीदित्यत्र किमपि प्रमाणं नोपलभ्यते। स्वसंस्कृतौ पक्षपातः परसंस्कृतेर्वैमुख्यमित्युभयमिदं स्वाभाविकमासीत् प्राचीनानां भारतीयानां विदेशीयानाञ्च विदुषाम्। आधुनिकवैदुष्यस्यायमेव विशेषो यत्तस्य स्वसंस्कृतौ परसंस्कृतौ च तुल्योऽभिनिवेशः। अत एवाधुनिकाः पाश्चात्त्या विद्वांसः संस्कृतभाषायाः संस्कृतवाङ्मयस्य चाध्ययने महान्तं प्रयत्नं कुर्वन्ति। तथैवाधुनिका भारतीयाः शाब्दिकाः संस्कृतप्राकृतादिस्वदेशीयभाषा इव पाश्चात्त्यभाषाः पाश्चात्त्यसाहित्यानि च परिशीलयन्ति।

एवं स्थितेऽपि विदेशीयभाषाध्ययने कृत एव भाषाविज्ञानस्य भवति समुल्लास इति वक्तुं न शक्यते। मा भवन्तु प्राचीनभारतीया विदेशीयभाषाभिज्ञाः। तथापि प्राचीनभारते भाषाविज्ञानं नाम शास्त्रं प्रादुरभूद् विकासञ्च प्रापेत्यत्र नास्ति सन्देहः। प्राचीनभारतीय-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कृतेर्ग्रहणार्हः स्मरणार्हश्चायं विशेषो यदतिप्राचीनकाल एव तत्प्रभावितचेतसां विमर्शकानामाचार्याणां वाग्विषयकं शब्दविषयकञ्च महत् कुतूहलं प्रादुरभवत्, येन तत्स्वरूपावबोधने तैर्महान् परिश्रमः कृतः। तत्स्वरूपबोधकानि बहूनि शास्त्राणि च तैः प्रतिष्ठापितानि।

आसीदस्मिन् विषये त्रिविधा विचारशैली, अथवा त्रिविधा दृष्टिरस्माकं मुनीनामृषीणाञ्च।

प्रथमतस्तावदस्माकं चिरन्तनानामृषीणां मनुष्यस्वरूपविषये महती विचिकित्सासीत्। मनुष्यस्य किं स्वरूपम्। तस्य कानि कान्याध्यात्मिकानि तत्त्वानि। तेषाञ्च किं स्वरूपम्। इत्येवमादीन् विषयानधिकृत्य तैर्बहुधा मननं कृतम्। वाक् च मनुष्यस्याध्यात्मिकेषु तत्त्वेष्वन्यतममिति तामप्यधिकृत्य तैः सुसूक्ष्मं विचारः कृतो दृश्यते। केयं वाक्, तस्या मनुष्यसंनिधिभिरितरैस्तत्त्वैः सह कः सम्बन्धः। इत्यादीन् प्रश्नान् समुद्भाव्य तेषां बहुधा समाधानं कृतम्। ब्राह्मणग्रन्थेषूपनिषत्सु च वाक्स्वरूपावेदकान्यसंख्यानि वाक्यानि समुपलभ्यन्ते येषु निपुणं विचार्यमाणेषु वाग्विषयकाणां मतानां महद् वैचित्र्यं प्रतीयते। तद्यथा—

(क) सा या सा वागासीत् सोऽग्निरभवत्, वागिति पृथिवी, वागित्यन्तरिक्षम्–इति जैमिनीयोपनिषद्ब्राह्मणे (२-२-१; ४. २२. ११)

(ख) वाग् हि यज्ञः, वाग् वै ब्रह्म इत्यैतरेयब्राह्मणे (५. २३; ५. २४)

(ग) वाग् वै मतिः। इति यजुर्वेदे (१३. ५८)

(घ) वाक् प्रजापतिः, सा या सा वागसौ स आदित्यः।

इति शतपथब्राह्मणे (१०. ५. १. ४)

(ङ) वाग् वै वायुः। इति तैत्तिरीयब्राह्मणे चोपलभ्यमानानि तत्सदृशान्यन्यत्र च दृश्यमानानि वाक्स्वरूपबोधकानि वाक्यानि वाचः सकलतत्त्वान्तराभेदं द्योतयन्ति। एतानि वाक्यानि पठतामस्माकमृग्वेदीयदशममण्डलस्य पञ्चविंशत्युत्तरशततमं सूक्तं स्मृतिपथमायाति यस्मिन्नांभृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी ब्रह्मणा तादात्म्यमनुभवन्ती सर्वजगद्रूपेण सर्वस्याधिष्ठानत्वेन चाहमेव सर्वं भवामीति स्वात्मानं स्तौति। इदं सर्वस्य वागात्मकत्वरूपं शब्दाद्वैतनाम्ना प्रसिद्धं तत्त्वमेव प्राचीनभारतीयभाषाविज्ञानस्य मूलतत्त्वं यदानागेशं सर्वैर्वैयाकरणैः, विशेषतस्तत्रभवद्भिर्महावैयाकरणैर्भर्तृहरिभिः स्वकीये वाक्यपदीये विस्तरतो वर्णितमुपलभ्यते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

द्वितीया दृष्टिरासीद् विशेषतो भारतीयदार्शनिकानाम्। तेषां विचारविषयेष्वन्यतमोऽयमासीद् यत् प्रमाणानि कति स्वीकर्तव्यानि, तेषां किं स्वरूपम्, तेषाञ्च परस्परं किं वैलक्षण्यमिति। तत्र केचित् सांख्यनैयायिकादयः शब्दस्यापि प्रमाणकोटौ सन्निवेशं कुर्वन्ति। बौद्धवैशेषिकादयस्तु तन्नाभ्युपगच्छन्ति, शब्दस्यानुमानेऽन्तर्भावमिच्छन्ति। उभयेऽपि वादिनः शब्दस्य स्वरूपं तस्यार्थप्रत्यायनप्रकारञ्च सम्यगवबुद्ध्यैव स्वपक्षस्थापनं कुर्वन्ति स्म। तदवबोधने तद्विषयकपरपक्षप्रतिक्षेपे च सर्वैरपि दार्शनिकैर्महान् प्रयत्नः कृतः। येन दार्शनिकग्रन्थेषु शब्दविषयको महान् ज्ञानराशिः सञ्चितो दृश्यते। अयञ्च ज्ञानराशिर्न केवलं दार्शनिकानामुपयोगी भवति स्म; शाब्दिकैरपि शब्दस्वरूपावबोधनेऽर्थतत्त्वनिर्धारणे चास्य ज्ञानराशेराश्रयणं कृतमिति भर्तृहरिविरचितवाक्यपदीयावलोकनेन सर्वैः स्वीकरिष्यते।

येयं तृतीया दृष्टिः शब्दस्य स्वरूपावबोधने सा किल शाब्दिकानां प्रातिस्विकी दृष्टिः। भारतीयसंस्कृतौ भगवतो वेदस्य कीदृशं स्थानमिति जानन्त्येव विद्वांसः। निखिलस्यापि धर्मस्य निखिलाया अपि संस्कृतेर्वेदमेव मूलं मन्यमानाः प्राक्तना ऋषयो मुनयश्च वेदरक्षामात्मनो मुख्यकर्तव्यत्वेनाङ्गीचक्रुः। तदर्थं बहूनुपायान् प्रायुञ्जत। यानीमानि वेदाङ्गानि तानि सर्वाण्यपि वेदरक्षाप्रयोजनकानीति विदितमेवैतत् सर्वेषाम्। व्याकरणशास्त्रप्रयोजनेषु वेदरक्षा प्रथमत एव परिगणिता भगवता पतञ्जलिना, "रक्षोहागमलघ्वसंदेहाः प्रयोजनम्" इति वदता। शिक्षासंज्ञकस्य वेदाङ्गस्यापि वेदरक्षैव प्रयोजनमिति न विशिष्य कथनमर्हति। तस्मिन् हि वेदाङ्गे वैदिकशब्दगतवर्णानां स्थानकरणप्रयत्नादिनिरूपणेनोच्चारणविधिः सुष्ठु वर्णितो दृश्यते। अद्य खलु भाषाविज्ञानस्य त्रयो विभागाः स्वीक्रियन्ते, वर्णविज्ञानं रूपविज्ञानं अर्थविज्ञानमिति। यानि आङ्ग्लभाषायां Phonetics, Morphology, Semantics इति नाम्ना प्रसिद्धानि। वर्णविज्ञानमेव प्राचीनशिक्षाग्रन्थानामेको विषयः। वैदिकशब्दगतानां वर्णानामुच्चारणविधिराचार्यैः प्राचीनशिष्टाचारं सम्यक् परीक्ष्य वर्णोच्चारणसमये तेषु तेषु कण्ठादिस्थानेषु सम्भवतः संयोगविभागान् यथावदुपलक्ष्य स्वानुभवञ्चावलम्ब्य कृत इति शिक्षाग्रन्थान् प्रातिशाख्यानि च दृष्टवद्भिः सर्वैरपि स्वीकर्तव्यं भवति। यद्यप्यद्यत्वे पाश्चात्त्यैर्विद्वद्भिर्न केवलं स्वान्तःपरीक्षया, परन्तु यन्त्रादिप्रयोगेणापि वर्णस्वरूपावबोधने प्रयत्नः क्रियत इति वर्णस्वरूपस्य यथावदवबोधनं तेषामधुना सुलभं तथापि वैदिकशब्दगतवर्णस्वरूपप्रतीतिः परम्परागतोच्चारणसम्प्रदायज्ञानसहितशास्त्रज्ञानाद् यादृशी भवति न तदधिका यन्त्रादिप्रयोगेणापि भवतीति सर्वसम्मतमिदमधुना तत्त्वम्। अभिनिधानानुस्वारह्रस्वदीर्घ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्लुतानां स्वरूपवर्णनं यत् प्रातिशाख्यकारैः कृतं तत् सर्वथा यथार्थम्। अस्त्यन्यदपि। स्थान-करणप्रयत्नादिनिरूपणपूर्वकं वर्णोच्चारणविधिवर्णनं यच्छिक्षाग्रन्थेषु प्रातिशाख्येषु च दृश्यते तदिदम्प्रथमतया प्राचीनैर्भारतीयैरेव विद्वद्भिः कृतमिति महद् गौरवास्पदमिदं प्राचीनभारतीय-भाषाविज्ञानस्य। प्राचीनयवनविद्वद्भिः कृतं स्वभाषागतवर्णस्वरूपवर्णनमप्युपलभ्यतेऽधुना। न तैरियं शैली समादृता दृश्यते। इयमेव शैली यथार्था वर्णतत्त्वयथावदवबोधानुकूला चेति स्वीक्रियते सर्वैर्वर्णविज्ञानकोविदैः। शिक्षाकारैः संस्कृतभाषाया वर्णस्वरूपविषये यद्यदुक्तं तस्य वास्तविकत्वं प्राचीनशिलालेखभाषास्वरूपपरीक्षयाधुनिकभाषाविज्ञानसम्मततत्त्वानुगुण्येनाद्यापि तत्र तत्र व्यवह्रियमाणदेशभाषावर्णस्वरूपसाम्येन च साधयितुं शक्यते। या शैली प्राचीनैः शिक्षाकारैः समादृता तामवलम्ब्य यन्त्रादिप्रयोगञ्च समाश्रित्याधुनिकैर्वर्णविज्ञानकोविदैर्जगति विद्यमानानां सर्वासामपि भाषाणां वर्णस्वरूपावबोधने प्रयत्नः क्रियत इति प्राचीनभारतीयवर्ण-विज्ञानादेव प्राप्तवेगमाधुनिकं वर्णविज्ञानमिति केवलं वस्तुस्थितिमात्रकथनमेतत्।

शिक्षानामकेन वेदाङ्गेनाधुनिकभाषाविज्ञानस्य यावानुपकारः कृतस्तदपेक्षयापि शतगुण उपकारः कृतो व्याकरणशास्त्रेण। व्याकरणमित्यतीव प्राचीनमिदं शास्त्रं भारते। परन्तु न केवलं प्राचीनत्वकृतं तस्य महत्त्वम्। विदितमेवैतत् सर्वेषां यत् क्रिस्तीये ऊनविंशे शताब्दे यदा पाश्चात्त्यैर्विद्वद्भिर्भगवत्पाणिनिकृताष्टाध्याय्या इदम्प्रथमतया परिचयः कृतस्तदाप्रभृत्ये-वाधुनिकभाषाविज्ञानस्य पारमार्थिकी उन्नतिः प्रारभत इति। तत्र को हेतुः। अयमेव हेतु-र्भवितुमर्हति यत्तैरष्टाध्याय्यां केचिद् गुणा दृष्टाः, कानिचित् तत्त्वानि समुपलब्धानि, येषां साहाय्येन तैः पृथिवीगतसर्वभाषाणामध्ययनं कृतम्। मानुष्या वाचः किं स्वरूपम्, भाषागतानां रूपाणां कथमन्वाख्यानं कर्तव्यम्, प्रकृतिप्रत्ययविभागः कथं कर्तव्यः, प्रत्ययवाच्यानामर्थानां कथं निरूपणं कर्तव्यमित्येवंविधानां भाषातत्त्वावबोधनिरतैरवश्यसमाधेयानां प्रश्नानां समाधानं यथा मुनित्रयकृतीनां सम्यक् परिशीलनेन भवितुं शक्नोति न तथान्यग्रन्थपरिशीलनेन।

आधुनिकशाब्दिकमतेन भगवतः पाणिनेरपि प्राचीनैर्यास्काचार्यैः स्वकीये निरुक्ते भाषाविषयकाः केचित् प्रश्नाः समुद्भाविताः, येऽत्यन्तं सरसा महत्वपूर्णाश्च भवन्ति। संस्कृत-भाषायां कतिविधानि पदानि सन्ति, किमाख्यातानीव नामान्यपि धातुजानि, उपसर्गाणां कः कोऽर्थ इत्यादयः प्रश्नास्तत्र समुद्भाविता दृश्यन्ते। सर्वाण्यपि नामानि धातुजानीति शाकटायन-मतमनुवदद्भिर्यास्काचार्यैस्तस्य स्वसम्मतत्वमपि सूचितम्। मतमिदं प्रायो भगवतः पाणिनेरपीष्ट-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मेवेति प्रतीयतेऽष्टाध्याय्याः परिशीलनेन। भाषागतानि प्रायः सर्वाण्यपि पदानि धातुजानीति, धातुर्नाम भाषाया मूलाधारभूतं वस्त्विति, केवलो धातुर्न प्रयोगार्हः प्रत्ययसंस्कृत एव प्रयोगार्ह इत्यादीन्यधुना सर्वैः पाश्चात्यैः पौरस्त्यैश्च शाब्दिकैः स्वीकृतानि तत्त्वानि प्राचीनभारतीयवैयाकरणैरेवाविष्कृतानीति कथनं केवलं वस्तुतत्त्वप्रतिपादनं भवति। यस्यां शताब्द्यामेतानि मतानि भारतीयशाब्दिकैरिदम्प्रथमतयाविष्कृतानि तदानीन्तनविदेशीयशाब्दिकानां तत्त्वानामेतेषां बोधोऽपि नासीदिति सर्वसम्मतमेतत्।

अस्माकं व्याकरणशास्त्रस्यायमपरो विशेषो यदत्र न केवलं रूपसिद्धिप्रक्रिया सविस्तरं प्रदर्शिता वर्तते, परन्तु बहूनां दार्शनिकानामपि विषयाणामत्र विवेचनं कृतं दृश्यते। व्याकरणशास्त्रस्य विकासे दर्शनानां प्रभावो यथा भारते समभवन्न तथान्यदेशेषु। एतावदेव न, व्याकरणमपि दर्शनत्वेन गण्यते। अत एव माधवाचार्यकृते सर्वदर्शनसंग्रहे वर्णितेषु षोडशदर्शनेषु पाणिनिदर्शनमप्येकं भवति, यदपि मोक्षोपायत्वेन पुरस्क्रियते। सन्ति बहवो विषया ये दर्शनव्याकरणसाधारणाः। बहवः पारिभाषिकशब्दा अप्येवम्भूताः सन्ति ये व्याकरणग्रन्थेषु दृश्यन्ते दार्शनिकग्रन्थेष्वपि। जाति-द्रव्य-गुण-संबन्ध-दिक्-कालादीनां स्वरूपनिरूपणं यथा तत्तद्दार्शनिकैः कृतं तथा वैयाकरणैरपि।

एवं व्याकरणस्य दर्शनानां चांशतो विषयसाम्ये पारिभाषिकशब्दसाम्ये च सत्यपि पदार्थविचारे तत्स्वरूपनिरूपणे व्याकरणस्य दृष्टिरन्या, दर्शनानाञ्च दृष्टिरन्या भवतीति स्पष्टमुक्तं प्राचीनैर्वैयाकरणैः। सुष्टु व्याख्यातश्चायं दृष्टिभेदो हेलाराजेन।

परन्त्वस्माभिरादौ यानि महाभाष्यवाक्यान्यवलम्ब्य हेलाराजेनायं दृष्टिभेदो व्याख्यातस्तानि सम्यग् विचारणीयानि। व्याकरणं नाम वेदाङ्गेष्वन्यतमम्। परन्तु न तत् कस्याश्चिद् वेदशाखायाः प्रातिस्विकमङ्गम्। अपि तु सर्ववेदसाधारणम्। यथोक्तं भगवता पतञ्जलिना—

"सर्ववेदपारिषदं हीदं शास्त्रम्। तत्र नैकः पन्थाः शक्य आस्थातुम्।" इति।

(महाभाष्यम्-६-३-१४: २-१-५८)

एकमिदं वाक्यं वैयाकरणदृष्टिसूचकम्। अस्त्यन्यदपि वाक्यं वैयाकरणदृष्टिद्योतकं पातञ्जलमहाभाष्ये। तच्चेदम्। यदि साधुशब्दज्ञानाद्धर्मस्तर्हि वैयाकरणसुलभादसाधुशब्दज्ञानाद्धवेदधर्म इत्याक्षेपे कृते समाधत्त आचार्यः— ६१

६

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्च शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्मम्।" इति। (महाभाष्यम्–१-१-१)।

अत्र च शब्दशब्देन श्रुतिरभिप्रेता। 'एकः शब्दः सम्यग् ज्ञातः शास्त्रान्वितः सुप्रयुक्तः स्वर्गे लोके कामधुग् भवति' इतीयं श्रुतिर्हि शब्दज्ञाने धर्ममाह नापशब्दज्ञानेऽधर्मम्। एवं 'अयं दण्डो हरानेन' इत्यत्र किं दण्डोऽस्तिक्रियायाः कर्ता, अथवा हरणक्रियायाः करणमिति सन्देहे जाते हरणक्रियायाः करणमिति पूर्वपक्षिणोक्ते समाहितमाचार्येण—

"शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्। शब्दश्चेह सत्तामाह। अयं दण्डः। अस्तीति गम्यते। स दण्डः कर्ता भूत्वान्येन शब्देनाभिसम्बध्यमानः करणं सम्पद्यते" इति। (महाभाष्यम्–२-१-१)

अत्र शब्दशब्देन न श्रुतिरभिप्रेता। शब्दसामान्यमेवाभिप्रेतम्।

एवं पातञ्जलमहाभाष्ये मतद्वयमस्माभिरुपलभ्यते। एकं तावत् व्याकरणस्य सर्ववेदपारिषदत्वम्। अपरञ्च वैयाकरणानां शब्दप्रमाणकत्वम्। इदं मतद्वयमप्यर्वाचीनैर्वैयाकरणैरात्मसात्कृतम्, परन्तु किञ्चित् परिवर्त्य।

यदिदं व्याकरणस्य सर्ववेदपारिषदत्वं भाष्य उक्तं तदर्वाचीनवैयाकरणकृतिषु सर्वपारिषदत्वमर्थात् सर्वदर्शनपारिषदत्वं सञ्जातम्। भगवान् भर्तृहरिः किलासीद् अद्वैती। तथापि स्वकीये वाक्यपदीये न केवलमद्वैतदृष्ट्या वैयाकरणसिद्धान्तानुपपादयति, परं त्वन्यदर्शनदृष्ट्यापि। अत्र को हेतुरिति नैसर्गिकीयमस्मादृशानां जिज्ञासा समुल्लसति। तत्र समाधत्ते व्याख्याकारो हेलाराजः—

"परमार्थदृष्ट्यात्र सर्वपार्षदत्वात्पुनरस्य शास्त्रस्य दर्शनान्तरोपन्यासः। एष च सर्वत्रैवास्य ग्रन्थकारस्याभिप्रायः। पदार्थचर्चाविषये ब्रह्मदर्शननयेनैव सम्बन्धादिविचारे विनिगमनात्।" (वाक्यपदीयम्–३, जातिसं० श्लो० ३५)

वैयाकरणसिद्धान्ता अनेकदर्शनदृष्ट्या व्याख्याताः सन्तः शोभन्ते। अत एव तत्रभवान् भर्तृहरिरपि तत्तद्दर्शनदृष्ट्या वैयाकरणतत्त्वानि व्याचष्टे। यद्यप्येवं तथापि ग्रन्थकर्तुः कस्मिंश्चिद्

दर्शनविशेषे पक्षपातो न वार्यते। यथा तत्रभवतो भर्तृहरेरद्वैतदर्शने पक्षपातः। स्वकीये वाक्यपदीये पदे पदे स्वकीयाद्वैतमतानुयायित्वं प्रदर्शयन्नपि भगवान् भर्तृहरिर्यथावसरमन्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दर्शनदृष्ट्यापि व्याकरणसिद्धान्तान् प्रतिपादयति । तत्र द्वित्राण्युदाहरणान्यस्माभिः प्रदर्शनीयानि ।

वैयाकरणानामयं सिद्धान्तो यच्छब्दः स्वं रूपं स्वमर्थं वक्तुरभिप्रायञ्च बोधयतीति । तत्र स्वरूपस्यार्थस्य च परस्परं वाच्यवाचकभावः सम्बन्धः । स्वरूपवक्त्रभिप्राययोश्च परस्परं कार्यकारणभावः सम्बन्धः । सम्बन्धद्वयमपि वाक्यपदीये प्रतिपादितं दृश्यते । तत्रायं प्रश्नः समुल्लसति—वाच्यवाचकभावस्य प्रतिपादनं वैयाकरणानां स्वाभाविकम् । परन्तु कोऽयं हेतुर्येन तत्रभवान् भर्तृहरिः कार्यकारणभावमपि प्रतिपादयतीति । अत्र हेलाराजः समाधत्ते—

"सर्वपार्षदं पुनरिदं शास्त्रमिति ये बाह्यस्यार्थस्य शब्दवाच्यत्वं नेच्छन्ति तन्मतोपस्कारार्थं वक्त्रभिप्रायारूढस्यैव शब्दार्थत्वे तत्र कार्यकारणसम्बन्धमाह प्रयोक्त्रभि·ायेण सह तु कार्यकारणभावः ।" इति । (वाक्यपदीयम्-३. संसं. श्लो. १)

अस्त्यन्यदप्युदाहरणम् । सत्ताद्वैतवादिनो भवन्ति वैयाकरणाः । तदनुसारेण सर्वेषां पदानां पदांशानाञ्च सत्तैव प्रवृत्तिनिमित्तमिति । सत्ता च ब्रह्मैव । घटपटादिशब्दवाच्या घटत्वपटत्वादयो जातयोऽस्या सत्ताया एव विवर्तरूपा असत्याश्च । न पारमार्थिकाः । सत्तैव परमार्थसती । इत्यद्वैतिना भर्तृहरिणा प्रथमं प्रतिपादितम् । तदनन्तरं सत्ताद्वैतं सांख्यनयेनाप्युपबृंहयितुमाह—

"एते सत्तामात्रस्यात्मनो महतो यद्विशेषाः परिणामाः, यतः परं विशेषेभ्यो लिङ्गमात्रं महत्तत्वं तस्मिन्नेते सत्तामात्रे महत्यात्मन्यवस्थाय विवृद्धिकार्यमनुभवन्ति । प्रतिसंसृज्यमानाश्च तस्मिंश्च सत्तामात्रे महत्यात्मन्यास्थाय यत्तन्निःसत्तासन्तं निःसदसदव्यक्तमलिङ्गं तस्मिन् प्रतियन्तीत्येवं सांख्ये बुद्धितत्त्वं महच्छब्दवाच्यमाद्यं जगत्कारणं निर्दिष्टमित्यतोऽनन्तरस्य विकारग्रामस्य कारणरूपानुगमात् सत्तारूपत्वमविरुद्धमिति सत्तारूपं सर्वं जगदाख्यातं भवतीति सत्ताद्वैतः सांख्यनयेनाप्युपबृंहितः ।" इति । (वाक्यपदीयम्–३, जाति. श्लो. ३४) ।

सति सम्भवे वैयाकरणैः शास्त्रान्तरप्रसिद्धानि लोकप्रसिद्धानि वा तत्त्वान्यवलम्ब्य रूपाणामन्वाख्यानं क्रियते । यत्र त्वेवं कर्तुं न शक्यते तत्र स्वकीय एव सिद्धान्त आस्थीयते तैः । तथा हि वैशेषिकशास्त्रप्रसिद्धं जातिभिन्नत्वे सति क्रियाभिन्नत्वे सति द्रव्यभिन्नत्वे सति समवेतत्वं गुणत्वमिति गुणलक्षणमवलम्ब्य 'वोतो गुणवचनात्' 'गुणवचनब्राह्मणादिभ्यः कर्मणिच'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'प्रकारे गुणवचनस्य' इत्यादीनि सूत्राणि 'गुणवचनेभ्यो मतुपो लुक्' इति वार्तिकञ्च प्रणीतानि। परन्तु नानेन गुणलक्षणेन सर्वेषां रूपाणामन्वाख्यानं सिद्ध्यतीति वैयाकरणैः स्वशास्त्रोचितमन्वाख्येयरूपसमुन्नेयं गुणलक्षणं समुत्प्रेक्षितं यद् भगवद्भर्तृहरिकृते वाक्यपदीय इत्थं भवति—

"संसर्गि भेदकं यद् यत् सव्यापारं प्रतीयते।
गुणत्वं परतन्त्रत्वात्तस्य शास्त्र उदाहृतम्॥"

(वाक्यपदीयम्-गु० श्लो० १)

एवं सति सम्भवे वैयाकरणैः शास्त्रान्तरप्रसिद्धानि तत्त्वान्यवलम्ब्य रूपाणामन्वाख्यानं क्रियते। अन्यथा स्वसिद्धान्त आस्थीयते। कां दृष्टिमवलम्ब्य स्वसिद्धान्त आस्थीयत इति चेत्' प्रतिपादितैवेयं दृष्टिर्भगवता पतञ्जलिना-'शब्दप्रमाणका वयम्। यच्छब्द आह तदस्माकं प्रमाणम्'इति। असकृदुल्लिखितेयं दृष्टिर्हेलाराजेन स्वकीये वाक्यपदीयव्याख्याने—'यतो वैयाकरणाः शब्दप्रमाणकाः, अतस्तेषां शब्दार्थोऽर्थः न वस्त्वर्थोऽर्थः। तेषां कृते शब्द एव यथार्थमभिधत्ते। तथैव तस्याभिधानमुपपन्नम्। न वस्तुमुखप्रेक्षितया।' इति। यदत्र हेलाराजेनोक्तं वैयाकरणानां न वस्तुमुखप्रेक्षितेति तेनैव वैयाकरणानां दार्शनिकानाञ्च भेदः स्फुटो भवति। दार्शनिका भवन्त्यवश्यं वस्तुमुखप्रेक्षिणः। वस्तूनां विवेचनं तेषां साधर्म्यवैधर्म्यनिरूपणमेव, दर्शनमित्युच्यते। यदि व्याकरणस्य न वस्तुमुखप्रेक्षित्वं तर्हि वस्तुतः शाब्दिका दार्शनिका न भवन्ति। इयमेव दृष्टिराधुनिकानां विशेषतः पाश्चात्यानां शाब्दिकानाम्। ते ह्यात्मानं न दार्शनिकेषु गणयन्ति। ते ह्यात्मानं शाब्दिकानेव मन्यन्ते। मन्यन्ते च शब्दशास्त्रं पदार्थशास्त्रेभ्यो बाढं भिन्नं स्वरूपतो विषयतश्च। नास्माकं प्राचीनशाब्दिकानामियं दशा। ते हि शब्दशास्त्रस्य दर्शनत्वमपीच्छन्ति शाब्दिकानां दृष्टिं दार्शनिकदृष्टेर्भिन्नामपि मन्यन्ते। इत्येव तेषां विशेषः।

येयं वैयाकरणानां शब्दार्थमुखप्रेक्षिता न वस्तुमुखप्रेक्षिता, तया वैयाकरणानां सिद्धान्तेषु कश्चिद् विशेषः समायाति यः सर्वथा ग्रहणार्हः। इमां दृष्टिं समाश्रित्यैव तैर्बहूनां प्रश्नानां समाधानं कृतम्। को नाम कालः, क्रियायाः किं लक्षणम्, सर्वेषां शब्दानां किं जातिरेवार्थोऽथवा द्रव्यम्, गुणस्य किं स्वरूपम्, द्रव्यस्य किं लक्षणमित्यादीनां प्रश्नानामुत्तरं तैरिमां दृष्टिं समाश्रित्यैव कृतम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कालविषये सन्ति बहूनि मतानि । तेषु कानिचिद् वर्णितानि वाक्यपदीये । तद्यथा—

(क) वैशेषिकाः कालं नित्यमेकं विभु जन्मादिक्रियाद्वारेण भावपरिच्छेदकं क्रियाव्यतिरिक्तं मन्यन्ते । जन्मादिमतां पदार्थानां काल एव निमित्तकारणम् । कालो हि प्रतिबन्धाभ्यनुज्ञाभ्यां विश्वं पौर्वापर्यविभागेन विभजते । कालेन प्रयुक्ताः कारणशक्तयो जनयन्ति कार्यम् ।

(ख) अद्वैतिनस्तु, अक्रमब्रह्मविवर्तरूपं विश्वम् । तस्य यदिदं क्रमेणावभासनं तत् कालशक्तिकृतप्रतिबन्धाभ्यनुज्ञासामर्थ्यम् । कालो हि ब्रह्मशक्तिरविद्यैव क्रमावभासकारितया जीवात्मसु सफला । क्रमावभास एव प्रथमः कालव्यापार इति मन्यन्ते ।

(ग) केचित् पुनरभिन्नेन कालेन व्यवहर्तुमशक्यत्वाद् य एव तद्भेदोपाधिः क्रियादिः परिकल्प्यते स एव व्यवहारनिमित्तं किमदृश्यमानेनानुपपन्नेन कालात्मना कृत्यमिति वदन्ति ।

(घ) कालतत्त्वं नास्ति, अन्यो बाह्यः कश्चित् काल इति बौद्धाः । एवं कालविषये विप्रतिपत्तिषु स्थितासूपसंहरति हेलाराजः—

"नास्माभिर्दर्शनविवेकः प्रारब्धः, किन्तु शाब्दे व्यवहारे यदङ्गं तत् परीक्ष्यम् । अस्ति च भिन्नकालः शाब्दो व्यवहारः, अभूत्, अस्ति, भविष्यतीति । तत्र यथायोगमविचारितरमणीयः कालोऽभ्युपगन्तव्य" इति । (वाक्यपदीयम्, ३ काल० श्लोक ५८)

एवं शाब्दव्यवहारं समाश्रित्य न वस्तुमुखप्रेक्षितया कालविषये निर्णयः कृतो हेलाराजेन ।

एवमेव जातिविषयेऽपि । वैशेषिका अनवस्थाभिया जातौ जातिं नाभ्युपगच्छन्ति । निःसामान्यानि सामान्यानीति तेषां सिद्धान्तः । वैयाकरणास्तु तन्न सहन्ते । तेषाञ्चायमभिप्रायः । वैशेषिकाणां भवन्तु निःसामान्यानि सामान्यानि । वैयाकरणानां शब्दार्थोऽर्थ इत्यभ्युपगच्छतामन्वयिरूपावच्छेदेन शब्दस्य प्रत्ययस्योत्पत्तेर्जातिष्वपि जातिरविरुद्धाऽभ्युपेया ।

जातिर्नाम केति प्रश्ने समुद्भाविते वैयाकरणाः कथयन्ति—स्वकीयां शब्दार्थोऽर्थः न वस्त्वर्थोऽर्थ इति दृष्टिमवलम्ब्य—व्यक्तिषु यदन्वयि, अभिन्नाभिधानप्रत्ययावसेयञ्च सैव जातिः । अत एव गुणोऽप्यन्वयिरूपेणाभिधीयमानो जातिः । क्रियाप्यभेदेनाभिधीयमाना जातिः ।

एवं वैयाकरणनये जातिगुणक्रियाणां परस्परं नात्यन्तिको भेदः । समर्पणशैल्यधीनं जातित्वं वा गुणत्वं वा क्रियात्वं वा । शब्देन यद् भेद्यत्वेन समर्प्यते तद् द्रव्यम् । जात्यादिरपि भेद्यत्वेनार्थाद् विशेष्यत्वेन चेद्विवक्षितस्तर्हि द्रव्यमेव । आख्यातार्थोऽपि द्रव्यं भवति ६५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भेद्यत्वेन, अर्थाद् विशेष्यत्वेन समर्पितश्चेत्। आस्यते स्थीयते इत्यादीनामर्थः सुखमित्यादिभिरर्थैर्विशेष्यत्वाद् द्रव्यं भवति। शुक्लतरं रूपमित्यत्र रूपस्यार्थो विशेष्यत्वेन समर्पित इति सोऽपि द्रव्यमेव।

एवं यद् यद् भेदकत्वेन विवक्षितम्, अर्थात् पारतन्त्र्येण विशेषणत्वेन शब्दसमर्पितं तत् सर्वं गुण एव। अत एव वैयाकरणैर्जातेरपि पारतन्त्र्यादर्थाद् द्रव्ये समवायात्, गुणत्वमुक्तम्।

सति सम्भवे लोकप्रसिद्धं वा शास्त्रान्तरप्रसिद्धं वा तत्त्वं समाश्रित्य रूपाणामन्वाख्यानं कर्तव्यम्। अन्यथा शब्दार्थोऽर्थः, न वस्त्वर्थः, इति मतमवलम्ब्य कश्चित् स्वकृ ान्त आस्थेयः, इत्येवंरूपाया दृष्टेरनुसरणं शाब्दिकैर्लिङ्गतत्त्वनिरूपणावसरे कृतमि लिङ्गतत्त्वमधिकृत्य किञ्चिदुक्त्वा लेखमिमं समाप्तिं नेष्यामि। वैयाकरणैः प्रायेण संस्कृतभाषायां समुपलभ्यमानान् लिङ्गोपादानविकल्पान् समवलम्ब्य लिङ्गतत्त्वनिरूपणे परिश्रमः कृतः। के त उपादानविकल्पा इति चेद्, निर्दिष्टा एव सप्त विकल्पास्तत्रभवता भर्तृहरिणा—'उपादानविकल्पाश्च लिङ्गानां सप्त वर्णिताः' इति वदता।

केचिच्छब्दाः पुंनपुंसकविषयाः–शङ्खः पद्मः, शङ्खं पद्ममित्यादयः। केचित् स्त्रीनपुंसकनियताः-भागधेयम्, भागधेयी, भेषजम्, भेषजीत्यादयः। अन्ये स्त्रीपुंससाधारणाः-इषुः, अशनिरित्यादयः। अपरे त्रिलिङ्गाः–तटस्तटी तटमित्यादयः। वृक्षादयः पुंस्येव नियताः, खट्वादयः स्त्रियामेव, दध्यादयो नपुंसक एव। सन्त्यन्येऽपि निदर्शनार्हा विकल्पाः। तथा हि–केचिच्छब्दा वचनभेदेन लिङ्गभेदं समाश्रयन्ते–गृहं गृहा इति यथा। कदाचिल्लिङ्गभेदेनार्थभेदो भवति। समप्रविभागेऽर्धशब्दो नपुंसकलिङ्गः, पिप्पल्या अर्धमर्धपिप्पलीति। एकदेशमात्रे तु पुल्लिङ्गः। सारशब्दो न्यायादनपेते नपुंसकलिङ्गः, नैतत् सारमिति। उत्कर्षे पुल्लिङ्गः, चन्दनसारः खदिरसारः। लिङ्गविशेषवाचकाः शब्दा भिन्नलिङ्गा दृश्यन्ते–स्त्रीत्वं स्त्रीता स्त्रीभाव इति।

भारतीयैः शाब्दिकैरेतादृशस्य लिङ्गलक्षणस्य व्यवस्थापने प्रयत्नः कृतो यदुपरि निर्दिष्टानां सर्वेषामपि लिङ्गोपादानविकल्पानां व्यापकं स्यात्। आदौ तावत्ते शब्दगतार्थगतयोर्लिङ्गभेदयोरापाततः प्रतिभासमानं विसंवादमुपलक्षयांबभूवुः। यथा दारशब्दः पुल्लिङ्गोऽपि स्त्रीत्वविशिष्टमर्थं बोधयति। कलत्रशब्दो नपुंसकलिङ्गोऽपि स्त्रीत्वविशिष्टमर्थं बोधयति। शब्दार्थ-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

योरभेदं मन्यमानैर्वैयाकरणैः शब्दधर्माणामवश्यमर्थधर्मानुवर्तित्वं स्वीकृतमिति स्वाभाविकमेतत् । लिङ्गञ्च शब्दधर्मेष्वन्यतमः । तस्याप्यर्थधर्मानुवर्तित्वं वैयाकरणैः स्वीक्रियते । तेषां मते लिङ्गं नाम वस्तुधर्मः ।

यदि लिङ्गं नाम वस्तुधर्मस्तर्हि तस्य किं लक्षणमिति प्रश्ने समुत्पन्ने कैश्चित् कांश्चित् पुँल्लिङ्गान् शब्दान् लोमादिरूपपुंधर्मविशिष्टार्थाभिधायिनः, कांश्चित् स्त्रीलिङ्गान् शब्दान् स्तनकेशादिस्त्रीधर्मविशिष्टार्थाभिधायिनः, कांश्चिच्च नपुंसकलिङ्गान् शब्दानुभयविधव्यञ्जनरहितार्थवाचकान् दृष्ट्वा स्तनकेशादिकमेव लिङ्गशब्दवाच्यमित्यङ्गीकृतम्। इदं लौकिकलिङ्गलक्षणमेव भाष्यकारैः—

"स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः ।
उभयोरन्तरं यच्च तदभावे नपुंसकम् ॥" इत्यनूदितम् ।

यद्यप्यर्थगतस्य लिङ्गस्येदं लक्षणं तथाप्यनेन शब्दगतमपि लिङ्गं लक्षितं भवति, वाच्यवाचकयोर्घनिष्ठसम्बन्धस्वीकारात् ।

परन्त्वनेन लक्षणेन न सुष्ठु शब्दान्वाख्यानं भवति। खट्वादिशब्दाः स्त्रीलिङ्गाः स्तनकेशादिरहितान्, वृक्षादिशब्दाः पुल्लिङ्गाः पुरुषव्यञ्जनरहितानचेतनानभिदधतीति तेषामन्वाख्यानमनेन लक्षणेन न भवति। तटस्तटी तटमित्येकस्यैव वस्तुनः स एव शब्दो लिङ्गव्यत्ययेन वाचको दृश्यते। परस्परविरोधिनियतव्यञ्जनसम्बन्धरूपं लिङ्गत्रयमेकस्मिन् वस्तुनि कथं भवेदिति परित्याज्यमेवेदं लक्षणम्। लिङ्गविषये वैयाकरणैः कश्चित् स्वकृतान्त एवास्थेयः। प्रतिपादितश्चायं स्वकृतान्तः कात्यायनमुनिभिः—'संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः' इति वदद्भिः। अत्यल्पाक्षरमिदं लक्षणं भाष्यकारैः किञ्चिदुपबृंहितम्। एवं व्यवस्थापितस्यास्य लक्षणस्यावबोधन आनागेशं बहुभिर्वैयाकरणैः प्रयत्नः कृतः। तैर्यो निर्णयः कृतस्तत्र प्रधानतमानि तत्त्वान्येवं प्रतिपादयितुं शक्यन्ते।

लिङ्गं नाम वस्तुधर्मः। तद्बोधकमेव शब्दगतं लिङ्गम्। अत्र वैयाकरणाः सांख्यमतानुसारिणः। सांख्या निखिलमिदं जगत् सत्त्वरजस्तमोरूपत्रिगुणात्मिकायाः प्रकृतेः परिणामं मन्यन्ते। एते गुणा यावदनारब्धकार्यास्तावदप्रत्यक्षा न शब्दव्यवहारगोचराः। तत्परिणामभूता एव शब्दस्पर्शरूपरसगन्धाः। त्रिगुणात्मकाः शब्दादयः पृथिव्याद्यात्मना परिणमन्ते।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सत्त्वादय इव शब्दादयोऽपि सततपरिणामिनो भवन्ति। अत एवाविर्भावतिरोभावौ तेषां नित्यधर्मौ। सर्वेषां भावानां शब्दादिमयत्वात् तेऽप्याविर्भावतिरोभावधर्माणो भवन्ति। आविर्भावतिरोभावावेव प्रसवसंस्त्यानशब्दाभ्यां व्यवहृतौ वार्तिके भाष्ये च। 'वर्द्धते यावदनेन वर्द्धितव्यमपायेन वा युज्यते' इति वदता भगवता भाष्यकारेण वृद्धिरेव प्रसवोऽपचयापरपर्यायापाय एव च संस्त्यानमिति सूचितम्। प्रवृत्तिश्च पुमानिति समुद्घोषयता वृद्धिप्रवृत्तिशब्दयोः पर्यायत्वमपि प्रदर्शितम्। एवं पदार्थानां वृद्धिरूपो धर्म एव पुल्लिङ्गमपचयरूपश्च धर्मः स्त्रीलिङ्गमिति लक्षणं पर्यवस्यति। वृद्ध्यपचयभिन्ना स्थितिश्च नपुंसकलिङ्गं भवति। इदमेव सुष्ठु प्रतिपादितं तत्रभवता भर्तृहरिणा—

"आविर्भावस्तिरोभावः स्थितिश्चेत्यनपायिनः।
धर्मा मूर्तिषु सर्वासु लिङ्गत्वेनानुदर्शिताः॥" इत्यत्र।

(वाक्यपदीयम्—का० ३, लिङ्गसं, श्लोक,)

आविर्भावतिरोभावस्थितिरूपाणां लिङ्गधर्माणां सर्वेषु वस्तुषु संभवे सति तद्वाचकशब्दानां कथं लिङ्गव्यवस्थेत्याशङ्क्य 'विवक्षातः' इति समाहितं भाष्यकारेण। विवक्षात्र न प्रायोक्त्री स्वेच्छारूपावगन्तव्या प्रयोक्तृभेदेन लिङ्गभेदापत्तेः। अतो लोकव्यवहारानुवादिनी विवक्षात्राभिप्रेता। एवं सर्वेषु लिङ्गधर्मेषु प्रत्येकस्मिन् वस्तुनि सत्स्वपि कञ्चिदेवावलम्ब्य शब्दः प्रवर्तते। शब्दशक्तेरेवेदं वैचित्र्यम्। इति दिक्।

विस्तरस्तु लेखकविरचिते 'लिङ्गतत्त्वविमर्श'नामके सारस्वतीसुषमाया द्वितीयवर्षाङ्के प्रकाशिते लेखे द्रष्टव्यः। अत्र त्वस्माभिरिदमेव द्रष्टव्यं यद् वैयाकरणैः स्वकृतान्तः कदाचिदन्यदर्शनाश्रयेणास्थीयते कदाचिच्चान्यथेति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वाग्व्यवहारः ।

श्रीचारुदेवशास्त्री ।

इह यथा तथा प्रवर्तमानो वाचो व्यवहारो न नो विमर्शविषयः। सामान्येन हि तेन विमृष्टेन नार्थः। न चापि यस्याः कस्याश्चिद्वाच एव स विवक्षितः, किन्तर्हि पारम्पर्यागतः शिष्टाभ्यनुज्ञातः संस्कृतव्यपदेशभाजो दैव्या वाचो विशिष्टो व्यवहार एवाभिप्रेतः। यानि यथा वा पदानि शिष्टैरुच्चार्य्यन्ते तानि तथैव साधूनि भवन्ति। तथा साधुत्वमभ्युपेत्य चेतरैरप्यनुवर्त्यानि भवन्तीत्यत्र 'पृषोदरादीनि यथोपदिष्टम्' इति सूत्रकारवचनमेव मानम्। यदि शिष्टाः शब्देषु प्रमाणं किमष्टाध्याय्या क्रियते। 'शिष्टपरिज्ञानार्थाष्टाध्यायी'ति भाष्यमपि सूत्राशयं स्फारं स्फारयच्छिष्टानां वाचि प्रामाण्यमङ्गीकुरुते। के पुनः शिष्टा इत्याकाङ्क्षायामित्याहुर्भगवन्तो भाष्यकाराः— 'आर्यावर्ते निवासे ये ब्राह्मणाः कुम्भीधान्या अलोलुपा अगृह्यमाणकारणाः किञ्चिदन्तरेण कस्याश्चिद्विद्यायाः पारङ्गतास्तत्रभवन्तः शिष्टाः।' वयं तु पश्यामः शिष्टाः खलु न केवलं पृषोदरप्रकारेष्वविहितलोपागमविकारेषु शब्देष्वेव प्रमाणमपि त्वन्यत्रापि वाङ्मयेऽविशेषेणेत्यत्र निरुक्ता 'यदि शिष्टाः शब्देष्वि'त्यादिर्भाष्यकृदुक्तिरेव ज्ञापिका। शास्त्रे तावत् तिङ्कृत्तद्धितसमासैरभिधानमुक्तमर्थानाम्। तद्यथा 'प्रज्ञाश्रद्धार्चाभ्यो णः' (५।२।१०१।) इति शास्त्रं मत्वर्थे णं विधत्ते। एवं सामान्यलक्षणे सत्यपि नहि श्रद्धावान्पुरुषः श्राद्ध इत्यभिधीयते, श्रद्धावत्कर्मैव श्राद्धमुच्यते। तत्कस्मात्। अनभिधानात्। किमिदमनभिधानं नाम। शिष्टैरप्रयुक्तत्वम्। नहि शिष्टाः श्रद्धावन्तं पुरुषं श्राद्धशब्देनाभिदधते। महाभागास्ते विहितमपि णं तत्रार्थे नेच्छन्ति। 'तेन दीव्यति खनति जयति जितम्' (४।४।२।) अत्र तेन जितमित्यर्थे सामान्येन ठग्विहितः, देवदत्तेन जितमित्यत्र न भवति, अनभिधानात्। एवमङ्गुल्या खनतीत्यत्रापि न, अनभिधानादेव। 'तस्येदम्' (४।३।१२०।) इति सामान्येनाणादयो यादयश्च विधीयन्ते। अण्युपगोरिदमौपगवम्। परं देवदत्तस्यानन्तरमित्यत्र न भवत्यण्, अनभिधानात्। 'समानकर्तृकेषु तुमुन्' (३।३।१५८।) इत्यनेनेच्छार्थेषु धातुषूपपदेषु धातुमात्रात्तुमुन्विहितः। इह कस्मान्न भवति। इच्छन्करोति। अनभिधानादेवेत्यलं निदर्शनाय शिष्टप्रयोगा^ प्रधानमुपसर्जनं व्याकरणमित्यस्यार्थस्य। अयमत्र

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सारः। शिष्टैः प्रयुक्तपूर्वा एव शब्दाः शास्त्रेण संस्क्रियन्तेऽनुशिष्यन्तेऽन्वाख्यायन्ते। तस्माद् व्याकरणमन्वाख्यानस्मृतिरिति संविज्ञायते। तत्रापि नेदं युज्यते वक्तुं तावन्त एव शब्दाः सन्ति यावन्तश्शास्त्रेण परिगृहीता इति। अनन्वाख्याता अपि भूयस इति तेषां साधुत्वेऽपि शिष्टा एव मानम्।

शिष्टा एव सर्वत्र वाग्व्यवहारे प्रमाणमिति यदुक्तमधस्तात्तत् सम्प्रति प्रसिषाधयिषामः। इदं तावद् व्यवस्थितं यां वाग्वर्तनिमनुवर्तन्ते शिष्टास्तामेवानुविवृत्सति लोकः। का नाम निरवद्या वाक्यप्रणीतिरिति शिष्टपद्धतेरेव शक्यमञ्जसा विज्ञातुम्। तत्र हि त एव प्रमाणं नेतरे। तन्मुखप्रेक्षी लोको यज्जातीयकं वाग्विन्यासं ते प्रयुञ्जते तथा जातीयकमेव स प्रमाणीकुरुते। यया विधया ते तं तमर्थं सन्दभन्ति तामेवानुकरोति लोकः। व्याकरणे च पदान्येव संस्क्रियन्ते न वाक्यानि, तेन न तदायत्तो वाक्यसाधुत्वप्रत्ययः। वाक्यञ्च न केवलं साध्विष्यते साधीयश्च, साधिष्ठमपि चेष्यते। इदञ्च तारतम्यं शिष्टप्रयोगतोऽवसातव्यं भवति नान्यतः। अनलङ्कर्मीणं तत्र व्याकरणम्। नैतदेव। एवं नाम व्यवस्थितो वाग्व्यवहारो यत्तत्रादृतो लोकः शास्त्रमपि नाद्रियते। तदेतद्भगवन्तो भाष्यकारा इत्थङ्कारं निदर्शयन्ति—'देवश्चेद् वृष्टो निष्पन्नाः शालयः। तत्र भवितव्यं सम्पत्स्यन्ते शालय इति। सिद्धमेतत्। कथम्। भविष्यत्प्रतिषेधात्। यल्लोको भविष्यद्वाचिनः शब्दस्य प्रयोगं न मृष्यति। कश्चिदाह देवश्चेद् वृष्टः सम्पत्स्यन्ते शालय इति। स उच्यते मैवं वोचः, सम्पन्नाः शालय इत्येवं ब्रूहीति।' (३।३।१३३) यद्यप्यन्वयवन्त्यर्थवन्ति पदानि वाक्यं भवति तथापि तत्रैकेन तिङन्तेन भवितव्यमिति नियम्यते। तच्च तिङन्तं पदं न सर्वत्र श्रूयते, क्वचिद् गम्यते चापि। क्व चेदमनुक्तमपि गंस्यते। क्वास्य परिहारो न केवलं वाक्यदुष्टये न भविष्यत्युपस्कृतये चापीति शिष्टशैलीत एव शक्यमध्यवसातुम्। अस्तिर्भवन्तीपरः प्रथमपुरुषोऽप्रयुज्यमानोऽप्यस्तीति भाष्याच्छक्यतेऽनुमातुमस्तेर्लट्परकस्याप्रयोगोऽपि दोषावहो न भवतीति। कोऽसौ। का प्रवृत्तिः। एको देवः सर्वभूतेषु गूढः। असाधुदर्शी किलासौ। अहो मधुरमासां दर्शनम्। अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोश्वा इत्यादिष्वप्रयोगोऽस्तेर्वाक्यस्य लाघवाय भवति माधुर्याय च। भाष्यवचने पुरुषग्रहणमतन्त्रम्। अन्यत्राप्यस्तेस्त्यागो न दोषाय कस्त्वं भो इत्यादिषु। परं त्यागः क्वाचित्कः प्रयोगस्तु प्रायिकः। परमस्तिरयं न शक्यो वाक्योपक्रमे परित्यक्तुम्। 'अस्ति पुण्यकृतामधिवासो वासवावास इव वसुधामवतीर्णः........श्रीकण्ठो नाम जनपद' इति श्रीहर्षचरिते। अन्यत्रापि धात्वन्तरस्याप्यप्रयोगमनुमन्यन्ते शिष्टाः। प्रविश पिण्डीम्। इह भुङ्क्ष्वेति त्यक्तम्। तदन्तरेण तदर्थगतेः। इति

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शङ्करभगवत्पादाः, इति गुरुचरणा इत्यादिषु मतोपन्यासात्मकेषु वाक्येष्वाहुर्मन्यन्ते पश्यन्ति प्रतिजानत इत्यादि तिङन्तं गम्यमानमपि वाक्यालङ्कृतये भवति। जुषन्ते हि शिष्टास्तत्प्रकारमास्वादन्ते च रसज्ञा दोषज्ञाः। संभ्रमे वाक्यकारो द्विरुक्तिं पदस्य विधत्ते। रक्ष रक्ष व्याघ्रो मामाघ्रातुमिच्छति। परं संभ्रमे तिङन्तपदपरिहारोऽपि दृश्यते। आपस्तावत्। इमा आपः। आसनं तावत्। इदमासनम्। इदमत्र तत्त्वम्। क्रियोच्चारो हि विलम्बयत्यर्थप्रतीतिं निर्दिश्यमानार्थप्रतिपत्तिं[1] च। इष्यते चाकालहीनं प्रवृत्तिः। सा च लघुनैव न्यासेन शक्या न गुरुणेति सुग्रहं सुधीभिः। आपस्तावदाह्रियन्तामित्यधिककालोच्चार्यं वाक्यं समाहितस्येष्टं स्यान्न सम्भ्रान्तस्य।

तैस्तैरुपपदैर्योगे तास्ता विभक्तीरनुशास्ति शास्त्रकारः। अन्तरेणाप्युपपदं सा सा दृश्यते। 'कस्यचित्त्वथ कालस्य' 'ततः कतिपयाहस्य' 'ततः कतिपयाहस्य तच्छ्रुत्वेत्यत्र भारते' (वन० २५६।८, १६०.१५, उद्योग० १८६.१८।) 'चिरस्य वाच्यं न गतः प्रजापतिः' 'भगवन्निमामाज्ञाकरीं वो गान्धर्वेण विवाहविधिनोपयम्य कस्यचित्कालस्य बन्धुभिरानीतामि'त्यादौ शाकुन्तले च पश्चादित्युपपदं परिहृतम्। 'एति जीवन्तमानन्दो नरं वर्षशतादपी'ति रामायणप्रयोगेऽप्यूर्ध्वमित्याद्युपपदमपेक्षितं सदप्युपेक्ष्यते। परं नैष उपपदपरिहारोऽन्यत्रापि शक्योऽतिदेष्टुम्। क्वचिद्विशेषणमहिम्ना विशेष्यार्थलाभ इति शक्यं विशेष्यमप्रयोक्तुम्। तद्यथा—सागराम्बरेति समुद्रवसनामुर्वीमाह। 'विषाक्ते दिग्धलिप्तकावि'त्यमरात्केवलौ दिग्धलिप्तकशब्दौ विषसम्पृक्तशरवचनौ परिगृह्येते। 'उष्णानि कृष्ण वर्तन्त' इति भारतप्रयोगेऽप्युष्णानीति निदाघाहा[2] उच्यन्ते। अजर्यं संगतमिति जीर्यतेर्नञ्पूर्वात्संगते संगमने कर्तरि यत्प्रत्ययो निपात्यते। अजर्यमार्यसंगतम्। परं केवलोऽप्यजर्यशब्दस्तादृशे संगते प्रयुज्यते 'मृगैरजर्यं जरसोपदिष्टमदेहबन्धाय पुनर्बबन्धे'ति रघौ (१८।७) क्वचिन्नाम्नापि केवलेन तत्कर्मिका क्रिया लक्ष्यते। 'नागपृष्ठेऽश्वपृष्ठे च परिनिष्ठित' इत्यत्र नागपृष्ठारोहणे अश्वपृष्ठारोहणे च परं प्रावीण्यमुपगत इत्यर्थोऽभिधित्सितः। क्वचिच्च क्रिया अन्तर्णीतक्रियान्तराः प्रयुज्यन्ते 'भुजविजितविमानरत्नाधिरूढः प्रतस्थे पुरीम्' (रघु० १२।१०४) इति। अत्र प्रस्थानक्रियाया अकर्मकत्वेऽपि तदङ्गभूतोद्देशक्रियापेक्षया पुर्याः कर्मत्वम्। यथा वा कुसूलात्पचतीत्या-

१ अनुष्ठानम्। २ रात्राह्नाहाः पुंसीति पुंस्त्वम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दानगर्भः पाकोऽभिधीयते। एवं 'ततो द्वादशवर्षाणि प्रवेष्टव्यं वने पुनरि'ति भारतप्रयोगे प्रवेशनक्रियया तत्पूर्विका वासक्रियाऽभिधीयते। अन्यथा प्रवेशनस्य क्षणिकत्वात्कथङ्कारं तेन द्वादश समा व्याप्येरन्, अव्याप्तेश्च कथं नाम वर्षशब्दादत्यन्तसंयोगे विहिता द्वितीयोपपत्तिमती स्यात्। गामट भिक्षां चरेत्यत्राटतिरनुसरणाङ्गे पर्यटने वर्तते चरतिश्चार्जनाङ्गे भ्रमणे। गामनुसरन्पर्यट, भिक्षां चार्जन्भ्राम्येत्यर्थः। इति दिगियं प्रदर्शिता धातूनां क्रियान्तरोपसर्जनकस्वार्थाभिधायकत्वमस्तीत्यस्य।

यच्चोद्गिरन्ति प्रामाणिका 'विवक्षातः कारकाणि भवन्ती'ति तत्रापि न यस्य कस्यचित्प्रयोक्तुर्विवक्षामनुरुन्धन्ति कारकाणि। लौकिकी हि विवक्षा प्रभवति न प्रायोक्त्रीत्याहुः। लोकश्चात्र शिष्टलोक एवाभिप्रेतो वाचि प्रमाणभूतः सर्वस्यावधेयवचनः। अन्यथा सर्वमिदमाकुलं स्याद्वाङ्मयम्। सङ्कीर्येरन्प्रयोगा न व्यवतिष्ठेरन्निति महाननर्थोपनिपातः स्यात्। इमां कारकविषयिणीं विवक्षामधिकृत्य किञ्चिद् विन्यस्यामो विदुषां विनोदाय। 'त्वदीयं वस्तु गोविन्द तुभ्यमेव समर्पय' इत्यर्पयतिर्ददात्यर्थे प्रयुक्त इति युज्यते युष्मदः सम्प्रदानत्वम्। अर्पयतिर्नाम कथमिममर्थमर्पयतीति तावद् विमृश्यम्। ऋ गतिप्रापणयोरिति धातुर्णिच्सहकारेण प्रापणमर्थमाचष्टे, केवलस्तु गतिं वा प्राप्तिं वा। धातुपाठे गतिप्रापणयोरित्यर्थनिर्देशे प्रापणमिति प्रकृतेऽर्थे वर्तमानाद् आप्लृ व्याप्ताविति धातोर्ल्युटि रूपम्, न तु हेतुमण्ण्यन्तस्य। अतोऽहेतुमति णिचि प्रापणं नयनमर्थः। यश्चार्थः परत्र सङ्क्रम्यते परं प्राप्यते स परस्मै सम्प्रदीयत इवेत्यर्थविवक्षया चतुर्थ्यौपयिक्येव। परं विभक्त्यन्तराण्यप्यर्पयतिप्रयोगे दृश्यन्ते। 'तं देवाः सर्वे अर्पितास्तदु नात्येति कश्चने'ति कठोपनिषदि। 'सिंहो मतिविभ्रममिवार्पितो न किञ्चिदप्युदाहृतवानि'ति तन्त्राख्यायिकायाम्। अत्रार्पितशब्दो मुख्यया वृत्त्या गमितार्थाभिधायीति गत्यर्थत्वादणि कर्तुः कर्मत्वमिति तच्छब्दाद् मतिविभ्रमशब्दाच्च युक्ता द्वितीया। दानार्थविवक्षाविरहान्नेह चतुर्थी। क्वचित्सप्तम्यपि दृश्यते। 'अवगच्छति मूढचेतनः प्रियनाशं हृदि शल्यमर्पितम्।' 'अपथे पदमर्पयन्ति ही'ति च रघौ। (८।८८। ६।७४।) 'अर्पयित्वेश्वरे प्रह्वः प्रमना विरमाम्यहमि'ति चान्यत्र। 'ईश्वरप्रणिधानं तस्मिन्परमगुरौ सर्वकर्मार्पणमि'ति योगभाष्ये। अत्रेयं सप्तम्युपपत्तिः यद्धि यं प्राप्यते द्रव्यं तत्तदन्तिकं प्राप्यते तत्सन्निकर्षे सन्निधाप्यत इवेत्यर्थविवक्षायां सामीपिकेऽधिकरणे सप्तम्यपि साम्प्रतम्। क्वचिदन्यत्र तृतीयाऽपि विलोक्यते 'तेषामक्षीणि कर्णांश्च नासिकाश्चैव मायया। निमित्तवेधी स

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मुनिरिषीकाभिः समार्पयत्' इति भारते। (उद्योग० ६६। ३१।) अत्र समार्पयदित्यस्य समगमयदित्यर्थग्रहादिषीकाभिरित्यत्र सहार्थे तृतीयोपपन्नैव। इदञ्चान्यदप्येतज्जातीयकं परीक्ष्यमाणं भूयसे विनोदाय भविष्यति विदाम्। पद गताविति धातोः प्रतिपूर्वस्य ण्यधिकस्य प्रयोगेऽपि विभक्ति-वैचित्र्यं दृश्यत आकूतकरम्। हेतौ प्रतिपादयतेः प्रापणमर्थो मुख्यया वृत्त्येति गत्यर्थत्वादणि कर्तुः कर्मत्वे कर्मणि द्वितीया नापूर्वा। 'सर्वरत्नानि राजा यथार्हं प्रतिपादयेत्। ब्राह्मणान्वेद-विदुषो यज्ञार्थञ्चैव दक्षिणाम्' (मनु० ११।४।) 'अयशो जीवलोके च त्वयाऽहं प्रतिपादितः' (रा० अयो० ७४।६।) अत्र क्तेनोक्ते कर्मणि प्रथमा। 'एतां मालाञ्च ताराञ्च कपिराज्यञ्च शाश्वतम्। सुग्रीवो वालिनं हत्वा रामेण प्रतिपादितः'। (रा० युद्ध० २८।३२।) अत्रापि पूर्ववत्कर्मणि प्रथमेति विज्ञेयम्। 'सत्कृत्य चैनं प्रीतात्मा राज्यार्धं प्रत्यपादयदि'ति भारते। (आदि० १६८।७२।) प्रतिपादनं वितरणमित्यर्थग्रहात्प्रतिपादयतिप्रयोगे विप्रादीनां सम्प्रदानतापि शिष्टानामिष्टा। 'गुणवते कन्या प्रतिपादनीये'ति शाकुन्तले। 'अर्थिभ्यः प्रतिपाद्यमानमनिशं प्राप्नोति वृद्धिं परामि'ति च भर्तृहरौ। (२।१६।) प्रतिपादयतिश्च कथं वितरणेऽर्थेऽवतरतीति जिज्ञासायामर्पयतिविषये यदुक्तं पुरस्तात्तदिहाप्यवितथं विज्ञेयम्। क्वचिदन्यत्र सप्तम्यपि दृश्यतेऽर्पयतिवद् 'धनानि तु यथाशक्ति विप्रेषु प्रतिपादयेत्' इति। (मनु० ११।६।) अत्रार्पयतिव-त्सामीपिकेऽधिकरणे सप्तमी साध्वी। अपि वा सम्प्रदानेऽपि क्वचित्सप्तमीमिच्छन्ति शिष्टा इत्यदुष्टा।

इयमपि द्वितीयाप्रयुक्तिश्चिन्त्यताम्। 'चतुर्दशीमष्टमीं वा रामं पश्यन्ति तापसा' इति भारते। 'अथ कल्यमुत्थाये'त्यादि च रामायणे। इहोभयत्राप्यत्यन्तसंयोगोऽसन्नपि विवक्ष्यतेऽन्यथा द्वितीयानुपपत्तिः स्फुटैव। यद्यपि चतुर्दश्या अष्टम्याश्चैकदेशे तापसा रामं पश्यन्ति न तु सर्वरात्रम्, दर्शनं हि क्षणिकं भवति, तथापि रामदर्शनसमुत्सुकास्तापसाः सर्वां रात्रिं पश्यन्तीव रामम्। एवं ह्यासेचनकं पावनं च तद्रूपमिति विवक्षया तथा प्रयुङ्क्ते कविः। द्वितीयस्मिन्नपि प्रयोगे उत्थानपूर्विकया चेष्टया व्याप्तिर्विवक्ष्यते सर्वस्य कल्यस्येति द्वितीया सुवचा।

अयमपि सप्तमीप्रयोगः परीक्ष्यः परीक्षकैः 'एताभ्यां रंस्यसे सार्धं वस वै मयि बाहुके'ति भारते। (वन० ६७।७।) 'नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं चरेदि'ति मनौ। (२।२४२।) 'याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामे'ति मेघे। 'अस्ति मे त्वयि प्रार्थने'ति चान्यत्र भारते। अत्र सर्वत्र सामीपिकेऽधिकरणे सप्तमी बोध्या। सप्तम्यैव च शिष्टा एतमर्थमभिदधति। तदेषां शीलम्। नव्यास्तु 'यदि पथि विपथे वा वर्तयामः स पन्था' इत्यभिमन्यमाना मत्पार्श्वे वस, गुरोः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्निधौ वसति, अस्ति मे त्वत्तः प्रार्थनेत्येवं विवक्षितमर्थमर्पयन्ति। यद्यपि पार्श्वादिप्रयोगेऽपि कश्चिद् दोषो न, गुणोऽपि सुतरां न। अधिकपदत्वं तु भवत्येव रुचिविषयः शारदानां न विशारदानाम्। त्वत्तः प्रार्थनेत्यत्र तु पञ्चमी सूपपादापि शिष्टानुग्रहोऽस्या नेति नादरणीया।

क्वचिद्ददातिर्दिशतिर्वाऽनुज्ञानेऽर्थे पर्यवस्यति, तथापि सम्प्रदानत्वविवक्षया चतुर्थीं व्यवहरन्ति विज्ञाः 'न दास्यामि समादातुं सोमं कस्मैचिदप्यहमि'ति भारते। (आदि० ३४।६।) 'स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्य' इति किराते। (५।२८।) 'बाष्पस्तु न ददात्येनां द्रष्टुं चित्रगतामपी'ति शाकुन्तले। (६।२२।) अत्र मह्यं दुष्यन्तायेत्यध्याहार्यम्। इह समादातुमित्यादिषु तुमुन्प्रयोगः प्रसक्तानुप्रसक्त्या किञ्चिद्विचार्यते। अनुज्ञानार्थप्रतीतेस्तुमुन्निह 'शकधृषज्ञाग्ले'ति सूत्रेण विहितः। स चोपपदधातुना समानकर्तृकाद् धातोरेव विधीयते। अत्र च भिन्नकर्तृकताऽभिव्यक्ता। अयमत्र समाधिः प्रतिभाति नः। किंशब्दवाच्यस्य पुरुषान्तरस्य सुरसुन्दरीणां दुष्यन्तस्य च सम्प्रदानतैवेह विवक्षिता। एकदैकस्यैव कारकस्य विवक्षासम्भवात्। न हि युगपदेकस्मिन्नर्थे कारकद्वयसत्ता शक्या विज्ञातुम्, विरोधात्।

क्वचिदभिव्यक्ततरमप्यपादानत्वमुपेक्ष्य कारकान्तरं विवक्षन्ति सन्तः। देवदत्तः प्राणान्मुमोच। देवदत्तः प्राणैर्मुमुचे। इह देवदत्तस्य प्राणैः समं वियोग इति नितान्तमुक्तानम्। वियोगश्चोभयनिष्ठ इति वियोक्तारं वियुज्यमानञ्चार्थं समं निश्रयते। इदञ्च नितरां विवक्षानिघ्नं तयोः कतरस्यावधिभावः कल्प्येतेति। यदि नाम प्राणा ध्रुवोऽर्थोऽवधिरिति वा कल्प्येरंस्तदा देवदत्तस्य वियोक्तृता वियोगे कर्तृतार्थादापद्यते। तेन प्राणशब्दात्पञ्चम्या भवितव्यम्। परं मुच्लृ मोक्षण इत्ययं धातुः सकर्मकः। तत्प्रयोगे कर्माकाङ्क्षितम्भवति। 'अपादानमुत्तराणि कारकाणि बाधन्त' इति वचनादपादानत्वं प्रबाध्य कर्मविवक्षायां प्राणानिति द्वितीया। अथ देवदत्तोऽवधिरित्यभ्युपेयते तदोक्तरीत्या तस्यापादानतां प्रबाध्य मुञ्चतेः कर्मत्वेन तत्रोक्ते कर्मणि प्रथमा। प्राणैरिति चानुक्ते कर्तरि तृतीया सूपपन्नेति सर्वमवदातम्। मुचेः कर्मकर्तरि प्रयोगे तु प्राणादेरपादानत्वमविहतं तिष्ठति। 'यज्ज्ञात्वा मोक्ष्यसेऽशुभादि'ति गीतासु। 'मुच्यते सर्वपापेभ्य' इति चानेकत्र पुराणे। मोक्ष्यसे स्वयमेव मुक्तो भविष्यसीत्यर्थः। कस्मादित्याकाङ्क्षायामाह—अशुभात्। अत्रापादानबाधप्रसङ्ग एव नास्तीति न दुरवधारं सुधीभिः। स प्राणान्मुमोच, तम्प्राणा मुमुचुरिति वाक्यद्वयमभिप्रायभेदेनादौ प्रयुयुजिरे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विवेक्कारो वक्कारः, कालान्तरे तु समानार्थकमेतदिति साङ्कर्येणेत्यवकल्पयामः। अत्र शास्त्रपारावारपारीणाः प्रमाणमिति नातोऽतिरिक्तं सहामहे वक्तुम्।

क्वचित्कारकस्याविवक्षा सम्बन्धस्य चैव विवक्षा। यथा मातुः स्मरतीति। मातृसम्बन्धिस्नेहादिकं स्मरतीत्यर्थः। यदा कश्चिन्मातृविश्लेषदुःखमश्नुवानः शिशुमपरं वाऽम्बया सस्नेहातिरेकं लाल्यमानं सदयं वाऽवेक्ष्यमाणमालोकते तदा मय्यप्यम्बैवमाचरदिति भवति तस्य मातुः स्मरणम्। अन्यदा चाकृत्या संवादिनीं योषां रथ्यया यान्तीं निशाम्य सादृश्यप्रत्ययेन प्रतिबुद्धसंस्कारो मातरमेव स्मरति साक्षात्, मातृमूर्त्तिरेवास्योपतिष्ठते चेतसि, तदा भवत्येव कर्मकारकस्यावकाशः। एवमन्यत्रापि। शुकनासस्यापि मनोरमायां तनयो जातः। अन्यत्र जनकस्य कर्तृत्वेऽपादानत्वे वा सत्यप्यत्र तदविवक्षायां कस्येत्याकाङ्क्षायां शेषे षष्ठी।

"व्यायामक्षुण्णगात्रस्य पद्भ्यामुद्वर्तितस्य च।
व्याधयो नोपसर्पन्ति वैनतेयमिवोरगाः॥"

इति काशिकायामुद्धारे व्याधयो व्यायामक्षुण्णगात्रस्य पुरुषस्य सन्निधिमपि नाधिगच्छन्ति, संस्पर्शनन्तु दूरापेतमिति विवक्षया शेषे षष्ठी। तुरीये तु चरणे कर्मविवक्षातो द्वितीया*।

इदमपरमिह विवेच्यम्। वाक्य उद्देश्यस्य कर्तृता वा स्याद् विधेयस्य वेति। अपि वान्यत्रार्थानुरोधात्किमुद्देश्यस्य कर्मत्वमिष्यतामुताहो विधेयस्येति। यद्युद्देश्यस्य कर्तृता तदा कर्तृवाचिनि तिङि धातोरुद्देश्यमनुसरन्ती पुरुषवचने भविष्यतः, अथ विधेयस्य कर्तृता तदा तदेव तेऽनुरोत्स्यतः। एवमेकैकस्य कमत्वविवक्षायां तत्तदनुरोधाद् धातोः पुरुषवचने, क्तान्तात्प्रातिपदिकाच्च लिङ्गसंख्याविभक्तयो भविष्यन्ति। अस्मिन् सम्यगालोडिते प्रवृत्तानां वैदिकं लौकिकञ्च साहित्यं शीलयतां नः प्रायश उद्देश्यस्य कर्तृत्वाभिप्रायाणि यथाविवक्षं कर्मत्वाधिगमकानि वा वाक्यानि दृक्पथमवतरन्ति। तेषु कतिपयानीह निदर्श्यन्ते—'समुद्रः रथः कलशः सोमधानः' (ऋक्०) 'यदग्ने स्यामहं त्वं त्वं वा घा स्याग्रहम्। स्युष्टे सत्या इहाशिषः'। (ऋ० ८। ४४। २३) 'यत्र ब्रह्म च क्षत्रञ्च उभे भवत ओदनः' (कठ०) 'आत्मेत्येवोपासीत। अत्र सर्वं एकं

* इह दिङ्मात्रमुदाहृतम्। विस्तरस्त्वस्मत्कृतायां प्रस्तावतरङ्गिण्यां 'विवक्षातः कारकाणि भवन्ती'ति शीर्षके निबन्धे द्रष्टव्यः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवन्ति' (बृहदारण्यक १ । ४ । ७) । 'ता यदा सहस्रं सम्पेदुः' (छान्दोग्य० ४ । ४ । ५) 'अप्यर्थकामौ तस्यास्तां धर्म एव मनीषिणः' । (रघु० १।२५ ।) 'एषोऽस्मि कामन्दकी सम्वृत्तः' (मालती० १ ।) 'प्राची बालबिडाललोचनरुचां जाता च पात्रं ककुप्' (बालरा०) 'हारः स च प्राभृतमत्र जातः' (विद्धशाल० ४ । ६ ।) 'बालानान्तु शिखा प्रोक्ता काकपक्षः शिखण्डकः' इति हलायुधः । 'भारः स्याद्विंशतिस्तुला' इत्यमरः । 'शब्दार्थौ मूर्त्तिराख्यातौ जीवितं व्यङ्ग्यवैभवम्' इति विद्यानाथः । अत्रोदाहृतीनामियत्तापरिच्छेदो नास्ति । उद्देश्यस्य कर्तृकर्मत्वे परिगृह्य प्रचुरं पुरा प्रयुञ्जते प्रज्ञाः । विधेयस्य कर्तृकर्मत्वपरिग्रहस्त्वल्पः क्वाचित्कः । बाढं प्रयस्यद्भिरस्माभिः कियन्तिचिदेवोदाहरणानि पारितानि पर्येषितुम् । तानिहानुक्रामामो विमर्शाय विपश्चिताम् । 'यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः' (यजुः० ४० । ७ ।) 'ता (नद्यः) समुद्रात्समुद्रमेवापियन्ति समुद्र एव भवति' (छान्दोग्य० ६ । १० । १० ।) 'ते समानीतमात्रे तु शकले पुरुषर्षभ । एकमूर्तिधरो वीरः कुमारः समपद्यत' इति भारते । (सभा० १७ । ४१ ।) 'त्रीणि वर्षसहस्राणि त्रेतायुगमिहोच्यत' इति, 'अन्नं प्रजापतिश्चोक्त' इति, 'अश्वमेधो महायज्ञः प्रायश्चित्तमुदाहृत'मिति च भारते । (वन० १८८ । २३ ।, २०० । ३८ ।, शान्ति० ३३ । ३८ ।) 'त्रिंशत्कला मुहूर्त्तः स्यात्' 'पणानां द्वे शते सार्धे प्रथमः साहसः स्मृतः' 'ते षोडश स्याद्धरणम्' 'प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः । व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः॥' 'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः' 'सप्त प्रकृतयो ह्येताः सप्ताङ्गं राज्यमुच्यते' इति भृगुप्रोक्तायां मनुसंहितायाम् । (१ । ६४ ।, ८ । १३८ ।, ८ । १३६ ।, ६ । ७० ।, २ । १०१ ।, ६ । २९४ ।) 'एको भिक्षुर्यथोक्तस्तु द्वौ भिक्षू मिथुनं स्मृतम् । त्रयो ग्रामः समाख्यात ऊर्ध्वन्तु नगरायते' इति दक्षस्मृतौ । (७ । ३४ ।) 'सुवर्णपिण्डः खदिराङ्गारसवर्णे कुण्डले भवतः' इति पस्पशायां भाष्ये । 'द्वौ द्वौ माघादिमासौ स्यादृतु'रित्यमरः । 'द्वौ द्वौ मासावृतुः स्मृत' इति क्षीरस्वामिनोद्धृतं कात्यवचनम् । 'आचितो दश भाराः स्यु'रिति चामरः । 'पक्षसी तु स्मृतौ पक्षा' विति 'पचिवचिभ्यां सुट्' चेत्युणादिसूत्रव्याख्यायां दीक्षितोद्धृतः कोषः । 'भिन्नो भयाद्वा शोकाद्वा ध्वनिः काकुरुदाहृते'ति श्रीहर्षचरिते प्रथमोच्छ्वाससङ्केते शङ्करोद्धृतः कोषः । 'अक्षरेभ्यः संस्काराः संस्कारादर्थप्रतिपत्तिरिति सम्भवत्यर्थप्रतिपत्तावक्षराणि निमित्तम्'इति शाबरभाष्ये (१ । १ । ५) । 'मिथुनं परिकल्पितं त्वया सहकारः फलिनी च नन्विमा'विति रघौ ॥ (८ । ६१ ।) 'यत्र द्वे ऋचौ प्रग्रथनेन तिस्रः क्रियन्त' इति काशिकायाम् । (४ । २ । ५५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'कोशो दण्डो बलञ्चैव प्रभुशक्तिः प्रकीर्तिता' इति। मिताक्षरायाम्।

"निर्धनं निधनमेतयोर्द्वयोस्तारतम्यविधिमुक्तचेतसाम्।
बोधनाय विधिना विनिर्मिता रेफ एव जयवैजयन्तिका॥"

इति सुभाषितरत्नभाण्डागारे।

'एवमग्रेऽपि श्लोके कतिपयपदान्येव म्लेच्छभाषा भवति न तु सर्वः श्लोकः' इति भारतभावदीपे नीलकण्ठः।

अत्र दुष्करं व्यवस्थापयितुम्। एवं हि प्रतिभाति प्राय उद्देश्यविधेययोः प्राधान्याप्राधान्यविवक्षायां व्यवस्थितिर्नास्ति। तत्र खलु कामचारः प्रयोक्तॄणाम्। यत्रोद्देश्यस्य प्राधान्यं विवक्षन्ति वाग्विदस्तत्र तस्य कर्तृत्वकर्मत्वे भवतोऽन्यत्र विधेयस्य। वाक्ये विधेयस्य प्राधान्यं तावन्न्यायप्राप्तम्। यत्किञ्चिदुद्दिश्य यत्किमपि विधातुमेव तत्प्रणीतेः। वाक्यार्थः क्रियेति सा प्रधानं वाक्ये तदङ्गभूतं चान्यदपि तत्समकक्षमेव। तथापि न ह्युपपत्तिमान्सर्वः प्रयोगप्रकारः, रुचिवशश्चापि कश्चिद्भवति। उद्देश्यस्य प्राधान्यं रोचयन्ते शिष्टा इति किं कुर्मः। यदि तर्कयामहे यत्र हि विधेयं संज्ञा भवति यथा 'अन्नं प्रजापतिश्चोक्तः' इत्यादिषु, यत्र वा निमित्तादीन्यजहल्लिङ्गानि पदानि तद्भवति, यथा 'मिथुनं परिकल्पितं त्वया' इत्यादिषु, तत्र विधेयस्य प्राधान्यं विवक्षन्ति तदनुरोधाच्च कर्तृकर्मत्वेन तत्प्रतीच्छन्तीति तदपि न व्यवतिष्ठते। तत्राप्युभयथा प्रयोगा दृश्यन्ते, 'भारः स्याद्विंशतिस्तुला' इत्युद्देश्यस्य कर्तृत्वेऽमरप्रयोगः। 'आचितो दशभाराः स्युः' इति च तस्यैव विधेयस्य कर्तृत्वे। 'जाता च पात्रं ककुप्' 'हारः स एव प्राभृतमत्र जातः' इत्यजहल्लिङ्गपदोपात्ते विधेयेप्युद्देश्यस्य कर्तृत्वम्। इदन्त्वाभासते क्वचित् क्रियापदेन सान्निध्यमप्युद्देश्यविधेययोः कर्तृकर्मत्वयोर्व्यवस्थापकम्भवति। यथा 'एवमग्रेऽपि श्लोके कतिपयपदान्येव म्लेच्छभाषा भवति न सर्वः श्लोकः' इति नीलकण्ठप्रयोगे म्लेच्छभाषेति विधेयं तिङन्तस्य सन्निहितमिति तस्य कर्तृत्वम्। उद्देश्यं हि विधेयेन व्यवायात्ततो विप्रकृष्टमिति न तस्य तत्। यदि च विपर्ययेणोद्देश्यं तिङन्तादव्यवहितपूर्वं स्यात्तदा तस्यैव कर्तृत्वमभिमतं स्याद्वाक्यं चैवंविन्यासं स्यात्, म्लेच्छभाषा कतिपयपदान्येव भवन्तीत्यादि। एवमपि 'संभवत्यर्थप्रतिपत्तावक्षराणि निमित्तम्' इति शाबरभाष्ये सम्भवतीत्येकवचनान्तं विरुध्येत। एतच्च दृढतरं प्रतिभाति यत्र विधेयं विकृतिवाचकं क्म्वस्तीनाञ्च प्रयोगः, च्वेश्चाप्रयोगस्तत्र ८७
विधेयस्यैव प्राधान्यविवक्षया कर्तृत्वकर्मत्वे व्यवस्थिते। अत्र सुवर्णपिण्डः खदिराङ्गारसवर्णो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुण्डले भवत इति भाष्यमेव लिङ्गम् । तत्र नागेशोक्तिरप्यस्मदुक्तस्योपस्तम्भिका, खदिराङ्गार-कुण्डले भवत इति भाष्यमेव लिङ्गम् । तत्र नागेशोक्तिरप्यस्मदुक्तस्योपस्तम्भिका, खदिराङ्गारकुण्डले भवत इति प्रयोगादच्व्यन्ते विकृतेः कर्तृत्वं बोध्यमिति । तथा च छान्दोग्ये 'ता सवर्णे कुण्डले भवत इति प्रयोगादच्व्यन्ते विकृतेः कर्तृत्वं बोध्यमिति । तथा च छान्दोग्ये 'ता समुद्रात्समुद्रमेवापियन्ति समुद्र एव भवति' इति विधेयस्य कर्तृत्वमनुरुध्य प्रयोगः । समुद्रीभवन्तीति चार्थः । 'यस्मिन्त्सर्वाणि भूतान्यात्मैवाभूद्विजानतः' इति यजुषि तु तात्त्विकस्य विकारस्याभावेऽपि विकारविवक्षायामात्मनो विधेयस्य कर्तृत्वं व्याख्येयम् । परमयमप्युत्सर्गो नानास्कन्नोऽपवादेन । अत्र 'सर्वं एकं भवन्ति' इत्यत्रोपनिषत्प्रयोगे उद्देश्यस्य कर्तृत्वदर्शनात् । तेनान्तर्वाणयो निर्ब्रुवन्तु किमत्र कामचार एवाभ्यनुज्ञात आहोस्विद् व्यवस्थितिरपि काचिदस्तीति । विधेयस्येतिना परिच्छेदे तु तस्यैव कर्तृकर्मत्वे व्यवस्थिते इति शक्यं मुक्तसंशयं वक्तुम् । 'कालादिकृता वस्तु-धर्मा वयःप्रभृतयोऽवस्थेत्युच्यते' इति 'ककुदस्यावस्थायां लोपः' इति सूत्रे काशिकायाम् ।

इदानीं लकारविषये व्यवहारनिबन्धनं कमपि विशेषं विवक्षामः । सूत्रकारेण भगवता वर्तमाने लड्विहितः, व्यवहारे त्वन्यत्रापि स दृश्यते—किं करोमि क्व गच्छामि । अत्र किं मे प्राप्तावसरं कर्तव्यं क्व वा मे गमनं हितमिति वक्तुरात्मनि सम्प्रश्न इति लोट् प्राप्तः । तं व्यावर्त्य लटमेव प्रयुञ्जते प्रयोगचणाः । ननु गच्छामि भोः, ननु करोमि भो इत्यत्र ननुरनुज्ञैषणायाम् । अनुजानीहि मां गमनं प्रतीत्यादिरर्थः । अनुज्ञा चेहेष्यते प्रार्थ्यत इति प्रार्थनायामत्र लोटि प्राप्ते लट्प्रयुक्तिर्व्यवहारमात्रनिबन्धना । 'अङ्ग कूज वृषल । इदानीं ज्ञास्यसि जाल्मेत्यत्र प्रातिलोम्ये गम्यमाने तिङन्तमनुदात्तं भवति' इति प्रत्युदाहृतं काशिकायाम् । (८।१।३३।) तत्र कूजनमनभिप्रेतमसौ कुर्वन्प्रतिलोमो भवतीत्यर्थः । तस्मात्कूजेति लडर्थे लोट्प्रयोग इति प्रव्यक्तम् । लकारान्तराण्यपि तत्रार्थे प्रयुज्यन्ते । तद्यथा—

"कुतो धर्मक्रियाविघ्नः सतां रक्षितरि त्वयि ।
तमस्तपति घर्मांशौ कथमाविर्भविष्यति ॥"

इति कालिदासप्रयोगे लडर्थे लृट् स्पष्टः ।

अत्र पूर्वत्र वाक्ये दार्ष्टान्तिके वर्तमानता क्रियायाः स्पष्टेति तत्साम्यादुत्तरवाक्ये दृष्टान्तेऽपि वर्तमानतैवेष्टा । तत्र च लृट्प्रयुक्तः कविना । सोऽसन्देहं वर्तमान एव व्याख्येयः, गत्यन्तराभावात् । एवं 'प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो' इत्यत्र कुमारे (२।३१।) भविष्यति ज्ञानक्रियाया अनभिप्रेतत्वात् 'अन्तरात्मासि देहिनाम्' इत्यनेनासंगतेश्च वर्तमानतैवाभिप्रेतेति व्यक्तम् । तेनात्रापि लडर्थे लृड्व्यवहारानुपातीति प्रतिपत्तुमुचितं शासनादृतेऽपि ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

'यदि विप्रस्य भगिनी व्यक्तमन्या भविष्यति' इति स्वप्ननाटके (६।१४।) अपि लडर्थे लृट् । 'ब्रह्मणो वा एतद् विजये महीयध्वम्' इति केनोपनिषदि लडर्थे लोट्प्रयोगः . महीयध्व इत्येवार्थ इत्यत्र सर्वस्य सम्प्रतिपत्तेः । 'तद् ब्रूत वत्साः किमतः प्रार्थयध्वमिहागताः' इति कुमारे । (२।२८।) ।

"न भ्रातरो न च पिता नैव त्वं मधुसूदन ।
ये मां विप्रकृतां क्षुद्रैरुपेक्षध्वं विशोकवत् ॥"

इति च भारते (वन० १२।२५, २६ ।)

उभयत्र लडर्थे लोट् प्रयुज्यमानः कादाचित्कतामस्य वारयति प्राचुर्यञ्च प्रमाणयति ।

इदमपि लृट्-प्रयोगे वैचित्र्यं विमर्ष्टव्यम् । 'अक्षमोऽसि सितासिते विवेक्तुमिति व्यक्तम्, नो चेद् दग्धं पूपशकलं नात्स्यसि' (नहीं तो जला हुआ पूए का टुकड़ा न खाता इति लोकभाषायाम्) 'त्वन्नियोगाद्रामदर्शनार्थं प्रस्थितः कथमन्तरा निवर्तिष्ये' (कैसे बीच में ही लौट आता) (प्रतिमा० षष्ठेऽङ्के) 'अन्यथा कथं त्वामर्चनीयं नार्चयिष्यामः' (मालविका०) 'अन्यथा कथं देवी स्वयं धारितं नूपुरयुगलं परिजनस्यानुज्ञास्यति' इति च ।

"यद्यहं गात्रसंस्पर्शं रावणस्य गता बलात् ।
अनीशा किं करिष्यामि विनाथा विवशा सती ॥"

इति रामायणे हनुमन्तं प्रति सीताया वचनम् । अत्र पूर्ववाक्ये यदिशब्दः सिद्धार्थानुवादे, न हेतौ । यथा 'नोलूकोऽपि विलोकते यदि दिवा सूर्यस्य किं दूषणम्' इत्यत्र । अत्रैवमर्थे लृङ् दृश्यते न च शिष्यते । लृटैव चैवमादिरर्थोऽभिधीयते विचक्षणैरितीह समुपन्यस्तैरुदाहरणैरेव सुज्ञानम् । न च हेतुहेतुमद्भावे लिङो लृङो वाऽत्र विषय इति शक्यशङ्कम् । लिङस्तावत्तस्मिन्सति भविष्यन्नेव कालो विषयः । इह च वाक्येष्वतीता क्रियोच्यते न भविष्यती । सापि व्यामिश्रा न शुद्धा । शक्नोत्यर्थोपाधिकेऽर्थे वर्तमानाद्धातोरत्र लृङ् दृश्यते, नानुपहितात् । अत्रोदाहरणेषु हेतुहेतुमद्भाव एव नास्ति । न ह्यत्र क्वचिद्धेतुवाक्यं श्रूयते, सिद्धार्थानुवादकमेव तु वाक्यं यत्र तत्रोच्चार्यते । हेतुहेतुमद्भावाभावे क्रियातिपत्तेर्विचार एव नोदयते। यद्यपीह सर्वत्र पूर्ववाक्येषु तात्पर्यग्रहाद्धेतुत्वे पर्यवस्यत्यर्थः, तथापि हेतुत्वं शब्दोक्तं नास्तीति लिङो लृङो वा नैष विषय इति विशदं विपश्चिताम् । सन्देहाक्रान्ते

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भूतेऽर्थे वर्तमानाद्धातोर्लृट्प्रयोग एव शिष्टाभ्यनुज्ञातोऽविहितोऽपीत्यपि दिङ्मात्रमुदाहरामः— 'न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः' (रघु० ८।४४।) 'तदयमपि त्वष्टुः कुन्दे भविष्यति चन्द्रमाः' इति। (अनर्घ० २।८०।)

इदमपरविधं विमृश्यते—'तीन दिन से मेह बरस रहा है' अस्य वाक्यस्य किमात्मकं संस्कृतमिष्यते। (अद्य) त्रीणि वासराणि वर्षति देव इत्येवास्य संस्कृतं शिष्टजुष्टमिति विभावयामः। अत्रार्थे 'पञ्चवर्षाण्यहं वीरं सत्यसन्धं धनञ्जयम्। यन्न पश्यामि बीभत्सुं तेन तप्ये वृकोदर॥" इति भारते। (वन० १४१। ७।) 'इयन्ति वर्षाणि तया सहोग्रमभ्यस्यतीव व्रतमासिधारम्' इति रघुवंशे च रचनासंवादात्। 'अद्य कतिपयान्यहानि नैवागच्छति, अद्य बहूनि दिनानि नावर्तत' इति च 'उभयाभिसारिकायां' 'धूर्तविटसंवादे' च सन्निवेशसादृश्याच्च। प्रकृते वासराणीत्यत्र द्वितीयाऽत्यन्तसंयोगे। कालो ह्यत्र वर्तमानकालिक्या क्रियया साकल्येनाभिव्याप्त इति तदुपपत्तिः। नायमर्थो विभक्त्यन्तरेण शक्यो वक्तुमिति न तिरोहितं सताम्। केचिदुक्तेऽर्थेऽद्य त्रीणि वासराणि वर्षतो देवस्येति संस्कृतं साधु पश्यन्ति। तन्न। अत्रानुकृतौ कालः प्रधानं क्रिया चोपसर्जनम्। वर्षणं हि कृत्प्रत्ययेन शत्रा कालसम्बन्धितयोक्तमिति व्यक्तमप्रधानम्। मूलहिन्दीवाक्ये तु विपर्ययेणार्थोपन्यास इति मूलच्छाययोर्बिम्बप्रतिबिम्बभावो नास्ति।

इदञ्चापरमेतज्जातीयकं विवेच्यम्। 'छः महीने पूर्व एक भीषण भूकम्प आया' 'महमूद ने भारतवर्ष पर एक हजार वर्ष पूर्व आक्रमण किया' तथा 'पिछले पक्ष में मुसलाधार वृष्टि हुई' इत्यमीषां वाक्यानां किंरूपेणाञ्जसेन संस्कृतेन भवितव्यमिति। केचिदिमानीत्थं परिवर्तयन्ति संस्कृतेन, इतः षण्मासान् पूर्वं बलवद् भूरकम्पत, इतो वर्षसहस्रं पूर्वं महमूदो भारतभुवमाचक्राम, इतः सप्ताहद्वयं पूर्वं धारासारैरवर्षद्देवः। अपरे, इतः षड्भ्यो मासेभ्यः पूर्वं बलवद् भूरकम्पत इतो वर्षसहस्रात्पूर्वं महमूदो भरतभुवमाचक्राम, इतः सप्ताहद्वयात्पूर्वं धारासारैरवर्षद्देवः। इतरे च, षण्मासा अतीता यदा बलवद् भूरकम्पत, वर्षसहस्रमतिक्रान्तं यदा महमूदो भरतभुवमाचक्राम, सप्ताहद्वयं गतं यदा धारासारैरवर्षद्देव इत्येवमुक्तमर्थमनुवदन्ति। सर्वोऽयं प्रकारो दुष्ट इति नाभिनन्दनीयो विदुषामिति संग्रहेणोपपादयामः। प्रकारत्रितये प्रथमः प्रकारस्त्वापाततोऽप्यरम्यः सुतराञ्च जघन्यः। इह षण्मासानित्यादिषु यथा प्रथमाऽनन्वयिनी तथा द्वितीयापि। द्वितीया ह्यत्यन्तसंयोगे विहिता, स चात्र नेष्टः, तेन

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कुतोऽत्र द्वितीया सूपपादा स्यात् । सर्वथाऽनन्वितं पदकदम्बकमिहोपन्यस्तमिति वाक्यमपि न भवति, मूलानुकारिता तु दूरापेता । द्वितीयस्मिन्प्रकारे, इतः षड्भ्यो मासेभ्यः पूर्वमित्यादि यद्यपि सर्वथा संस्कारवत्तथापि विवक्षितमर्थं नार्पयतीति नैषानुकृतिरनवद्या भवति। इदमत्रावद्यम्। मूले समयस्यैकोऽवधिरभिप्रेतः, संस्कृतच्छायायां त्ववधिद्वयं व्यक्तमुदितं भवति। यश्च क्रियाविशेषाभिव्याप्तः कालोऽत्यगान्नासौ परिच्छिन्नः। अत्र वाक्येषु त्विदमादिरर्थो विस्पष्टः। भूकम्पादिर्व्यतिकरो नामातीते मासषट्कादौ काले नाभूत्, ततः पूर्वं कदाभूदिति न सुज्ञानमस्ति। वक्तुश्च नैषा विवक्षेत्ययमपि प्रकारो हेयः। तृतीयस्मिन्प्रकारेऽपि दोषं विभावयामः। अत्र पूर्वत्र वाक्ये कालात्ययो निर्दिष्टः, स किमवधिनः किं क्रियापेक्ष इति च नोक्तम्। उत्तरत्र च क्रियोक्ता स्वातन्त्र्येण, न तु पूर्ववाक्यगतकालावधित्वेन। तेनोभयोर्वाक्ययोरवध्यवधिमद्भावो नावगतो भवति। स च मूलवाक्येऽभिसन्धित्सितो वक्त्रेति दूरं सान्तरे छाया च मूलञ्चेति न दुरवधारं सुधीभिः।

तेनापहाय दुष्टमेतत्प्रकारत्रयं निर्दुष्टमिदं प्रकारद्वयं परिगृह्णन्तु सन्तः। (१) अद्य षण्मासा भुवः कम्पितायाः। अद्य वर्षसहस्रं महमूदस्य भरतभुवमाक्रान्तवतः। अद्य सप्ताहद्वयं धारासारैर्वृष्टस्य देवस्य। (२) इतः षट्सु मासेषु (षष्ठे मासे) बलवद् भूरकम्पत। इतो वर्षसहस्रे (सहस्रतमे वर्षे) महमूदो भरतभुवमाचक्राम। इतः सप्ताहद्वये (चतुर्दशेऽहनि) धारासारैरवर्षद् देवः। अत्र प्रथमे प्रकारे षण्मासाः, वर्षसहस्रम्, सप्ताहद्वयमित्यतीतं कालं परिच्छिन्दन्ति। तत्र च सर्वत्रातीताः सन्तीत्यादेः क्रियाया गम्यमानायाः कर्तृतया प्रथमान्तानीमानि निर्दिष्टानि। भुव इत्यादौ षष्ठी शैषिकी। द्वितीयस्मिन्प्रकार इत इति पञ्चम्यर्थे तसिप्रत्ययान्तः। पञ्चमी च 'यतश्चाध्वकालनिर्माणं तत्र पञ्चमी' इति वार्तिकेन कालमाने विहिता। षट्सु मासेष्वित्यादिषु षष्ठे मासे इत्यादिषु च सप्तमी तु 'कालात्सप्तमी' इति वचनानुसारिणी। इतः स्थानेऽद्येत्यपि प्रयुज्यते। तत्र चायमस्मादह्न इत्यर्थमाचष्टेऽधिकरणवृत्तिरपि। तथा च शिष्टप्रयोगः 'अद्य प्रभृत्यवनताङ्गि तवास्मि दासः' इति। अयं च द्वितीयः प्रकारो भारतेनानुगृह्यते शाबरभाष्येण च। 'पितृलोकं गतः पाण्डुरितः सप्तदशेऽहनि' इति भारते। (आदि०१२६।२९।) 'प्रतीयते हि गाव्यादिभ्यः सास्नादिमानर्थः। तस्मादितो वर्षशतेऽप्यस्यार्थस्य सम्बन्ध आसीदेव। 'ततः परेण ततश्च परतरेणेत्यनादिता' इति शाबरभाष्ये।

इदञ्चात्र सम्प्रधार्यम्। किमेतौ प्रकारौ स्वच्छन्दतो यत्र तत्र शक्यावास्थातुमुत

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथास्वं प्रतिनियतविषयाविति । बाढं प्रतिनियतविषयावि्ति ब्रूमः । प्रथमः प्रकारस्तु क्वचिदेव सङ्गतः स्यात् । तत्र हि कालविशेषस्यातिक्रान्तस्य विशेषणीभूता क्रिया कृत्प्रत्ययान्तेन षष्ठ्यन्तेनोच्यत इति कालापेक्षया प्रव्यक्ता तस्या गौणता । तस्माद्यत्रैवम्विधः क्रियाकालयो-र्गुणप्रधानभावोऽभिप्रेयते तत्रैवैष प्रकार औपयिको नेतरत्र । यत्र तु क्रिया प्राधान्येन विवक्ष्यते तिङा चोच्यते तत्र कालनिर्देशः सप्तम्यैव युक्त इति द्वितीय एव प्रकारस्तत्र युक्तरूप इति पश्यामः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



भारतीयप्राचीन-शासनपद्धतिः ।

श्री रघुनाथशर्मा ।

महसस्तमसः पारे, ज्योतिः स्फुरतु मे हृदि ।
यस्य भासा विभातीदमाचन्द्राग्न्यर्कतारकम् ।।

महतः प्रमोदस्य महतो विस्मयस्य महतो भयस्य च स्थानमिदं यदिदं भारतं वर्षं तदभिजना वयञ्चेदानीं बहुवर्षशतव्यवायेन बन्धनमुक्ता इव कीरा अपरायत्ताः संजाताः । यथा च ते शुकाः स्वामिभिः स्वस्वमनोरथानुक्रमेण यत्किञ्चिदध्यापिताः स्वभाषाऽसंस्तवात्तदेव पदे पदे जल्पन्ति यदेव शिक्षितास्तदेव बहु मन्यन्ते, सजातीयांश्च स्वजात्युचितभाषाभाषिणो नाद्रियन्ते, कुलक्रमागतायाञ्च विहायसा गतौ अन्येष्वप्याचारेषु कुलक्रमायातेषु अपरिचितास्तत्कारिणः स्वजनान् वीक्ष्य स्वयमसमर्था मनसि विस्मिता अप्युपहसन्ति तान्, उपहस्यन्ते च तैः । तथैव वयं भारतीया अपि वर्गद्वयेनाधुना प्रविभक्ताः : तत्रेदमप्रमादेनालोचनीयमस्माभिर्यद्वयं यद्यपि प्रत्यक्षं स्वतन्त्रास्तथापि सर्वस्वातन्त्र्यमूलस्य मानसस्वातन्त्र्यस्याभावादत्यन्तमधुनापि परतन्त्राः ।

अधुनाप्यस्माकं बुद्धिः स्वराष्ट्राभ्युदयार्थं पाश्चात्यदेशपथानेव सुदूरव्यवहितानपि स्वरयानुधावति, गृहस्थितानपि मन्वादिप्रदर्शितान् गुरुशुक्रकणिकभीष्मविदुरकौटिल्यकामन्दकाद्युपदिष्टांश्च पुराणपथान्न जिज्ञासते, न परीक्षते सदसत्त्वाभ्याम्, न शुश्रूषते, न वा तज्ज्ञान् परिपृच्छति, परिप्रश्ने वा का हानिः, सन्तश्चेत्पुराणपथा उपादेया अन्यथा हेया अंशतो वोपादेया हेयाश्चेति ।

महात्मनां श्रीगान्धिमहोदयानामपि स्वशास्त्रोदितपुराणपथावलम्बन एव बुद्धेर्भरवश ८३
आसीत्, यतस्तैः सत्याहिंसाख्ये वर्त्मनी एवाश्रित्येयं भारतभूरुद्धृता । अपरञ्च स्वराष्ट्र-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कल्याणार्थं यत्तैः शस्त्रं सूत्रकर्तनचक्रं स्वीकृतं तदपि पुराणमेव। तथाहि कौटिल्यप्रणीतेऽर्थशास्त्रे सूत्राध्यक्षप्रकरणे त्रयोविंशेऽध्याये—

"विधवान्यङ्गा-कन्या-प्रव्रजिता-दण्डाप्रतिकारिणीभी रूपाजीवामातृकाभिर्वृद्धराजदासीभिर्व्युपरतोपस्थानदेवदासीभिश्च कर्तयेत्। श्लक्ष्णस्थूलमध्यताञ्च सूत्रस्य विदित्वा वेतनं कल्पयेत्। बह्वल्पताञ्च सूत्रप्रमाणं ज्ञात्वा तैलामलकोद्वर्तनैरेता अनुगृह्णीयात्। तिथिषु प्रतिपादनमानैश्च कर्म कारयितव्याः। सूत्रह्रासे वेतनह्रासो द्रव्यसारात्। याश्चानिष्कासिन्यः प्रोषितविधवान्यङ्गाः कन्यका वाऽऽत्मानं बिभृयुस्ताः स्वदासीभिरनुसार्य सोपग्रहं कर्म कारयितव्याः। स्वयमागच्छन्तीनां वा सूत्रशालां प्रत्युषसि भाण्डवेतनविनिमयं कारयेत्। सूत्रपरीक्षार्थमात्रः प्रदीपः। स्त्रिया मुखसंदर्शनेऽन्यकार्यसम्भाषायां वा पूर्वः साहसदण्डः। वेतनकालातिपातने मध्यमः। अकृतकर्मवेतनप्रदाने च। गृहीत्वा वेतनं कर्म अकुर्वन्त्या अङ्गुष्ठसंदंशनं दापयेत्। भक्षितापहृतावस्कन्दितानाञ्चेति"।

ततश्च महात्मानुगृहीतपुराणराजनीतिवर्त्मनां परीक्ष्य समाश्रयणमेवाधुना युक्तम्।

श्रेयान् स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥

[गीता ३ अ० ३५ श्लो०]

इदानीन्तनी पाश्चात्त्यानुगृहीतशासनपद्धतिरपि पुराणभारतीयशासनपद्धत्यनुसारिण्येव। यतस्तस्या एव परिवर्द्धितं परिवर्तितञ्च रूपमाधुनिक्यां शासनपद्धतौ समुपलभ्यते। तथाहि यथाऽधुना प्रजातन्त्रे प्रान्तपतेर्देशपतेश्च सहकारिणस्तत्तद्विभागाध्यक्षा मन्त्रिणः, एकश्च महामन्त्री भवति, तथैव पुरा राजतन्त्रेऽपि तत्तद्विभागाध्यक्षा मन्त्रिणः, एकश्च महामन्त्री बभूवान्ये च स्वस्वविभागाध्यक्षा अमात्यपदवाच्या न तु मन्त्रिणः। तथाहि कौटिलीयेऽर्थशास्त्रे प्रथमेऽधिकरणेऽमात्योत्पत्तिनाम्नि प्रकरणे—

"विभज्यामात्यविभवं देशकालौ च कर्म च।
अमात्याः सर्व एवैते कार्याः स्युर्न तु मन्त्रिणः॥" इत्युक्तम्।

मन्त्रिपुरोहितोत्पत्तिप्रकरणे च महामन्त्रिगुणा उक्तास्तत्रैव—"जानपदोऽभिजातः स्वग्रहः कृतशिल्पश्चक्षुष्मान् प्राज्ञो धारयिष्णुर्दक्षो वाग्मी प्रगल्भः प्रतिपत्तिमान्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्साहप्रभावयुक्तः क्लेशसहः शुचिर्मैत्रो दृढभक्तिः शीलबलारोग्यसत्त्वसंयुक्तः स्तम्भचापल्यवर्जितः संप्रियो वैराणामकर्तेत्यमात्यसम्पत्" । पुरोहितगुणाश्चोक्तास्तत्रैव "पुरोहितमुदितोदितकुलशीलं षडङ्गे वेदे दैवे निमित्ते दण्डनीत्याञ्चाभिविनीतमापदां दैवमानुषीणामथर्वभिरुपायैश्च प्रतिकर्तारं कुर्वीत । तमाचार्यं शिष्यः पितरं पुत्रो भृत्यः स्वामिनमिव चानुवर्तेत ।

ब्राह्मणेनैधितं क्षत्रं मन्त्रिमन्त्राभिमन्त्रितम् ।
जयत्यजितमत्यन्तं शास्त्रानुगमशस्त्रितम् ॥"

ततोऽनन्तरप्रकरणे च 'उपधाभिः शौचाशौचज्ञानममात्यानाम्' इत्येतदर्थपरे 'महामन्त्रिपुरोहितसहितो राजाऽमात्यानां मनःशौचं परीक्षेत । तत्र तत्तदुपधाशुद्धान् तत्तत्कार्येषु नियुञ्जीत, सर्वोपधाशुद्धान् मन्त्रिणः कुर्यात् । सर्वत्राशुचीन् खनिद्रव्यहस्तिवनकर्मान्तेषूपयोजयेत्' इत्युक्तम् । तेन तत्तन्मन्त्रिभ्योऽन्य एव महामन्त्रीति ज्ञायते । मन्त्रिभ्योऽन्येऽपि अमात्याः खनिद्रव्यहस्तिवनादिषु विनियुक्तास्तत्तद्विभागाध्यक्षा भवन्तीति च ज्ञायते ।

किञ्च तत्रैव मन्त्राधिकारनाम्नि प्रकरणे मन्त्रिपरिषदुक्ता । तथाहि—"मन्त्रिपरिषदं द्वादशामात्यान् कुर्वीतेति मानवाः । षोडशेति बार्हस्पत्याः । विंशतिमित्यौशनसाः । यथासामर्थ्यमिति कौटिल्यः । ते ह्यस्य स्वपक्षं परपक्षञ्च चिन्तयेयुः । अकृतारम्भमारब्धानुष्ठानमनुष्ठितविशेषं नियोगसंपदञ्च कर्मणां कुर्युः । आसन्नैः सह कार्याणि पश्येत् । अनासन्नैः सह पत्रसम्प्रेषणेन मन्त्रयेत । इन्द्रस्य हि मन्त्रिपरिषदृषीणां सहस्रम् । तच्चक्षुः । तस्मादिमं द्व्यक्षं सहस्राक्षमाहुः । आत्ययिके कार्ये मन्त्रिणो मन्त्रिपरिषदञ्चाहूय ब्रूयात् । तत्र यद्भूयिष्ठाः कार्यसिद्धिकरं वा ब्रूयुः तत्कुर्यात्" इति । अनेन मताधिक्यस्यैवादरणीयताप्युक्ता सति वैमत्ये । यथा च पुरा राज्ञां विशेषाधिकार आसीत् तथाद्यत्वेऽप्यात्ययिके कर्मणि प्रान्तपतेर्देशपतेश्च विशेषाधिकारो नियमनिर्माणेऽस्त्येवेति समानम् ।

किञ्चाधुना यथा प्रान्तपतेर्देशपतेश्चाधीनं प्रजासभा राजसभा चेति सभाद्वयं वर्तते तथा पुरा राजतन्त्रे प्रजासभा राजसभा गुरुसभा चेति सभात्रयमासीत् । यथा चाधुना जनमतगणनया तत्तद्वर्णानां प्रतिनिधयः प्रजासभासु प्रेष्यन्ते तथा पुरापि चातुर्वर्ण्यं सङ्कीर्णवर्णञ्चाश्रित्य ब्राह्मणाश्चत्वारो विद्वांसः प्रगल्भा राज्ञि मनःशौचवन्तो विद्याव्रतस्नातकाः, ८५
क्षत्रिया अष्टौ बलिनः शस्त्रकुशलाः, वैश्या एकविंशतिसङ्ख्याका वित्तसम्पन्नाः, शूद्राश्च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

त्रयो विनीताः कर्मकुशलाः राज्ञि शुचयश्च, एकश्च सूतः सङ्कीर्णवर्णप्रतिनिधिः श्रवणाद्यष्टधीगुणयुक्तः। सर्वेऽपि प्रतिनिधयः पञ्चाशद्वर्षवयसः प्रगल्भा अनसूयकाः श्रुतिस्मृतिसमायुक्ता विनीताः समदर्शिनः (पक्षपातरहिताः) अलुब्धा व्यसनवर्जिताः। इदञ्चोक्तं सर्वम् ८५ अध्याये शान्तिपर्वणि महाभारते राजधर्मानुशासनप्रकरणे—

"वक्ष्यामि तु यथाऽमात्यान् यादृशाँश्च करिष्यसि ॥
चतुरो ब्राह्मणान् वैद्यान्[1] प्रगल्भान् स्नातकान् शुचीन्।
क्षत्रियाँश्च तथा चाष्टौ बलिनः शस्त्रपाणिनः॥ ७॥
वैश्यान् वित्तेन संपन्नानेकविंशतिसङ्ख्यया।
त्रींश्च शूद्रान् विनीतांश्च शुचीन् कर्मणि पूर्वके[2]॥ ८॥
अष्टाभिश्च [3]गुणैर्युक्तं सूतं पौराणिकं तथा।
पञ्चाशद्वर्षवयसं[4] प्रगल्भमनसूयकम्॥ ९॥
कार्ये विवदमानानां [5]शक्तमर्थेष्वलोलुपम्।
श्रुतिस्मृतिसमायुक्तं विनीतं समदर्शिनम्॥ १०॥
वर्जितञ्चैव व्यसनैः सुघोरैः [6]सप्तभिर्भृशम्।"

एते सर्वे प्रजापक्षीया अमात्यपदवाच्या एतेष्वेवाष्टौ वा पञ्च वा त्रयो वा मन्त्रिणः। सैषा मन्त्रिपरिषद् राजसभा वा। तदुक्तं तत्रैवाध्याये तत्रैव—

"अष्टानां[7] मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत्।
ततः सम्प्रेषयेद् राष्ट्रे राष्ट्रियाय च दर्शयेत्॥ ११-१२॥"

(१) विद्यामधीयते विदन्ति वा वैद्याः। (२) पूर्वके नित्ये कर्मणि।
(३) "शुश्रूषा श्रवणञ्चैव ग्रहणं धारणं तथा।
ऊहापोहार्थविज्ञानं तत्त्वज्ञानञ्च धीगुणाः॥" इति नीलकण्ठी।
(४) पञ्चाशद्वर्षवयसमित्येकैकस्यामात्यस्य विशेषणम्। एतेन लोकानुभवो बुद्धिपरिपाकश्च द्वौ गुणावुक्तौ। (५) कार्ये विवदमानानां मन्त्रिणां मतानि श्रुत्वा स्वमतं व्यवस्थापयितुं शक्तम्। (६) सप्तभिः—मृगयाक्षाः स्त्रियः पानमिति चतुर्भिः कामजैः, दण्डपातनं वाक्पारुष्यमर्थदूषणमिति त्रिभिः क्रोधजैः। (७) अष्टानाम्—ब्राह्मणचतुष्टयं, शूद्रत्रयं सूतश्चेति तेषाम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"तस्मात्सर्वैर्गुणैरेतैरुपपन्नाः सुपूजिताः ।
मन्त्रिणः प्रकृतिज्ञाः स्युः त्र्यवरा महदीप्सवः ॥"
[८३ अ० ४७ श्लो० महा०शान्ति० ।]

'पञ्चानामभावे त्र्यवरास्त्रिभ्यो न्यूना न कार्या' इति नीलकण्ठी । प्रजानां सम्मत एव मन्त्री महामन्त्री च भवतीत्यपि भारतीयसामान्यवाक्यतोऽवगम्यते—

"पौरजानपदा यस्मिन् विश्वासं धर्मतो गताः ।
योद्धा नयविपश्चिच्च स मन्त्रं श्रोतुमर्हति ॥" इति । [८३ अ० ४६ श्लो०]

गुरुसभाऽपि तदनन्तरमेव तत्रैवाध्याय उक्ता—

"नित्यं पञ्चोपधातीतैर्मन्त्रयेत्सह मन्त्रिभिः ॥ ५२ ॥
तेषां त्रयाणां विविधं विमर्शं विबुध्य चित्तं विनिवेश्य तत्र ।
स्वनिश्चयं तत्प्रतिनिश्चयज्ञं निवेदयेदुत्तरमन्त्रकाले ॥ ५३ ॥
धर्मार्थकामः समुपेत्य पृच्छेद् युक्तो गुरुं ब्राह्मणमुत्तरार्थम् ।
निष्ठा कृता तेन यदा सहः स्यात्तं मन्त्रमार्गं प्रणयेदसक्तः ॥ ५४ ॥"

"तेषामिति । त्रयाणां त्रीणि मतानि स्वनिश्चयं चावधार्य निश्चयज्ञं गुरुं प्रति तन्मतचतुष्टयं निवेदयेदिति द्वयोः सम्बन्धः ॥ ५३ ॥ तेन गुरुणाऽपि चतुर्भिः सह ऊहापोहपूर्वकं यदा निष्ठा सिद्धान्तः कृतो भवेत् सोऽपि यदा सहः स्यात् सर्वेषामैकमत्येन सम्मतः स्यात्तदा तं मन्त्रं प्रणयेत् कार्ये नियोजयेत् ॥ ५४ ॥" इति नीलकण्ठी ।

गुरुश्च कौटिल्यप्रोक्तलक्षणलक्षितः पुरोहित एव । यथा श्रीरामचन्द्रस्य वसिष्ठो यथा वा श्रीबुक्कणक्ष्मापतेर्माधवः । एतदुक्तं जैमिनीयन्यायमालाविस्तरारम्भे स्वयमेव माधवेन ।

यथाधुना प्रान्तपति'गॅवर्नर'पदवाच्यो मण्डलाध्यक्षः 'कलक्टर'पदवाच्यस्तदायत्ताश्च भूकरादायिनः 'तहसीलदार'पदवाच्यास्तथा पुरापि राष्ट्रियः सहस्रग्रामीपतिः शतग्रामीपति-विंशतिग्रामीपतिर्दशग्रामीपतिर्ग्रामाधिपतिश्चेतिक्रमेण शासका बभूवुः । तेषां संग्रामकृत्यस्य ग्राम-कृत्यस्य च सम्पादकः कश्चिद् धर्मज्ञः (राजधर्मपरिज्ञाता) अमात्यो बभूवैकः । यद्वा नगरे

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

नगरे कश्चिद् घोररूपो बलाध्यक्ष एव बभूव । यथाधुना मण्डले मण्डले 'एस०पी०' पदवाच्यो भवति । सर्वमप्येतदुक्तं महाभारते शान्तिपर्वणि ८७ अध्याये—

"राष्ट्रगुप्तिञ्च ते सम्यग् राष्ट्रस्यैव तु संग्रहम् ।
हन्त सर्वं प्रवक्ष्यामि तत्त्वमेकमनाः शृणु ॥ २ ॥
ग्रामस्याधिपतिः कार्यो दशग्राम्यास्तथा परः ।
द्विगुणायाः शतस्यैवं सहस्रस्य च कारयेत् ॥ ३ ॥
ग्रामेयान् ग्रामदोषांश्च ग्रामिकः प्रतिभावयेत् ।
तान् ब्रूयाद् दशपायासौ स तु विंशतिपाय वै ॥ ४ ॥
सोऽपि विंशत्यधिपतिर्वृत्तं जानपदे जने ।
ग्रामाणां शतपालाय सर्वमेव निवेदयेत् ॥ ५ ॥
तेषां संग्रामकृत्यं स्याद् ग्रामकृत्यञ्च तेषु यत् ।
धर्मज्ञः सचिवः कश्चित्तत्तत्पश्येदतन्द्रितः ॥ ९ ॥
नगरे नगरे वा स्यादेकः सर्वार्थचिन्तकः ।
उच्चैः स्थाने घोररूपो नक्षत्राणामिव ग्रहः ॥१०॥"

राष्ट्रियश्च ८५ अध्याये तत्रैवोक्तः—

"अष्टानां मन्त्रिणां मध्ये मन्त्रं राजोपधारयेत् ।
ततः सम्प्रेषयेद् राष्ट्रे राष्ट्रियाय च दर्शयेत् ॥११॥"

राष्ट्रेऽधिपतित्वेन भवो राष्ट्रियः । राष्ट्रियस्याप्यधिपतिः समाहर्ता बभूव । यथाधुना प्रान्तपतेरप्यध्यक्षो देशपतिर्भवति 'गवर्नरजनरल' इति प्रसिद्धः । तदुक्तं कौटिलीयेऽर्थशास्त्रेऽध्यक्षप्रचारे द्वितीयाधिकरणे षष्ठाध्याये समाहर्तृसमुदयप्रस्थापननाम्नि प्रकरणे—

"समाहर्ता दुर्गं राष्ट्रं खनिं सेतुं वनं व्रजं वणिक्पथञ्चावेक्षेत । शुल्कं दण्डः पौतवं नागरिको लक्षणाध्यक्षो मुद्राध्यक्षः सुरा सूना सूत्रं तैलं घृतं क्षारः सौवर्णिकः पण्यसंस्था वेश्या द्यूतं वास्तुकं कारुशिल्पिगणो देवताध्यक्षो द्वारवाहिरिकादेयञ्च दुर्गम् । सीताभागो बलिः करो वणिक् नदीपालस्तरो नावः पट्टनं विवीतं वर्तनी रज्जुश्चोररज्जुश्च राष्ट्रम् । सुवर्णरजतवज्रमणिमुक्ताप्रवालशङ्खलोहलवणभूमिप्रस्तररसधातवः खनिः । पुष्पफलवाटषण्डकेदारमूलवापाः सेतुः । पशुमृगद्रव्यहस्तिवनपरिग्रहो वनम् । गोमहिषमजाविकं खरोष्ट्रमश्वाश्वतराश्च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

व्रजः। स्थलपथो वारिपथश्च वणिक्पथः। इत्यायशरीरम्। मूलं भागो व्याजी परिघः क्लृप्तं रूपिकमत्ययश्चायमुखम्।" इति।

एतेन राष्ट्रस्य राष्ट्रियाधीनत्वेऽपि समाहर्त्रधीनत्वमपि गम्यते। यथाधुना द्विविधा न्यायालया भवन्ति 'दीवानी'तिनाम्ना प्रसिद्धो दायनिर्णेतृन्यायालयः। अपरश्च 'माल' इतिनाम्ना ख्यातः पारुष्यनिर्णेतृन्यायालयः शासकाधीनः। तत्र दायनिर्णेतृन्यायालयेऽपि वधादयो महान्तोऽपराधा निर्णीयन्ते। पारुष्यनिर्णेतृन्यायालयेऽपि लघवो विवादा भूमिभूकरादिविषया निर्णीयन्ते। द्वावपीमौ मार्गौ प्रत्येकं भूमिकात्रयेण तच्चतुष्टयेन वा विभक्तौ। पूर्वभूमिका-निर्णीतार्था एवोत्तरभूमिकासु पुनर्विचार्यन्ते सति वादिनोरन्यतरस्य द्वयोर्वाऽसंतोषे। सर्वा-स्वपि भूमिकासु प्रत्येकमेकैक एव निर्णायको भवति। कदाचिदेव 'हाईकोर्ट'नाम्नि न्यायालये न्यायाधीशा यथासम्भवं सम्मिल्य विचारयन्ति। पुरापि द्वौ न्यायालयावास्ताम्। एको धर्मस्थन्यायालयोऽपरश्च प्रदेष्टन्यायालयः। तत्र धर्मस्थन्यायालये त्रयोऽमात्या धर्मोपधाशुद्धाः सम्मिल्य निर्णायका बभूवुः। धर्मेषु वर्णाश्रमजातिसम्बन्धिषु तिष्ठन्ति तान् धर्मान् विदन्त्य-नुवर्तन्ते चेति धर्मस्थपदेनोच्यन्ते। तत्र धर्मस्थन्यायालयस्य चतस्रः पञ्च वा भूमिका आसन्। तथाहि—

"जनपदसन्धौ संग्रहणे द्रोणमुखे स्थानीये चेति। तत्र जनपदसन्धिरन्तपालदुर्गः, संग्रहणं दशग्रामीप्रधानाधिष्ठानं चतुश्शतग्रामीप्रधानाधिष्ठानञ्चेति द्विविधम्। द्रोणमुखमष्ट-शतग्रामीप्रधानाधिष्ठानम्। स्थानीयं विवादपदाधिकरणग्रामेण साक्षात्सम्बद्धो न्यायालयः।"

पूर्वपूर्वभूमिकास्वसन्तोषे चोत्तरोत्तरभूमिकाश्रयणमासीदिति चानेकभूमिकाकल्पनया प्रतीयते। धर्मस्था एव दायपारुष्ययोरुभयोरपि निर्णायका आसन्। यतस्तयोरुभयोरपि निर्णेतृत्वेन धर्मस्था एव कौटिलीयेऽर्थशास्त्रे तृतीयेऽधिकरणे स्पष्टं समुपलभ्यन्ते। तदुक्तम्—'धर्मस्थास्त्र-यस्त्रयोऽमात्या जनपदसन्धिसंग्रहणद्रोणमुखस्थानीयेषु व्यावहारिकानर्थान् कुर्युः'। प्रदेष्टृ-न्यायालयश्च प्रकटकण्टकप्रतिशोधनार्थं आसीत्। तथाहि, राज्ये द्विविधाः प्रजाः कण्टका भवन्ति प्रकटकण्टकाः प्रच्छन्नकण्टकाश्चेति। तत्र प्रकटकण्टका यथा कारुकवैदेहकाः। तत्र कारुका नाडिन्धमतक्षायस्कारतन्तुवायतुन्नवायरजकसरकपांशुधावकभिषक्कुशीलवचारण-भिक्षुकादयः। वैदेहका वणिजः। तेषामपराधप्रतिषेद्धारः प्रदेष्टार उच्यन्ते, तेऽपि त्रयस्त्रयो-ऽमात्या आसन्। तेषां न्यायालयोऽपि भूमिकाचतुष्टयेन तत्पञ्चकेन वा प्रविभक्तः प्रागुक्त- ८९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रीत्यासीद् विशेषानुक्तेः। तेषां दण्डापराधादिनिर्णयार्थं कारुकरक्षणं वैदेहकरक्षणं चेत्यध्याय-द्वयं कौटिलीयेऽर्थशास्त्रे निर्मितम्। तथा च कारुकरक्षणाध्यायस्य चरमः श्लोकः—

"एवं चोरानचोराख्यान् वणिक्कारुकुशीलवान्।
भिक्षुकान् कुहकांश्चान्यान् वारयेद् देशपीडनात्॥"

चोरानचोराख्यानित्यस्य चोरकर्मकुर्वाणानप्यचोरसंज्ञानित्यर्थः। कुहकान् ऐन्द्रजालिकान्। वैदेहकरक्षणाध्यायस्य चायञ्चरमः श्लोकः—

"प्रक्षेपं पण्यनिष्पत्तिं शुल्कं वृद्धिमवक्रयम्।
व्ययानन्यांश्च सङ्ख्याय स्थापयेदर्घमर्घवित्॥"

देशव्यवहितानां कालव्यवहितानाञ्च पण्यानां प्रक्षेपं वस्तुमूल्यम्, पण्यनिष्पत्तिमिदमियता कालेन निष्पद्यत इत्यमुमर्थम्, शुल्कं राजग्राह्यकरम्, वृद्धिं वस्तुमूल्यस्य, अवक्रयं शकटबलीवर्दादिभाटकम्, अन्यान् व्ययांश्च सङ्ख्यायार्घं स्थापयेत् कल्पयेद् अर्घविदर्घविधानाभिज्ञः संस्थाध्यक्षः। तदतिक्रमे दण्ड इति भावः। प्रच्छन्नकण्टकाश्च त्रयोदश—धर्मस्थः प्रदेष्टा ग्राममुख्यः तत्तद्विभागाध्यक्षः कूटसाक्षी कूटश्रावकः संवननकर्ता कृत्याशीलः अभिचारशीलः रसदः मदनयोगव्यवहर्ता कूटरूपकर्ता कूटसुवर्णव्यवहारी चेति। ते च कौटिलीयेऽर्थशास्त्रे गूढाजीविरक्षाप्रकरणे यथायथं दर्शिताः। तथा च तत्प्रकरणस्यायञ्चरमः श्लोकः—

"आरब्धारस्तु हिंसाया गूढाजीवास्त्रयोदश।
प्रवास्या निष्क्रयार्थं वा दद्युर्दोषविशेषतः॥"

हिंसाया लोकोपद्रवस्य कर्तारो गूढाजीवास्त्रयोदश प्रवास्याः स्वदेशतो निष्कासयितव्याः। दोषविशेषतोऽपराधतारतम्येनापराधनिष्क्रयार्थं दण्डं वा दद्युरित्यर्थः। तथा च तेषां प्रच्छन्नकण्टकानां प्रतिशोधनार्थं समाहर्ता सिद्धतापसादिव्यञ्जनान् चरान् नियुञ्जीत। गूढजीवित्वशङ्कायाञ्च परीक्ष्य प्रवास्यास्ते। तदुक्तं कौटिलीये गूढजीविरक्षाप्रकरणे—

"समाहर्ता जनपदे सिद्धतापसप्रव्रजितचक्रचरचारणकुहक प्रच्छन्दककार्तान्तिकनैमित्तिकमौहूर्तिकचिकित्सकोन्मत्तकमूकबधिरजडान्धवैदेहककारुशिल्पिकुशीलववेशशौण्डिकापूपिक-

पाक्वमांसिकौदनिकव्यञ्जनान् प्रणिदध्यात्। ते ग्रामाणामध्यक्षाणाञ्च शौचाशौचं विद्युः, यञ्चात्र गूढजीविनं शङ्केत तं सत्रिसवर्णेनापसर्पयेत्। धर्मस्थं प्रदेष्टारं वा विश्वासो-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पगतं सत्री ब्रूयात् । असौ मे बन्धुरभियुक्तस्तस्यायमनर्थः प्रतिक्रियताम्, अयञ्चार्थः प्रतिगृह्यतामिति । स चेत्तथा कुर्यात्, उपदाग्राहक इति प्रवास्येत । तेन प्रदेष्टारो व्याख्याताः" इत्यादि ।

करवृद्धया च प्रजा उद्विजन्ते विशेषतो वैदेहकाः कर्षकाश्च । तथाहि महाभारते शान्तिपर्वणि ८९ अध्याये भीष्मस्य युधिष्ठिरं प्रति प्रश्नः—

"कच्चित्ते वणिजो राष्ट्रे नोद्विजन्ति करार्दिताः ।
क्रीणन्तो बहुनाऽल्पेन कान्तारकृतविश्रमाः ॥ २२ ॥
कच्चित्कृषिकरा राष्ट्रं न जहत्यतिपीडिताः ।
ये वहन्ति धुरं राज्ञां ते भरन्तीतरानपि ॥ २३ ॥"

अतः करवृद्धेरावश्यकत्वेऽपि क्रमेणैव करवृद्धिः सम्पाद्या न तु सहसा युगपदेव । एतदप्युक्तं महाभारत एव शान्तिपर्वणि ८८ अध्याये—

"अल्पेनाल्पेन देयेन वर्धमानं प्रदापयेत् ।
ततो भूयस्ततो भूयः क्रमवृद्धिं समाचरेत् ॥ ७ ॥
दमयन्निव दम्यानि शश्वद्भारं विवर्धयेत् ।
मृदुपूर्वं प्रयत्नेन पाशानभ्यवहारयेत् ॥ ८ ॥
न चास्थाने न चाकाले करांस्तेभ्यो निपातयेत् ।
आनुपूर्व्येण सान्त्वेन यथाकालं यथाविधि ॥ १२ ॥" इति ।

यथा चाधुना प्रजातन्त्रे 'पार्टी'नाम्ना प्रसिद्धाः सङ्घास्तेषां नेतारश्च भवन्ति, केचन राज्योपकारकाः केचन तद्विघातकाश्च तथैव पुरा राजतन्त्रेऽपि तत्तन्नाम्ना प्रसिद्धाः सङ्घास्तन्नायकाश्च बभूवू राज्योपकारकास्तद्विघातकाश्च । तेषाञ्चानुगुणानां सामदानाभ्यामुपभोगो विगुणानाञ्च तेषां भेददण्डाभ्यां विघटनं राज्ञः कर्तव्यमुपदिष्टं कौटिलीये तदेव प्रजातन्त्रेऽपि आवश्यकम्, क्रियतेऽपि च । तथाहि कौटिलीयेऽर्थशास्त्रे सङ्घवृत्तनाम्नि एकादशेऽधिकरणे उक्तम्—

"सङ्घलाभो दण्डमित्रलाभानामुत्तमः । सङ्घा हि संहतत्वादधृष्याः परेषाम् । तान
नुगुणान् भुञ्जीत सामदानाभ्याम् । विगुणान् भेददण्डाभ्याम् । सङ्घेष्वेवमेकराजो भेददण्डाभ्यां ११
वर्तेत । सङ्घाश्चाप्येवमेकराजादेतेभ्योऽतिसन्धानेभ्यो रक्षयेयुः । (आत्मानमिति शेषः ।)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सङ्घमुख्यश्च सङ्घेषु न्यायवृत्तिर्हितः प्रियः ।
दान्तो युक्तजनस्तिष्ठेत् सर्वचित्तानुवर्तकः ॥" इति ।

भेददण्डोपायाश्चास्मिन्नेवाधिकरणे बहुधा प्रदर्शिताः । महाभारतेऽपि शान्तिपर्वणि १०७ अध्याये भीष्मवाक्यानि—

"द्रव्यवन्तश्च शूराश्च शस्त्रज्ञाः शास्त्रपारगाः ।
कृच्छ्रास्वापत्सु संमूढान् गणाः सन्तारयन्ति ते ॥ २ ॥"

अनेन भारतवाक्येन प्रतीयते यत्पुरा धनिनां भटानां विदुषाञ्च पृथक् पृथक् सङ्घा आसन्निति ।

"क्रोधो भेदो भयं दण्डः कर्षणं निग्रहो वधः ।
नयत्यरिवशं सङ्घो गणान् भरतसत्तम ॥२२॥
तस्मान्मानयितव्यास्ते गणमुख्याः प्रधानतः ।
लोकयात्रा समायत्ता भूयसी तेषु पार्थिव ॥२३॥
मन्त्रगुप्तिः प्रधानेषु चारश्चामित्रकर्षण ।
न गणाः कृत्स्नशो मन्त्रं श्रोतुमर्हन्ति भारत ॥२४॥
गणमुख्यैस्तु सम्भूय कार्यं गणहितं मिथः ॥२५॥
भेदाच्चैव प्रदानाच्च भिद्यन्ते रिपुभिर्गणाः ।
तस्मात्सङ्घातमेवाहुर्गणानां शरणं महत् ॥ ३२ ॥"

'सङ्घात ऐकमत्यमि'ति नीलकण्ठी । तदेष भारतीयप्राचीनशासनपद्धतेर्दिङ्निर्देश उदाहृतः । कौटिलीयेऽर्थशास्त्रे त्वपेक्षिताः सर्वेऽपि राजधर्माः प्राधान्येन सपञ्चाशदध्यायशतेन षड्भिः श्लोकसहस्रैः समुपदिष्टाः । तत्र मित्रहिरण्यभूमिकर्मानवसितसन्धयो विग्रहाद्याश्च विषया राज्ञां प्रतिदिनमपेक्षिताः प्रतिपक्षनिरासेन व्यवस्थाप्य दर्शिताः । महाभारतेऽपि शान्तिपर्वण्युद्योगपर्वण्यनुशासनपर्वणि च प्राधान्यविस्तराभ्यां नानाख्यानैरुपदृष्टान्तैश्च, अन्येष्वपि पर्वसु तत्र तत्र प्रकीर्णरूपतया च निर्णीताः । सुनीतयः कुटिलनीतयश्च कणिकादिप्रवक्तृमुखेन सप्रमाणं सोदाहरणञ्च संदर्शिताः । तदेष प्राचीनशासनपथो देशस्य बहुकालपराधीनतया ग्रन्थस्थितोऽपि व्यवहारागोचरत्वेनाजस्रमक्षुण्णतया प्रत्यक्षतोऽविभाव्यमानः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पारिभाषिकशब्दानामपरिचयात् क्लेशेनानुमीयमानः सुचारुरपि धूलिसंवृतं रत्नमिवाचारुत्वेनोपेक्ष्यतेऽधुना । अन्यच्चोपेक्षाकारणं व्यवहारे पुरः प्रसर्पतां नेतॄणां संस्कृतभाषात्यन्तासंस्तवमूलिकाऽरुचिः । तदेषाऽन्ते भूयोऽभ्यर्थना यद् भारतीयप्राचीनशासनपथस्य परीक्ष्य समाश्रयणमेव श्रेयस्करम् । इदञ्चाशीर्वचः ।

विग्रहः करितुरङ्गपत्तिभिर्नो कदाऽपि भवतान्महीभुजाम् ।
नीतिमन्त्रपवनाहताश्चिरं संश्रयन्तु गिरिगह्वरं द्विषः ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भारतीयमर्थशास्त्रम् ।

श्रीकेदारनाथशर्म्मा सारस्वतः ।

मनवे वाचस्पतये शुक्राय पराशराय ससुताय ।
चाणक्याय च विदुषे नमोऽस्तु नयशास्त्रकर्तृभ्यः ॥

विष्णुशर्म्मा ।

धर्ममर्थञ्च कामञ्च प्रवर्त्तयति पाति च ।
अधर्मानर्थविद्वेषानिदं शास्त्रं निहन्ति च ॥

कौटल्यः ।

त्रिवर्गसाधनैकलक्ष्यं मानुषं जन्म । तत्र धर्म एवार्थकामद्वारा व्यक्तेः समाजस्य राष्ट्रस्य राज्यस्य स्थितिं तदभ्युदयञ्च सम्पादयति । कामस्तु फलमात्रम्, धर्मार्थौ च साधनभूतौ । तत्रापि धर्मस्थितिनिबन्धनाय कामोपभोगाय च प्रधानकारणीभूतो ह्यर्थस्त्रिवर्गमूलमिति न कस्याप्यल्पज्ञस्यापि विचिकित्सास्पदम् । उक्तमेवार्थशास्त्रस्य परमाचार्येण कौटल्यविष्णुगुप्तेन—'अर्थमूलौ हि धर्मकामौ' इति । (अर्थशास्त्रम्, १५ अ०)

यतो मानवसृष्टेः प्रादुर्भावस्तत एव कियत्कालानन्तरमेव वा प्रवृत्तमिदं शास्त्रमिति स्वभावसिद्धम् । आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थवेदश्चेति चतुष्टयं समाजस्य स्वाभाविकमङ्गम् । समाजे जनानां रोगाः समुत्पत्स्यन्त एव, तन्निराकरणायायुर्वेदस्यावश्यकत्वम् । शत्रूणां दस्यूनां हिंस्रजन्तूनाञ्च भयनिवारणाय ततश्चात्मरक्षणाय धनुर्वेदस्य (शस्त्रविद्यायाः) प्रयोजनं सुतरां सिद्धमेव । मानवहृदयस्योल्लासप्रकाशाय तृतीयपुरुषार्थसचिवस्य सङ्गीतस्यापि प्रयोजनं स्वाभाविकमेव । समाजव्यवस्थितये तद्धर्मसंरक्षायै समभ्युदयाय चार्थशास्त्रस्यावश्यकत्वमर्थादेव सिद्धम् । अत एव वात्स्यायनः कामशास्त्रसमुद्देशप्रकरणे—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"प्रजापतिर्हि प्रजाः सृष्ट्वा तासां स्थितिनिबन्धनं त्रिवर्गस्य साधनमध्यायानां शतसहस्रेणाग्रे प्रोवाच। तस्यैकदेशं स्वायम्भुवो मनुर्धर्माधिकारिकम्। बृहस्पतिरर्थाधिकारिकम्। महादेवानुचरो नन्दी सहस्रेणाध्यायानां पृथक् कामसूत्रं प्रोवाच" इति समुल्लिलेख।

[कामसूत्रम्, १ अधि०, ५–६–७–८]

चरकसंहितायाञ्च—'ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत्।' इति प्रोवाच।

अर्थशास्त्रविषयेऽपि श्रूयते पुराणेषु—

"ब्रह्माध्यायसहस्राणां शतं चक्रे स्वबुद्धिजम्।
तन्नारदेन शक्रेण गुरुणा भार्गवेण च॥
भारद्वाजविशालाक्षभीष्मपाराशरैस्तथा।
सङ्क्षिप्तं मनुना चैव तथा चान्यैर्महर्षिभिः॥
प्रजानामायुषो ह्रासं विज्ञाय च महात्मना।
सङ्क्षिप्तं विष्णुगुप्तेन नृपाणामर्थसिद्धये॥" इति।

एतावता निश्चितं यदिदमर्थशास्त्रं प्रजासर्जनसमकालमेव सृष्टं तत्स्थितिनिबन्धनाय दण्डनीतिराजशास्त्रापरपर्यायम्। तदिदं प्राचीनतमं प्रथमञ्च शास्त्रमिति।

महाभारतेऽपि प्रतिपादितं यत् पुरा नैव राज्यमासीत्, न चापि राजा, स्वधर्मपालनबुद्ध्यैव व्यवहरन्ति स्म जनाः। तदनन्तरं शनैः शनैर्धर्माभिभवाद् मात्स्यन्यायेन प्रबला दुर्बलानामुत्पीडनमकार्षुः। ततः प्रजाभिः सानुक्रोशमभ्यर्थितः प्रजापतिर्मनुं नाम प्रथमं राजानं चक्रे। सति राजनि राज्ये च तद्व्यवस्थापकं नियामकञ्च शास्त्रमपि प्रवर्त्तितं राज्यनिर्मातृभिर्विद्वद्भिः शासकैश्च। तदेतद् राजशास्त्रं सर्वप्रधानं प्रथमञ्च शास्त्रमिति सुवचम्। अस्य प्राधान्यमधिकृत्य महाभारते समुद्घोषितं राजशास्त्राचार्येण भीष्मेणापि—

"मज्जेत् त्रयी दण्डनीतौ हतायां सर्वे धर्माः प्रक्षयेयुः प्रवृद्धाः।
सर्वे धर्माश्चाश्रमाणां हताः स्युः क्षात्रे त्यक्ते राजधर्मे पुराणे॥
सर्वे त्यागाः राजधर्मेषु दृष्टाः सर्वा दीक्षा राजधर्मेषु चोक्ताः।
सर्वा विद्या राजधर्मेषु युक्ताः सर्वे लोका राजधर्मे प्रविष्टाः॥"

[शान्तिपर्वणि, ६३ अध्याये]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्रैव सप्ततितमेऽध्याये—

"दण्डनीतिः स्वधर्मेभ्यो चातुर्वर्ण्यं नियच्छति ।
प्रयुक्ता स्वामिना सम्यगधर्मेभ्यो नियच्छति ॥
चातुर्वर्ण्ये स्वकर्मस्थे मर्यादानामसङ्करे ।
दण्डनीतिकृते क्षेमे प्रजानामकुतोभये ॥"

[श्लो० ७६–७७ ।]

भगवता मनुना चत्वारि विद्यास्थानानि प्रोक्तानि । यथा—

"आन्वीक्षिकी त्रयी वार्ता दण्डनीतिश्च शाश्वती ।
एता विद्याश्चतस्रश्च धर्मसंस्थितिहेतवः ॥" इति ।

अर्थशास्त्रस्य प्रधानाचार्यो मन्त्रद्रष्टा उशनाः काव्यस्तु केवलं 'दण्डनीतिरेवैका विद्या' इति वदन् दण्डनीतिमेवैकां प्रधानविद्यामुररीकरोति । आचार्यकौटल्योऽपि सर्वासु विद्यासु दण्डनीतेरेव प्राधान्यं व्याजहार । यथा—

"आन्वीक्षिकीत्रयीवार्तानां योगक्षेमसाधनो दण्डः । तस्य नीतिर्दण्डनीतिः । सा चालब्धलाभार्था लब्धपरिरक्षणी रक्षितविवर्द्धनी वृद्धस्य तीर्थेषु प्रतिपादनी च । तस्यामायत्ता लोकयात्रा । तस्माल्लोकयात्रार्थी नित्यमुद्यतदण्डः स्यात् । सुविज्ञातप्रणीतो हि दण्डः प्रजा धर्मार्थकामैर्योजयति । अप्रणीतो हि मात्स्यन्यायमुद्भावयति । बलीयानबलं ग्रसते दण्डधराभावे ।"

[अर्थशास्त्रम्, १ अधि०, ४ अध्यायः ।]

वस्तुतो बलादेव धर्मरक्षा आत्मरक्षा देशसमाजराष्ट्राणां च रक्षणं कर्तुं शक्यते । न ह्यबलः स्वात्मानमपि गोप्तुं प्रभवति, किं पुनर्देशजात्यादीनिति । प्रत्यक्षमेव प्रतिदिनमालोक्यते । अतोऽस्य शास्त्रस्य सर्वप्राधान्यं प्राथम्यञ्च स्वभावसिद्धमेव वर्वर्त्ति ।

साम्प्रतं कियद्भ्यः शतकेभ्यः शास्त्रमिदमुत्तरोत्तरमुपचीयमानं परिबृंहमाणञ्च जटिलं गभीरं महत्त्वमयञ्च सञ्जातम् । अत्र विविधा नवनवाः शाखाः प्रशाखाः प्रत्यहं समुन्मेषमापन्ना दरीदृश्यन्ते । महदिदं विशालमिदं शास्त्रं विशालतमं समभूत् । शतशो राजनीतिज्ञा अर्थशास्त्रविद्वांसः सर्वदा नवनवानुसन्धाने संलग्नाः सन्ति । महानयं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गभीरतमो विषयश्छात्राणामध्ययनस्य । नवनवा राजनीतिप्रयोगाः प्रयुज्यन्ते । नवनवानुसन्धानं प्रचलति राजनीतिज्ञानाम् । सहस्रशो ग्रन्था निर्मीयन्ते । पत्राणि प्रकाश्यन्ते । शताधिकेषु विश्वविद्यालयेष्वर्थशास्त्रस्य भिन्नभिन्नासु शाखासु सहस्रशश्छात्राः प्रत्यहं पाठ्यन्ते । परमस्माकं भारतीयाः पण्डिता द्वित्रपुस्तकेषु पञ्चषपङ्क्तिषु वा प्राणव्ययं बहु मन्यमाना व्यर्थवादेषु जीवनं क्षपयन्तो न जानन्ति यदस्माकं पूर्वजा देवा ऋषयः आचार्या विद्वांसो नरपतयश्च परःसहस्रवर्षाणि यावद् राजशास्त्रमेवालोचयन्तः, आश्रमशालासु ऋषिकुलेषु गुरुकुलेषु राजकुलेषु शिष्यानध्यापयन्तश्चास्य शास्त्रस्य मार्मिकमनुसन्धानमकुर्वन् । बहवो ग्रन्था निरमीयन्त । विविधा राजनीतिप्रयोगाः कूटनीतिप्रयोगाश्चाक्रियन्त । तैरेव नीतिनिपुणैरियमार्यजातिः समुन्नतेश्चरमं शिखरमध्यारोपिता । तैरेव च नयज्ञैर्भारतीयं साम्राज्यं विशालविस्तृतं सुदृढं प्रबलतरञ्चाक्रियत ।

यद्यप्यस्माकमसामर्थ्येनास्माकमितिहासो लुप्तप्राय एव । यत्किमपि समुपलभ्यते तत्कूटनीतिकुशलानां पाश्चात्यगवेषकाणां कृपया । तथापि पाठकानां कौतूहलविनोदनायार्थशास्त्रस्य भारतीयस्य संक्षिप्ततमपरिचयाय प्रयत्यते ।

आर्यवाङ्मयस्य सर्वप्रथमरचनासु वेदेषु भूयान् राजशास्त्रीयो विषयः समुपलभ्यते । तत्र देवासुराणां सङ्ग्रामवर्णनम्, राज्यभौज्यवैराज्यस्वाराज्यसाम्राज्यपारमेष्ठ्यजानराज्यादिविविधशासनप्रणालीनां नामान्युपलभ्यन्ते । राजप्रतिज्ञासभासमितिसंस्थापनराष्ट्ररक्षण–राष्ट्राभ्युदयराज्याभिषेकप्रभृतयो विषयाः प्राचुर्येण समुपवर्णिताः । विविधशस्त्रास्त्रनामानि देवासुरयुद्धवर्णना चापि समालोक्यन्ते । इत्येवं वेदेष्वेव भूयान् राजशास्त्रविषयः समुपलभ्यते ।

पुरा मारीचकश्यपस्य महर्षेः पत्नी दितिर्दैत्यान्, दनुश्च दानवान् प्रासोष्ट । वर्द्धमानैस्तैः पृथिव्याः प्रचुरतरो भागः स्वायत्तीकृतः । तदनन्तरञ्च मन्वन्तरे कश्यपस्य तृतीया पत्नी दक्षकन्याऽदितिर्द्वादशपुत्रान् सुषुवे । एत एवादित्या देवा वा कथ्यन्ते । तैरपि प्रवृद्धैर्दैत्येभ्यो दानवेभ्यश्च कश्चन भूभागः प्रार्थितः । तैरसुरैर्दानवैश्च देवानां प्रार्थना न स्वीकृता । अतस्तेषां तदर्थं बहवः संग्रामा अभूवन्निति संहिताब्राह्मणग्रन्थेभ्यो वाल्मीकिप्रणीतरामायणाच्चाधिगम्यते । यथा—

"दितिस्त्वजनयत् पुत्रान् दैत्यांस्तात यशस्विनः ।
तेषामियं वसुमती पुरासीत् सवनार्णवा ॥" [रामा०, अरण्य०, १४।१५.]

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

"असुराणां वा इयं (पृथिवी) अग्र आसीत्"

[तैत्तिरीयब्राह्मणम्, ३ । २ । ६ । ६.]

"देवाश्च वा असुराश्च प्रजापतेर्द्वयाः पुत्रा आसन्"

[ताण्ड्यब्राह्मणम् , १८ । १ । २.]

"कानीयसा एव देवाः, ज्यायसा असुराः"

[शतपथब्राह्मणम्, १४ । ४ । १ । १.]

"असुराणां वा इयं पृथिव्यासीत्, ते देवा अब्रुवन् दत्त नोऽस्या" इति ।

[काठकसंहिता, ३१ । ८.]

इत्येवं देवासुरसंग्रामसमारम्भः समभूत् । 'पृथिव्या लाभलालनोपायानां शास्त्रमर्थशास्त्रमिति' एवं लक्षणलक्षितस्यार्थशास्त्रस्यायमेव प्रथमः खलु समुन्मेषसमयः । अस्मिन् काले द्वयोः पक्षयोर्द्वौ राजनीतिसञ्चालकौ पुरोहितौ प्रधानमन्त्रिणावास्ताम् । देवानामाङ्गिरसो बृहस्पतिः, दैत्यानाञ्च भृगुवंशीय उशनाः काव्यः । तदुक्तम्—

"बृहस्पतिर्देवानां पुरोहित आसीद्, उशनाः काव्योऽसुराणाम्"

[जैमिनीयब्राह्मणम्, १ । १२५.]

अयमेव कालो धनुर्वेदस्यार्थशास्त्रस्य प्रथम आविर्भावकालः । कौटल्योऽप्यित एवार्थशास्त्रविदां प्रादुर्भावमामनुते । कौटल्येन स्वकीयार्थशास्त्रनिर्माणावसरे यावन्त्यर्थशास्त्राणि समुपलब्धानि तानि सर्वाण्यपि संहृतानि । यतो विशालतरभारतसाम्राज्यसंस्थापकस्य तस्य नासीदेतद् दुष्करम् । अत एवोक्तमपि—

"पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि, प्रायशस्तानि संहृत्यैकमिदमर्थशास्त्रं कृतम्" इति ।

साम्प्रतं कौटलीयमर्थशास्त्रमेव सर्वातिशायि पूर्णमन्तिमञ्चार्थशास्त्रम् । तत्र येषां प्राचीनाचार्याणां नामान्युपलभ्यन्ते, त एवार्थशास्त्रवेत्तारो भारतीयराजनीतेराचार्या अस्माकं
 विवेचनपदमधितिष्ठन्ति । ते च यथा—

बार्हस्पत्याः, औशनसाः, मानवाः, आचार्याः, बाहुदन्तीपुत्रः, विशालाक्षः,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कौणपदन्तः, पराशरः, भारद्वाजः, कात्यायनः, दीर्घः (चारायणः) वातव्याधिः, कणिङ्को (भारद्वाजः), घोटमुखः, पिशुनः, पिशुनपुत्रः, किञ्जल्कश्चेति।

चाणक्यमतिपरिगृहीता एत एव प्राचीना अर्थशास्त्रप्रणेतारो गवेषका अभिनवमतप्रवर्त्तका वा प्रामाणिका आचार्याः समुपलभ्यन्ते।

आङ्गिरसो बृहस्पतिः

उक्तमेव पूर्वं यद् देवासुराणां प्रवृत्ते निरन्तरे तुमुलयुद्धे देवपुरोहितो बृहतां पतिः स्वीयमर्थशास्त्रं प्रणिनाय। कामसूत्रेऽप्येवमेव प्रतिपादितम्। तदेतल्लक्षश्लोकात्मकं बार्हस्पत्यमर्थशास्त्रं नेदानीमुपलभ्यते। मन्यामहे कौटल्येनाप्येतन्नाधिगतं स्यात्। यतः स एतन्मतं न बृहस्पतिनाम्ना समुद्धरति, परं 'बार्हस्पत्याः' इति ब्रवीति। एतेनैतत् प्रतीयते यद् बार्हस्पत्यं विशालमर्थशास्त्रं विलुप्तप्रचारमपि तन्मतानुयायिभिरनुसृतं सङ्गृहीतं सङ्क्षिप्तं वा भवेत्। महाभारतस्य शान्तिपर्वणि पञ्चपञ्चाशत्तमेऽध्याये बृहस्पतेरर्थशास्त्रस्य श्लोकः समुद्धृतः। आचार्यविश्वरूपेण याज्ञवल्क्यस्मृतेर्बालक्रीडाटीकायां व्यवहाराध्याये बार्हस्पत्यार्थशास्त्रस्य गद्यभागश्चतुर्षु स्थलेषु समुद्धृतः। (द्रष्टव्यम्—त्रिवेन्द्रम्संस्करणम्, व्यवहाराध्यायः, पृ० २१५, २१८, २२१ २५०) अतः प्रतीयते यत् तदर्थशास्त्रं गद्यपद्यात्मकं स्यात्। अथवा सङ्ग्राहकैः कैश्चिद् गद्ये पद्ये च सङ्ग्रहः कृतः स्यात्। एतेनेदमपि प्रतीयते यद् मन्त्रद्रष्टारो बृहस्पतिसमा ऋषयः संस्कृतभाषायामपि ग्रन्थनिर्मातार आसन्निति। यद्येतत् सत्यं तदा भाषाविज्ञानवादिनां तर्कजालो निर्मूल एव स्यात्।

उपर्युक्तोद्धरणानि विहाय बार्हस्पत्यार्थशास्त्रस्य न कोऽप्यंशः समुपलभ्यते। यत्तु कियतः कालात् पूर्वं 'लाला कन्नोमल एम० ए०' महाशयेन मुद्रापितं बार्हस्पत्यमर्थशास्त्रं तत्केनापि पण्डितेन कृतं क्षुद्रतममनालोच्यमेव।

उशनाः काव्यः

असुराणां पुरोहितो भृगुवंशीय उशना अपि लक्षश्लोकात्मकं राजशास्त्रं प्रणिनायेति श्रूयते। एतत्प्रणीतस्य राजशास्त्रस्यार्थशास्त्रस्य वा सारभागः 'शुक्रनीतिसार' नाम्ना प्रसिद्धः प्रकाशितो विद्यते। एतस्यापि मतानुयायिनः शिष्याश्च बहवो राजनीतिविद आसन्। अत एव कौटल्यः 'औशनसाः' इतिशब्देन तत्सिद्धान्तानुदाजहार।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अयं हि मन्त्रद्रष्टा ऋषिरासीत्। ऋग्वेदेऽस्य सूक्तानि सन्ति। अयमसुराणां राजनीतिज्ञो विविधविद्याकुशल आसीत्। अस्य धर्मशास्त्रविषयकाणि धनुर्वेदविषयकाणि च लम्बायमानानि वचनानि बहुषु ग्रन्थेषु समुद्धृतानि समालोक्यन्ते। वायुपुराणेऽप्यस्य श्लोकः (६२।८०) समुद्धृतः। राजनीतिशास्त्रेषु शुक्रनीतेरुच्चैस्तरां स्थानमस्ति। मृतसञ्जीवनीं विद्यामस्मादधिगन्तुं बृहस्पतिसुतः कच एनं गुरुं स्वीचकारेति पुराणेषु प्रसिद्धम्।

अस्य नीत्या सञ्चालिता दैत्या दानवाश्च बहुवारं देवान् पराजयन्त। अत एव देवैर्निर्बलैरनेकवारं भारतीयानामिक्ष्वाकुवंश्यानां ककुत्स्थदशरथादिनृपाणां साहाय्यमालम्बितम्। एकदा पराजितो देवराडिन्द्रः शुक्रं स्वपक्षे समानेतुं कामधेनुचतुष्टयं जयन्तीं नाम दुहिताञ्च उत्कोचरूपेण शुक्राय दातुं तत्समीपमगच्छदिति बौधायने श्रौतसूत्रे समुल्लिखितम्।

उशनसस्त्वाष्ट्रस्य त्रिशिरसश्च बहवो वैदिकमन्त्राः 'जन्दआवेस्ता' नाम्नि पारसीकधर्मग्रन्थे विकृतरूपेण समुपलभ्यन्ते। 'जन्दआवेस्ता' पुस्तकं स्वीयं धर्मग्रन्थं मन्वानाः, 'अहुर (असुर) मज्द' भक्ताः पारसीकास्तेषामेव शुक्रशिष्याणां सन्ततयः सन्ति। भारतस्योत्तरपूर्वस्यां दिशि हिमालये देवानां राज्यमासीत्। भारतस्य पश्चिमोत्तरायां दिशि चासुरप्रदेश आसीत्। अयमेव 'इलावृत'वर्ष आसीत्। आधुनिकभूगोलानुसारं 'गिलगिट'प्रान्तस्य भागः, एशियास्थरूसदेशस्य दक्षिणपश्चिमभागः, ईरानदेशस्य च पूर्वभागः, इलावृतवर्षे संगृह्यन्ते। अयमेव शुक्राचार्यापरनाम्नः कवेरुशनसो देशः।

मानवाः

मानवानां प्रथमो राजा प्राचेतसो मनुर्मानवानां कृते सुप्रसिद्धं मानवधर्मशास्त्रं प्रणिन्ये। तत्रैव प्रसङ्गप्राप्तं राजशास्त्रमपि निबबन्ध। मनीषिणां महामान्यस्य मनोर्विषये न किमपि वक्तव्यम्। अयन्तु मानवेषु प्रथमो राजधर्मस्य दण्डनीतेश्चाविष्कारकः प्रथमः प्रयोक्ता चाभवत्। अस्य विषये श्रुतिरपि 'यन्मनुरवदत् तद् भेषजम्' इति वदन्ती महतीं सम्माननां प्रदर्शितवती। अस्य मतानुयायिनो 'मानवाः' इति व्यपदिश्यन्ते।

बाहुदन्तीपुत्रः

देवराजस्येन्द्रस्य नामान्तरमिति कौटिलीयार्थशास्त्रटीकाकारैर्विद्वद्भिश्च निर्णीयते। तदर्थो यथा—बहुदन्तः ऐरावतः, तस्येयमिन्द्रमातृत्वेन स्वामित्वसम्बन्धवती अदितिः, तस्याः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुत्रो बाहुदन्तीपुत्र इत्यनया क्लिष्टकल्पनया पुरुहूतस्येदं नाम निर्वर्त्यते। अर्थशास्त्रे भीष्मोद्धवादीनां कौणपदन्तवातव्याधिरित्यादिकमेव राजनैतिकं नामकरणं कृतम्। तथैवेन्द्रस्यापि भवेत्। देवराजत्वेन विविधविद्याप्रवर्त्तकत्वेन चास्यार्थशास्त्रप्रणेतृत्वं सिद्धमेव। अस्य जीवनं युद्धनीतौ कूटनीतौ च व्यापृतमालोक्यते। पुराणेष्वपि तस्यार्थशास्त्राचार्यत्वं समुट्टङ्कितम्। मन्ये तस्यार्थशास्त्रसङ्ग्रहोऽपि चाणक्येन समालोकितः स्यात्।

विशालाक्षः

अस्य मतं बहुवारं समुपन्यस्तं कौटल्यविष्णुगुप्तेन। केषाञ्चन मते महादेवस्य नाम। महादेवोऽपि राजशास्त्रं प्रणिनायेति प्रवादः। अस्यार्थशास्त्रांशो बहुधा समुपन्यस्तः। येनास्य ग्रन्थश्चिरं प्रसिद्ध आसीत्। याज्ञवल्क्यस्मृतिटीकाकारो विश्वरूपाचार्यो विशालाक्षस्य श्लोकमेकं समुद्धृतवान्। यथा—

"वन्यान् वनगतैर्नित्यं मण्डलस्थांस्तथाविधैः।
चारैरालोच्य सत्कुर्याज्जिगीषुर्दूरदीर्घदृक्॥" इति।

[आचाराध्याये, ३२८ श्लोकव्याख्या]

अन्ये च बहवो गद्यभागाः समुद्धृताः सन्ति। कोऽयं विशालाक्ष इति सम्यग् नावसीयते। अस्माकं मते कदाचिद् व्यासस्यैव नाम भवेत्। वेदब्राह्मणपुराणभारतादिविविधशास्त्रसम्पादको भगवान् व्यासो राजनीतेरपि महान् विद्वानासीत्। महाभारतप्रणेतुर्महती राजनीतिज्ञता सुतरां सिद्धैव। 'विशालाक्ष' इति नामापि तदनुरूपमेव सम्भाव्यते। व्यासपितुः पराशरस्य नाम राजशास्त्राचार्येषु बहुवारमुद्धृतं चाणक्येन। तत्पुत्रस्य समस्तशास्त्रविदुषो व्यासस्यापि राजनीतिज्ञत्वं न विचिकित्साविषयः। पञ्चतन्त्रप्रणेत्रा विष्णुशर्म्मणा राजनीतेराचार्येषु 'पराशराय ससुताय' इत्युक्तवता तस्याचार्यत्वं स्वीकृतम्। एतदपि सम्भाव्यते यन्मूलपाठः 'पाराशर' इति लेखकसम्पादकादीनां प्रमादेन 'पराशर' इति लिखितम्। व्यासेन महाभारते प्राचीनार्थशास्त्राचार्याणां बहुशः स्मरणं तेषां मतमपि १०१
प्रचुरतररूपेण संगृहीतम्। तथापि विशालाक्षस्य निर्णयः सन्दिग्ध एव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पराशरः

व्यासजनकोऽयं महाविद्वान् राजशास्त्रस्य प्रणेताऽभूदिति नैकैः प्रमाणैरवसीयते । अस्य पाराशरी स्मृतिरपि प्रसिद्धा । महाभारतकालीनोऽयमिति प्रसिद्धमेव ।

भारद्वाजः

अयं भरद्वाजगोत्रोत्पन्नो द्रोणाचार्य इति बहूनां विदुषां मतम् । अयं पाञ्चालकुमारस्य द्रुपदस्य सतीर्थ्य आसीत् । दरिद्रोऽयं ब्राह्मणो राजमन्त्रिपदलाभाय सहाध्यायिनं द्रुपदमुपस्थितस्तेन चावज्ञातः स्वनीतिकौशलेन कौरवपाण्डवानां शिक्षको भूत्वा महाभारतकालीनेषु राजनीतिज्ञेष्वाचार्यपदमासीनः । धनुर्वेदस्यायमद्वितीयो विद्वान् सुप्रसिद्धधनुर्धारिणां गुरुरासीत् । एतत्प्रणीतो धनुर्वेदोऽर्थशास्त्रञ्च कौटल्यकाले प्रचलितं समुपलब्धं वा भवेदिति प्रतीयते ।

कौणपदन्तः

भीष्मस्येदं नाम । माधवयज्वकृतायामर्थशास्त्रटीकायां ७४ तमे पृष्ठे कौणपदन्तस्य भीष्मेति पर्यायान्तरं दृश्यते । त्रिकाण्डशेषकोषेऽपि—

"· · · · · · · · · गाङ्गेयो गन्दिनीसुतः ।
देवव्रतः शान्तनवो गाङ्गो गाङ्गायतिश्च सः ॥
भीष्मः कौणपदन्तश्च स्वेच्छामृत्युः पुरावसुः ।"

[काण्ड २, क्षत्रियवर्गः, श्लो० १२,]

इतिकोषादपि कौणपदन्तो भीष्म एवेति निश्चीयते । अयं महाभारतस्य प्रधाननेता महान् राजनीतिधुरन्धरो धनुर्वेदे चाद्वितीयो महापुरुष आसीत् । वस्तुतो विचारे महाभारतकालो भारतस्य महान् राजनैतिकः काल आसीत् । अस्मिन् समये पराशरः, व्यासः, श्रीकृष्णः, भीष्मः, वातव्याधिरुद्धवश्चेति महान्तो राजनीतिज्ञा अर्थशास्त्रकुशलाः समभूवन् । इमे समकालीनाः कूटनीतिनिपुणा युद्धविद्याविशारदा महावीरा भारतीयराजनीतेः कर्णधारा अभूवन् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वातव्याधिः

अन्धकानां यादवानाञ्च प्रधानामात्यो बृहस्पतिमतानुयायी उद्धवोऽयं श्रीकृष्णस्य राजनीतिगुरुरासीत् । महाभारतस्य सभापर्वण्याश्रमवासिकपर्वणि चायं समुद्धृतः । असौ देवभागसुतो महाविद्वानासीत् । उक्तं हि मात्स्यपुराणे—

"देवभागसुतश्चापि नाम्नासावुद्धवः स्मृतः ।
पण्डितं प्रथमं प्राहुः · · · · · · · ·॥" इति ।

[अ० ४६ । २३,]

अस्य राजनीतिसंसारे वातव्याधिरिति नाम विश्रुतम् । शिशुपालवधे द्वितीयसर्गे गुप्तमन्त्रणावसरे माघोऽप्येनं पवनव्याधिशब्देनोदाजहार । यथा—

"प्रापयन् पवनव्याधेर्गिरमुत्तरपक्षताम् ।" इति ।

अनेन प्रणीतमर्थशास्त्रं कौटल्येनावलोकितं स्यात् । साम्प्रतं नोपलभ्यते ।

कात्यायनः

संस्कृतवाङ्मये कात्यायननामानो बहवो विद्वांसः श्रूयन्ते । श्रौतसूत्रकारः कात्यायनो महर्षिस्तु प्राचीनतरः । पाणिनेरनन्तरं वार्तिककारः कात्यायनापरनामा वररुचिरासीत् प्राकृतप्रकाशप्रणेता । कस्यचन महाकाव्यस्याऽपि निर्माता कश्चनापर एव कात्यायनः प्रतीयते । श्रूयते नन्दराजस्य कात्यायननामा कश्चन पुरोहितो मन्त्री चाभूत् । अयमेव राजनीतिज्ञो भवेदिति वक्तुं शक्यते । कौटल्यात् किञ्चिदेव प्राक्तनोऽयम् । अर्थशास्त्रविषयको न कोऽपि ग्रन्थोऽस्य समुपलभ्यते ।

दीर्घश्चारायणः

चारायणशाखाध्यायी दीर्घनामा कश्चन राजनीतिज्ञः कौटल्यात् प्राक्तन आसीत् । कौटलीयार्थशास्त्रस्य ६५ तमेऽध्याये चाणक्येनैकवारमुद्धृतोऽयम् 'तृणमिति दीर्घश्चारायणः' इति । माधवयज्वकृतायां तट्टीकायामस्य विषये—

"मगधेषु बालो नाम राजासीत् । तस्याचार्यो दीर्घश्चारायणः" इति लिखितम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मगधस्य राजवंशानुशीलनेन विज्ञायते यन्मगधस्य प्रद्योतवंशचालको बालको नरपतिरासीत्। तस्य प्रद्योत इति नाम बभूव। तस्य पिता मगधनाथो रिपुञ्जयो नाम तदमात्येन पुलकेन घातितः। बालक एव चायं मगधराज्येऽभिषिक्तः। अस्य प्रद्योतस्य पितुर्मित्रं चारायणशाखाध्यायी दीर्घो नाम राजनीतिज्ञो विद्वान् प्रद्योतस्याध्यापने नियुक्त आसीत्। मन्त्रिणा पुलकेन दीर्घस्यैव साहाय्येन मगधराज्यं स्वायत्तीकृतमासीत्। अयमाचार्यो दीर्घस्तेन बालकेन राज्ञा कदाचिदपमानितो राजमातुरादेशेन मगधान् विहाय कुत्रापि गतः। अत एवायं गुरोरपमानकारी प्रद्योतः पुराणेषु—'बालको नयवर्जितः' इत्येवं स्मृतः।

अस्य चारायणस्य दीर्घस्य विषये बौद्धग्रन्थेषु भिन्नैव कथा समालोक्यते। यथा कोसलाधिपतेः पुत्रो विड्डभनामा बभूव। स च स्वपितुः सेनाधिपतेर्दीर्घस्य साहाय्येन पितरं निहत्य तद्राज्यं हस्तगतं चकार। अत एवायं पितृघाती विड्डभो हीनकर्मकरणेन पौराणिकैः 'क्षुद्रक' इति नाम्ना समुट्टङ्कितः। केचन 'असहायैः क्षुद्रकैर्जितम्' इतिवाक्यस्थं क्षुद्रकपदं तत्परमेव मन्यन्ते।

अतोऽयं बुद्धकालीन आसीदिति निर्णीयत एव। अस्यापि ग्रन्थो नोपलभ्यते।

पिशुनः

"पिशुनो नारदः, प्रकृत्यैव कलहप्रियत्वात् कलहोत्पादनं करोतीति प्रसिद्धिः।" इति कौटलीयार्थशास्त्रसम्पादकानां तट्टीकाकाराणाञ्च त० गणपतिशास्त्रिणां मतम्। परं नैतद् विचाररमणीयं प्रतिभाति। पिशुनपुत्रस्यापि पृथगुद्धरणात्, नारदपुत्रस्य चानुपलम्भात्। नारदः परमभेदनिपुणः कूटनीतिज्ञश्चासीत्। सनत्कुमारप्रश्नोत्तरे तेन स्वाधीतविद्यासु राजशास्त्रस्यापि चर्चा कृता। परं नारदीयस्यार्थशास्त्रस्य प्राप्तिः कौटल्यस्यासीदिति न सम्भाव्यते।

इतिहासपर्यालोचनया कौटलीयार्थशास्त्रसमीक्षया चैतत् प्रतीयते यदवन्तिराजस्य प्रद्योतस्य गोपालपालकनामानौ द्वौ पुत्रौ वासवदत्ता च तनयासीत्। प्रद्योतानन्तरं पालक एव तद्राज्येऽभिषिक्तः। स चायं पालको वत्सराजस्योदयनस्य श्यालक आसीत्। तस्यैव पालकस्याचार्यो महामात्यः पिशुन आसीत्। अयञ्च पालको खिस्ताब्दारम्भतः पूर्वं पञ्चमे शतके समुत्पन्न इति तदमात्यः पिशुनोऽपि तत्कालीन एव।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पिशुनपुत्रः

अयमस्यैव पिशुनाचार्यस्य तनयो राजशास्त्रविशारद आसीदिति प्रतीयत एव ।

किञ्जल्कः

अस्य विषये किमपि न ज्ञायते ।

घोटमुखः

अयं राजनीतिज्ञः कौटलीयार्थशास्त्रटीकानुसारमवन्तिदेशस्य राज्ञोऽशुमतः कश्चन सहायक इति । अयमुदयनकालात् प्राक्तन इति वक्तुं शक्यते ।

एवमेतत् प्रतीयते यद् आमनोराकौटल्यं भारतीयैर्वीरैः भारतस्य साम्राज्यविस्तारे आर्यगौरवसमभ्युदयाय यथा शस्त्रबलेन प्रयतितं तथैव भारतीयैर्विद्वद्भिर्बुद्धिजीविभिरपि नीतिनिर्माणद्वारा बहूपकृतं भारतराष्ट्रस्य ।

एवं राजनीतिज्ञानां पर्यालोचनया प्रतीयते यद् महाभारतकालात् पूर्वं भारते मानव-बार्हस्पत्यौशनसराजशास्त्राणां प्रचार आसीत् । तदनुसारमेव राजतन्त्रं प्रचलति स्म । महाभारतकाले भारतीया राजनीती रूपान्तरे परिणता । तदानीं कौणपदन्तभारद्वाजविशालाक्ष-वातव्याधिप्रभृतयो राजनीतिज्ञाः समभूवन् । तदनन्तरञ्च बुद्धप्रादुर्भावकाले तत्पूर्वञ्च मगध-कोशलावन्तिप्रभृतिदेशानां शासकेषु साम्राज्यलिप्सा परस्परप्रतिस्पर्द्धा च प्रबला समभूत् । अस्मिन् काले राजमन्त्रिणां राजपुत्राणाञ्च राज्यलिप्सा राज्ञाञ्च विलासिता प्रबला सञ्जाता । अत एवास्मिन् समये भूयांसि परिवर्तनान्यभूवन् । अत्र समये बहवो राजनीतिज्ञाः प्रादुरभूवन् कात्यायनकणिङ्कघोटमुखपिशुनपिशुनपुत्रकिञ्जल्कप्रभृतयः ।

अलक्षेन्द्रस्य सिकन्दराख्यस्य भारताक्रमणकाले मगधसाम्राज्यमेव बलवत्तरमासीत् । परं राज्योपभोगवासनाशीतलीकृतशोणितो नन्दः परमराजनीतिज्ञेन कुटलवंशावतंसेन चणकग्रामवासिना तक्षशिलाविश्वविद्यालयस्नातकेन विष्णुगुप्तेन साहाय्यार्थं याचितः सनिकारं तं तिरश्चक्रे । सोऽपि राजनीतिधुरन्धरो महाकोपो मौर्यकुलकुमारं चन्द्रगुप्तमाधारीकृत्य नन्दसाम्राज्यञ्च विनाश्य विशालविस्तृतं भारतसाम्राज्यं स्थापयामास । भारतीयेतिहासे
नैतावद् विस्तृतं सुव्यवस्थितञ्च साम्राज्यं कदापि समभूदिति सर्वेषामितिहासविदां मतम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भारते यवना आँग्ला अपि नेदृशसाम्राज्यस्थापने समर्था बभूवुः। अस्य साम्राज्यस्य संस्थापकेन चाणक्येन यदर्थशास्त्रं नाम राजशास्त्रं प्रणीतं तत् सर्वाङ्गपूर्णं महत्त्वशालि भारतीयगौरवसमेधकं वर्वर्त्ति। अस्मिन्नर्थशास्त्रे कौटल्यः स्वयमेव वदति—

"येन शस्त्रञ्च शास्त्रञ्च नन्दराजगता च भूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्॥"

"सर्वशास्त्राण्यनुक्रम्य प्रयोगमुपलभ्य च।
कौटल्येन नरेन्द्रार्थे शासनस्य विधिः कृतः॥"

कौटल्यस्य कालनिर्णये नास्ति विप्रतिपत्तिः। यतोऽयं प्रथमस्य चरमस्य च भारतीयविशालसाम्राज्यस्य संस्थापक आसीत्। अस्य समयो विक्रमसंवत्सरात् पूर्वं चतुर्थशतकस्य मध्यमो भाग आसीत्। अस्य जन्मभूमिविषये निश्चितं प्रमाणं नोपलभ्यते। परमयं तक्षशिलाविश्वविद्यालयान्तेवासी तत्प्रदेशीय एव चणकग्रामे समुत्पन्नः। अतएव 'चाणक्य' इत्यस्य संज्ञा। अयं हि प्रथितयशसां कुम्भीधान्यानां ब्रह्मर्षीणां कुटलगोत्रापत्यानां वंशे समुत्पन्नः। अतः 'कौटल्य' इत्यस्य नामान्तरम्। 'कुटलो' गोत्रप्रवर्तकर्षिरिति नानार्थार्णवकोशादवसीयते। यथा—

"अथ स्यात् कुटलो गोत्रकृत्यृषौ पुंसि नप् पुनः।
विद्यादाभरणेऽथ त्रिः कुटिलं कुञ्चिते भवेत्॥"

अतोऽस्य कुटलापत्यस्य कौटल्य इति प्रसिद्धं राजनैतिकं नाम। राजनीतिक्षेत्रे कौणपदन्तबाहुदन्तीपुत्रादिवदीदृशनामव्यवहार एव शोभते। अस्य सांस्कारिकं नाम 'विष्णुगुप्त' इति। अर्थशास्त्रावसाने तेनैवोक्तम्—

"दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रञ्च भाष्यञ्च॥" इति।

यत्तु केचन इकारयुक्तं 'कौटिल्य' इति लिखन्ति पठन्ति च तदयुक्तमेव। साम्प्रतं कूटनीतिनैपुण्याद् विष्णुगुप्तस्य 'कौटिल्य' इति पाठं साधु मन्यन्ते। सर्वत्र पुस्तकेष्वप्ययमेवापपाठः प्रचलितो दरीदृश्यते। स च त्याज्यः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कौटल्यविषये पुराणेष्वपि केचन श्लोकाः समुपलभ्यन्ते। यथा--

"कौटल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति"

[विष्णुपुराणम्]

"चन्द्रगुप्तं नृपं राज्ये कौटल्यः स्थापयिष्यति"

[वायुपुराणं ब्रह्माण्डपुराणञ्च]

"कौटल्यश्चन्द्रगुप्तन्तु ततो राज्येऽभिषेक्ष्यति"

[मत्स्यपुराणम्]

"स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति"

[भागवतम्]

एवं बौद्धवाङ्मयेऽपि चाणक्यसम्बन्धाः कथाः समुपलभ्यन्ते। संस्कृतसाहित्येऽपि मुद्राराक्षसादौ चाणक्यचरितमुपलभ्यते। एतत्तु स्वातन्त्र्येण विवेचनीयमिति परित्यज्यते।

चाणक्यप्रणीतमर्थशास्त्रमेव भाग्यवशाद् भारतीयानामवशिष्टमुपलब्धम्। एतत्प्राक्तनाः सर्वेऽपि राजशास्त्रग्रन्था विलुप्ता एव। परमिदं परं सन्तोषास्पदं यदिदमेकमेवार्थशास्त्रं सर्वेषां राजशास्त्राणां क्षतिपूर्तिं करोति। यतः स्वयमेव पञ्चदशाधिकरणे विलिखति कौटल्यः—

"पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्थापितानि, प्रायशस्तानि संगृह्यैकमिदमर्थशास्त्रं कृतम्।" [१५ अधिकरणम्]

एतदर्थशास्त्रमुत्तरभारते नोपलब्धम्। एतस्य यावन्ति मूलपुस्तकानि समुपलब्धानि, तानि सर्वाण्यपि दक्षिणभारत एव। तेनानुमातुं शक्यते यद् यवनैर्भारतीयानां राजशास्त्रं प्रसह्य विनाशितम्। दक्षिणापथे तेषां तथा सञ्चाराभावात्तत्रेदं सुरक्षितमुपलब्धम्।

सम्पूर्णेऽप्यर्थशास्त्रे कौटल्येन ११४ वारं पूर्वाचार्याणां मतान्युद्धृतानि ८० वारञ्च तेषामपदेशः कृतः। अत्र १५ अधिकरणानि, १५० अध्यायाः, १८० प्रकरणानि, ६००० श्लोकाः सन्ति। अस्य प्रथमं मुद्रणं १९०९ तमेशवीये वत्सरे महिशूरराजकीयसंस्कृतग्रन्थमालायां श्रीमता शामशास्त्रिणा कृतम्। तदनन्तरञ्च पाश्चात्यविदुषा 'जौली'नाम्ना प्रकाशितम्। अस्य हिन्दीभाषायामनुवादद्वयं लवपुरात् प्रकाशितम्। आंग्लभाषानुवादश्च प्रथमं शाम-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शास्त्रिणा कृतः। तदनन्तरं १६२४ तमे वत्सरे अनन्तशयनसंस्कृतग्रन्थमालासम्पादकेन महामहोपाध्याय-त० गणपतिशास्त्रिणा श्रीमूलाख्यव्याख्यासहितस्यास्य खण्डत्रयेन प्रकाशनं विहितम्।

गणपतिशास्त्रिणास्यादर्शपुस्तकपञ्चकं दृष्ट्वा भट्टस्वामिमाधवयज्वकृतव्याख्याद्वयाधारेण च सम्पादनं विहितम्।

कौटलीयार्थशास्त्रानन्तरं कामन्दकेन राजशास्त्रं प्रणीतमिति ज्ञायते। कोऽयं कामन्दकः? कुत्रत्यश्चेति न सम्यग् निर्णीयते। महाभारते शान्तिपर्वणि १२३ तमेऽध्याये कामन्दकस्य नाम दृश्यते। तत्र कामन्दकेन सह राज्ञ आङ्गरिष्ठस्य संवादोऽपि विद्यते। इत्यनेनेदं प्रतीयते यत् कामन्दकनामा कश्चन राजनीतिनिपुण ऋषिरासीत्। परं चाणक्येन स्वग्रन्थे तस्य नामोल्लेखो न कृतः।

चतुर्थशतके भारतमपहाय बालिद्वीपं गतैरार्यैः 'कामन्दकीयनीतिसार'नामकं राजशास्त्रं सहैव नीतं तत्र समुपलब्धञ्च। तस्य प्रारम्भे कौटल्यविष्णुगुप्तस्यैव मङ्गलाचरणं तद्वर्णनञ्च दृश्यते। यथा—

"नीतिशास्त्रामृतं श्रीमानर्थशास्त्रमहोदधेः।
य उद्दध्रे नमस्तस्मै विष्णुगुप्ताय वेधसे॥"

अत इदं सम्भाव्यते यच्चतुर्थशतके तृतीये वा कौटलीयसिद्धान्तमुपजीव्य कामन्दकीयनीतिशास्त्रस्यापि शुक्रनीतिसारवत् केनापि सङ्ग्रहः कृतो भवेत्। स च भारतीयानां राजनीतिविषये नितरामभिमत आसीत्। अत एव बालिद्वीपं गतैर्भारतीयैस्तत्र राज्यशासनाय स एव राजशास्त्रग्रन्थः सार्द्धं नीतः। अस्य कामन्दकीयराजशास्त्रस्य 'उपाध्यायनिरपेक्षा' 'जयमङ्गला' इति टीकाद्वयमुपलभ्यते। जयमङ्गलाटीकाकारो ६४४ तमे खिस्ताब्दे संबभूवेति केषाञ्चन मतम्। अतः प्राचीनतरमिदं राजशास्त्रमिति नात्र विप्रतिपत्तिः।

एतदतिरिक्तं यशस्तिलकचम्पूप्रणेत्रा जैनाचार्यसोमदेवसूरिणा प्रणीतं नीतिवाक्यामृतं राजशास्त्रीयग्रन्थेषु महत्त्वमादधाति। अनेनापि कौटल्यस्यैव परम्परा स्वीकृता। अस्य टीकापि समुपलभ्यते। साम्प्रतिकराजशास्त्रीयग्रन्थेषु नीतिवाक्यामृतं सर्वातिशायि मननयोग्यञ्च राजशास्त्रप्रविविक्षूणां विदुषां कृते। अस्य प्रणेता जैनाचार्यः सोमदेवसूरिः कान्यकुब्जमहीपतेर्महेन्द्रपालराजस्यादेशेन दुर्बोधं कौटलीयार्थशास्त्रं सरलीकर्तुं ग्रन्थममुं प्रणिनाय।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्दशे शतकेऽष्टादशे च चण्डेश्वरलक्ष्मीधरमित्रमिश्रनीलकण्ठप्रभृतिभिर्धर्मशास्त्र-निबन्धकारैरपि राजशास्त्रविषये स्वतन्त्रग्रन्थप्रणयनं व्यधायि। चण्डेश्वरप्रणीतो राजनीति-रत्नाकरः, लक्ष्मीधरप्रणीतो राजनीतिकल्पतरुः, मित्रमिश्रप्रणीतो वीरमित्रोदयश्चेति राजशास्त्र-ग्रन्था यवनशासनकाले प्रणीताः। राजनीतिकामधेनुः, राजनीतिमयूखश्चेति पुस्तकद्वयमन्य-दप्युपलभ्यते।

राजनीतिकल्पतरुप्रणेता श्रीलक्ष्मीधरपण्डितः कान्यकुब्जनरपतेर्गोविन्दचन्द्रस्य पर-राष्ट्रसचिव (महासान्धिविग्रहिकः) आसीत्। तेनार्थशास्त्रस्य षष्ठवेदत्वमपि स्वीकृतम्।

एवं चाणक्यनीतिसारविदुरनीतिपञ्चतन्त्रहितोपदेशप्रभृतयोऽपि नीतिग्रन्थाः सन्ति। परं न ते राजशास्त्रीयतामावहन्ति, यद्यपि तेषां महत्त्वमत्यधिकं वर्वर्त्ति।

बौद्धवैष्णवादिसम्प्रदायानामहिंसाभक्तिप्रधानानां प्राबल्येनाभिचारकूटकपटहिंसा-प्रधानं राजनीतिशास्त्रं तिरोहितं यत्र तत्र धर्मशास्त्रेषु पुराणेषु काव्येषु वान्तर्गतं गुणीभूतम्। तथापि मध्ये मध्ये स्वदेशभक्तैर्महावीरैर्भारतीयैर्नरपतिभिरर्थशास्त्रोद्धाराय प्रय-तितम्। महाराष्ट्रवीरेण शिववीरेण कौटल्यनीत्या किमपि साफल्यलाभाय प्रयतितम्। परं दुर्भाग्यादेवास्माकं पूर्णसाफल्यं नाभूत्।

इदानीं गभीरतरोऽयं राजनैतिकोऽवसरः। साम्प्रतिकैर्विद्वद्भिः प्राचीनोपलब्धार्थ-शास्त्राणां पाश्चात्त्यार्थशास्त्राणाञ्चाध्ययनं विधाय राजशास्त्रीयवाङ्मयसंवर्द्धनेन सह कौटल्य-सदृशाः स्नातकाः समुत्पादनीयाः, येन पुनरपि भारतं विश्वसाम्राज्यक्षमं स्वर्णभारतं भूयादिति शम्।

"सर्वोपजीवकं लोकस्थितिकृन्नीतिशास्त्रकम्।
धर्मार्थकाममूलं हि स्मृतं मोक्षप्रदं नृणाम्॥
सर्वलोकव्यवहारस्थितिर्नीत्या विना नहि।
यथाशनैर्विना देहस्थितिर्न स्याद्धि देहिनाम्॥"

—शुक्रनीतिसारः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रमणसंस्कृतिः सौन्दर्यञ्च ।

मुनिः कान्तिसागरः

श्रमणसंस्कृतेः साध्यं मोक्ष एवासीत् । अतस्तस्या बाह्यप्रवृत्तयोऽपि निवृत्तिमूला एवावर्तन्त । इतिहासप्राक्कालादेवेयं प्रवर्तते । वस्तुतो मानवताया इतिहास एवास्या इतिहासः । इयं खलु न कस्यापि वर्गविशेषस्य समुदायविशेषस्य वा सम्बन्धिनी, किन्तु प्राणिमात्रस्य । श्रमणसंस्कृतेः क्षेत्रं न केवलं मानवसमुदायमात्रेण परिच्छिन्नम्, किन्तु जीवजातस्य सकलस्य कृते तस्या उद्भवो विकासश्च दृश्यते । अन्तर्मुखी प्रवृत्तिरस्या मूले तिष्ठति । आशुविनाशिबाह्यभावापेक्षया चिरस्थायिनि जगत्येवास्या अभिनिवेशः ।

एतावता नैतदाशङ्कनीयं यत् सर्वतोभावेनास्या ऐकाङ्गिक एव प्रसरः, श्रमणाभिक्षुका आध्यात्मिकसंस्कृतेः प्रोत्साहनेन सहैव समाजोपकारिणीनां प्रवृत्तीनां परिवर्धनेऽपि प्रयत्नशीला अभूवन् । व्यक्तिगतजीवनस्य ऐकाङ्गिकत्वं तु श्रमणसंस्कृतेरभिमतमस्त्येव । व्यक्तिगतः परिपक्वो विकासो हि मानवसुलभास्त्रुटीः परिहरति, कल्याणेन सह मानवसमाजमपि व्यवस्थापयति । अत एव श्रमणसंस्कृतिस्त्रिकालाबाधिता वरीवर्त्ति ।

एतस्याः संस्कृतेः प्रवाहो न कदापि विशुष्यति । इयमाचारस्य महत्त्वमभिवर्धयन्ती सक्रियं सम्यग्ज्ञानमुद्देश्यसिद्धेः कारणत्वेनोपादत्ते । व्यक्तेरन्तर्मुखं व्यवस्थितञ्च जीवनमेव सामाजिकशान्तेः कारणं सम्पद्यते । अहिंसाऽपरिग्रहश्चेत्युभावेव शान्ति-रथस्य चक्रद्वयम् । एतदपरिग्रहणेनैवाद्यतनी सर्वतो दृश्यमाना सङ्घर्षज्वाला विश्वं व्याकुलयन्ती विलोक्यते । श्रमणसंस्कृतेर्मूलतत्त्वान्येव जगति सर्वतः शान्तिं प्रसारयितुं क्षमन्ते, प्राणिसमुदाये सद्भावमपि समानेतुमर्हन्ति । श्रमणसंस्कृतिः क्रान्तिकारीणि परिवर्त्तनान्यपि सम्मनुते, यदि तान्यहिंसामूलकानि भवेयुः ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

श्रमणसंस्कृतिराध्यात्मिके सौन्दर्ये परिनिष्ठिता वर्तते। बाह्योपादानद्वाराऽऽध्यात्मिकसौन्दर्यविकासे भूयानस्याः प्रयत्नोऽवलोक्यते। ये साध्यं साधनञ्च बाह्यमेवादाय प्रवर्तन्ते विचारयितुम्, ते खलु स्थूलदृशः पक्षपातगृहीताश्चास्यां विविधान् दोषांस्त्रुटीर्वाधिगच्छन्ति। तेषां विचारो न खलु कदापि सिद्धान्तरूपतां प्राप्नुयात्।

श्रमणसंस्कृतेर्वाह्यरूपे यत् कलातत्त्वं यः सौन्दर्यपरिबोधश्च लक्षितो भवति, तदेव विचारणीयमस्माकम्। श्रमणसंस्कृत्या परिगृहीतानां कलात्मकानामुपादानानामपि विचारः कर्तव्यो वर्तते। यद्यपि भौतिकप्रकाशे नाध्यात्मिकतत्त्वावलोकनं मदीयमुद्देश्यं तथापि सौन्दर्याभिव्यक्तिविषये नैतत् सर्वथोपेक्षितुमपि शक्यम्।

श्रमणसंस्कृतेरितिहाससाहित्ययोः पर्यालोचनेन ज्ञायते यदस्याः कलाभिज्ञा अदृश्यजगतोऽनुसन्धाने निरता अपि वाह्यस्य दृश्यस्य जगतो विषये न सर्वथौदासीन्यं स्वीचक्रुः। तेषां प्रकृतिप्रेम विख्यातमस्ति।

अस्याः पटुभिः कलाकारैर्न केवलमन्तरङ्गविचाराणामुद्बोधिका सृष्टिरारम्भि, न च केवलमन्तःसौन्दर्यं बहिराविश्चक्रे, अपि त्वेतद्विषये तात्कालिकाः सर्वानुमोदिताः सौन्दर्यसमुल्लेखसिद्धान्ताः प्रतिष्ठापिताः, मानवसमाजस्य पार्थिववस्तुविलोकने] विकासवत्यन्तरङ्गदृष्टिरप्युन्मीलिता। बाह्यसौन्दर्याश्रितं जीवनं हि परावलम्बि भवति, अन्तःसौन्दर्याश्रितन्तु स्वावलम्बि सद् भाविनीं विचारपरम्परामप्युपस्थापयति। सौन्दर्यमात्मनि स्थितम्, यः खलु शाश्वतः। इदमेव सौन्दर्यं शिवत्वस्योद्बोधकं वक्तव्यम्। आत्मनः प्रकाश एव 'कला'—शब्देनाभिधीयते। अनेनैव ज्योतिषा चाञ्चल्यं स्वतो नश्यति शिवत्वञ्चोपजायते। भारतीयकलाया इतिहासेन सूचितमिदं यद् धर्मप्रतिष्ठायां कलाया एव बहुमूल्यः सहयोग आसीदिति। मानवानामुन्नयनकारिणी कला वर्तते। अपूर्णता मानवान् पूर्णताया निकटं नेतुं प्रयतते। साधूक्तं 'वर्गसाँ' महाशयेन यत् 'पुरुषस्य कर्मचञ्चलाः शक्तीः कला शाययति, एतदेवास्या लक्ष्यम्' इति। (To, put to sleep the active powers of our personality.) इयमात्मानन्दस्य स्थितिः। यथा—

विश्रान्तिर्यस्य सम्भोगे सा कला न कला मता।
लीयते परमानन्दे ययात्मा सा परा कला॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

का नाम कला

कलाशब्दव्यवहारो हि सर्वत्राद्यत्वे प्रवृत्तोऽस्ति । बहवोऽसुन्दरा विषया अपि 'कला'-शब्देन योज्यन्ते समीक्षाशून्यैः । नहि कवितेव कलापि शब्दैर्निर्वक्तुं शक्या । किमपि वस्तु स्वभावतः सुन्दरमसुन्दरं वा न भवति, ग्रहीतृभेदाद् भावभेदाद्वाऽयं व्यवहारो जायते । द्रष्टू रसानुभूत्यनुसारेणैव वस्तुनः सौन्दर्यं वैरूप्यं वा शक्यं निर्णेतुम् । श्रमणसंस्कृतिस्तावत् दार्शनिकसिद्धान्तानामन्यतममनेकान्तवादमाश्रित्य वस्तुनो विविधरूपाणामन्वीक्षणमुपदिशति । कलायाः सर्वे भेदाः प्रभेदाश्चास्मिन्नेवानेकान्तवादे समन्वयमासादयन्ति ।

उपकरणाश्रितं सौन्दर्यं क्षयि, स्वात्मस्थं स्थास्नु च भवति । अस्यां स्थितौ कलाशब्देन किं प्रतीयते ? कस्यापि पारिभाषिकशब्दस्याभावेपि शक्यमेतद्वक्तुम्—अन्तरङ्ग-स्थानां पूर्णानाममूर्त्तानाञ्च भावानां बाह्योपादानसामग्र्या मूर्त्तिमत्त्वापादनमेव कला नाम, मानवहृदयस्य सूक्ष्माया रसानुभूतेः सन्ततिरेव कला वा; सत्यस्याभिव्यक्तिरेव कला वा । एतदपेक्षयापि व्यापकरूपेण प्रतिपादनीयमित्थम्—येन सौन्दर्यस्यानुभावनं प्रकाशश्च प्रतिपाद्यते तदेव वस्तु कला । यास्माकं कोमलां हृत्तन्त्रीं मुखरयेत् सा कला । एभिः शब्देरिदं सिद्ध्यति यत् पार्थिवेषु (जडेषु) भावेष्वेव कलाया उत्पत्तिर्जायते । मूर्त्तेषु पुद्गलद्रव्येष्वेव कलाया उद्बोधः । कला हि सौन्दर्यमपेक्षते । 'आस्कर वाइल्ड' महाशयः कथयति 'येन सहास्माकं निष्प्रयोजनः सम्बन्धस्तदेव सुन्दरं नाम' इति ।

सौन्दर्यं कला च परस्परं भिन्ने अपि परस्परानुग्राहिके स्तः । परन्तु सौन्दर्यस्यानन्देन विशिष्टः सम्बन्धो वर्तते । यद्यपि सौन्दर्यबोध इन्द्रियैरेव व्यज्यते, तथापि इन्द्रियग्राह्यं सौन्दर्यं क्षणिकं भवति । वस्तुतः सौन्दर्यस्य स्थितिः हृदय एव भवति । रसानुभूतिरेव वस्तु दर्शयति । श्रमणसंस्कृतिरिन्द्रियसम्भूतमानन्दं सौन्दर्यहेतुं न स्वीकरोति । इन्द्रियाणां नश्वरतया सौन्दर्यस्य तदुत्तीर्णतया च शिवत्वप्राप्त्यै सौन्दर्यं यद्यपि यतते, किन्तु सौन्दर्येण सन्तोष एव जायते न पुनर्ज्ञानम् । 'सत्यम्' ज्ञानस्य हेतुः, 'सुन्दरञ्च' सन्तोषस्य । श्रमणसंस्कृतेः सन्तोषो निवृत्ति-परो वर्तते । अतः सत्येनैव शिवत्वप्राप्तिः सम्भाव्यते । सौन्दर्यमपि न भवत्युपेक्षणीयम् ।

यस्य प्रमातुर्यथा रसानुभवशक्तिः स तथा तावन्तमेव सौन्दर्यानुभवमवगाहते । अभिनवगुप्ताचार्यैः काव्यशक्तिरिव रसज्ञतापि दैवी शक्तिरित्यवोचि । अत एव कलायां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सर्वेषामनुभूतिः समकक्षा भवितुं नार्हति। कला खलु कल्पनाबहुला, मनोऽपेक्षया हृदयेनैव तस्याः सम्बन्धः। कलायामनेकानि चिन्त्यानि तत्त्वानि तिष्ठन्ति। कला तथ्यपर्यन्तं प्रमातारं नयति, न पुनः सत्यपर्यन्तम्। श्रमणैः कलायां सत्यं प्रतिष्ठापितम्। न तेषां तथ्यान्वेषणे संरम्भः, सत्यं हि वस्तुनः प्राणाः।

आनन्दः

विश्वकवे रवीन्द्रस्य वाक्यमेतत्—

"यत्र वयं सत्यमुपलभामहे तत्रैवानन्दस्यापि प्राप्तिः। यत्र च न सत्यस्य सर्वाङ्गीणा उपलब्धिस्तत्रानन्दस्याऽप्यभाव एव।" [साहित्य० पृ. ५३]

सत्याश्रित एवानन्दः स्वाभाविकः, पार्थिवानन्दस्तु क्षणिकः; शाश्वतः पुनः स्वात्मानन्द एव। एनमेव श्रमणसंस्कृतिः सङ्केतयति। प्राचीनतमादैतिहासिककालादारभ्यास्यैवानन्दस्योपलब्धये जैनमुनयो दीर्घतमं साधनपथमाश्रयन्तो दृश्यन्ते। नूनं स्वीकर्तव्यमेवैतद् यत् सत्याश्रितस्य वास्तविकस्य सौन्दर्यस्य साधनमेव श्रमणसंस्कृतेराधारशिलारूपेण परिदृश्यते। अत एव तैरुपस्थापितायां कलायां केवलकल्पनारहितस्य व्यक्तिनिरपेक्षस्य चानन्दस्य सहजा स्थितिरुपलक्ष्यते। 'अरस्तू' महाशयो निगदति—'येनानन्देन समाजो नोपक्रियते, स हि नोच्चैः श्रेणीमधितिष्ठति'। 'कान्ट' 'हेगेल'प्रभृतयो 'जर्मन'दार्शनिकाः कलासम्भूतमानन्दं निरपेक्षं मन्वते। सत्यसिद्धान्तप्रोतजीवनैरेव तादृशो निरपेक्ष आनन्दोऽधिगम्यते। अन्तर्मुख्याश्चित्तवृत्तेर्विकासतारतम्येनैवानन्दानुभूतिरप्युपजायते। भारतीयदर्शनान्यपि सिद्धान्तममुमेवानुगच्छन्ति। भारतीयचित्रशिल्पकाव्यकलासु सत्याश्रितस्यास्यैवानन्दस्य विकासः। भारतीया मुनयः सामयिकीं परिस्थितिमनुरुद्ध्य नीतिमत्तां सामाजिकपरिवर्तनानि च सम्यगालोचयन्तो बबन्धुः स्वकलाविन्यासान्।

यत्रानन्दस्तत्र रसोऽपि तिष्ठति, मानवजातेर्बहुषु परिवर्तनेष्ववस्थासु च रस एव महत्कारणमुच्यते। रसेनैव परिस्थितिः परिचाल्यते, रस एवानुभूतेर्निदानम्। रसस्य संवित् सुखात्मिका दुःखात्मिका वेत्यत्र प्राचामर्वाचाञ्च मतभेदः श्रूयते। आस्तामेतत्।

श्रमणसंस्कृतौ जगतः किमपि वस्तु एकान्ततो नित्यमनित्यं वा नास्ति। एतन्मतानुसारेण विश्वस्मिन् किमपि सुरूपं कुरूपं वा नास्त्येव। प्रतिवस्तु रसः सौन्दर्यमानन्दश्च ११३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

स्थित एव। परन्तु रसानुकूलां वृत्तिं विना तेषामुपलब्धिः सूपपादा नास्ति। अविशेषज्ञो हि जनः सुन्दरं कलामयं पदार्थमुद्वीक्ष्य क्षणमात्रं चमत्कारमनुभवति, न पुनर्मार्मिकैक-संवेद्यं गभीरं रसानुभवम्। विना प्रकृतेः, सौन्दर्यस्य सिद्धान्तानां गहनं ज्ञानं तदनुभवो दुरवगाहः। अत एव रसानुकूला वृत्तिरप्यावश्यकी। बहुधा कलाविदो दृष्टिर्यत्राऽऽकृष्यते तत्र साधारणा जना दृशमपि न ददति। यतस्ते तन्मर्म ज्ञातुमेव न प्रभवन्ति। एतावता सौन्दर्यमसौन्दर्यं वा व्यक्तिदृष्टेरधीनमिति ज्ञायत एव। बहवः कलाकोविदा गगने भ्राम्यतो जलधरान् नदीषु समुद्रे वा तरङ्गभङ्गान् पश्यन्तो विस्मृतात्मान इव गच्छन्तमपि भूयांसं कालं न कलयन्ति। अहमपि यदा क्वचन भग्नाव-शेषस्थानं प्राप्तः पश्यामि खण्डश उपलभ्यमानान्मूर्त्तिप्रस्तरभागान्, तदा किमपि शब्दैरनिवेद्यं भावसमुद्रमुच्छलन्तमन्तरनुभवन् कामप्यतिविचित्रां दशामासादयामि। किमस्योत्तरं स्यात् स्वानुभूतिं विहाय?

एवं ग्रहीतृभेदादेव रसानुभूतिर्विलक्षणेति स्फुटमेव। यदि तत्र कश्चन भौतिकः स्वार्थ-हेतुरुदेति भावस्तर्हि रसभङ्ग एव भविता। श्रमणसंस्कृतिर्भौतिकं सम्बन्धमपहाय केवलं विशुद्ध-मानन्दमेव प्रवेष्टुमादिशति। यथा यथाऽऽवरणक्षयस्तथा तथा विशुद्धं तत्स्वरूपमुन्मीलति। अयञ्च योगिसंवेद्यो निर्विकल्पक आनन्दः। सविकल्पको द्रव्याश्रितश्चानन्दो रसवृत्तिमवश्यमारभते। परन्त्वसौ साधनरूप एव न साध्यः। वर्त्तमानाः श्रमणसंस्कृतेरनुयायिनः साधनचाकचिक्यव्या-मोहिताः साध्यमुपेक्षमाणा इव दृश्यन्ते। विश्वस्मिन् त्रय एवानन्दा उच्यन्ते-आत्मानन्दो रसा-नन्दो विषयानन्दश्च। तत्र ब्रह्मानन्दः (आत्मानन्दः) एव सर्वतः प्रधानभूतः। उभावानन्दावेन-मेवोपजीव्य प्रवर्तेते। तत्र विषयानन्दो लौकिकः, रसानन्दस्त्वलौकिकः। उक्तञ्च 'एतस्यैवा-नन्दस्य अन्ये आनन्दा मात्रामुपजीवन्ति' इति। श्रमणसंस्कृतिरेनमेवानन्दं लक्ष्यीकरोति।

संस्कृतसाहित्यसमालोचकैरानन्द एव रस इति निर्णीतम् 'रसो वै सः' इत्याद्युक्ति-बलात्। एतत्त्ववधेयं स्यात्, प्रकृतिसौन्दर्यजन्य आनन्दो भिन्नः कलानिर्मितिजश्च भिन्न एवेति। ललितकलाङ्गेषु शिल्पचित्रनृत्यकाव्यसङ्गीतादिषु परममुद्देश्यं रससृष्टिरेव भवति। कविः कलाविद् वा प्रकृतिनिरीक्षणोत्पन्नान् भावान् कल्पनारागेणोपरज्य सौन्दर्यमयरूपेणोप-स्थाप्य च रसमनुभावयितुं चेष्टते। साधूक्तं विश्वकविना—'मानवः स्वकाव्येषु चित्रेषु शिल्पेषु च स्वयं प्रकाशते' इति। (साहित्य० ५३)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

साधनानि भाषा तूलिका टङ्को वा भवतु, साध्यं सर्वेषां समानमेव। कलाविदः सर्वे समा एव। भावप्रधानं जीवनमनुभवन्तः सूक्ष्मसूक्ष्मभावोद्बोधने कुशलाः कलाविदः कस्य वा राष्ट्रस्य महती सम्पत्तिर्नोच्येत ?

इदानीं यावद् मया भारतीयपरम्पराया एव सिद्धान्तः प्रणाली चोपदर्शिता। परन्तु साम्प्रतिके युगे यावत्सीमोल्लङ्घनं न स्यात् तावत्परितोषो न भवतीति साम्प्रतिकसामाजिकदृशापि विवेचनमावश्यकम्। परिवर्तनमपि जगतः कालस्य वा स्वभावः। परिवर्तनशीलं राष्ट्रमेव नवे युगे स्वसत्तां धारयितुं प्रभवेद् नेतरत्। गतः साम्राज्यवादस्य डिण्डिमघोषः। अधुना प्रजातन्त्रं शासनमेव समर्थयमाना संस्कृतिः स्वाश्रितानुन्नमयितुं प्रगल्भते।

प्रसङ्गतः वक्तव्यमिदं यत् कला प्रयोगात्मिका सौन्दर्यञ्च स्वाभाविकं भवतीति। कलाविदो हि कलायां कल्पनासंवलितानि मानसिकचित्राणि सुव्यवस्थितया शृङ्खलयोपस्थापयन्तीत्येतदेव तेषां चातुर्यम्। कल्पना च सौन्दर्यं सृजति। अत एव कल्पना सोद्देश्या वर्तते। न च कल्पनाप्रसूतमेव सुन्दरं स्यादित्यस्ति नियमः। कल्पनादौर्बल्ये कलाविदः परिश्राम्यन्तोऽपि सामाजिकैर्नाद्रियन्त इत्यपि दृष्टमेव। अत एव समीक्षकैः 'नियन्त्रितानां कल्पनानां सन्ततिरेव कला' इत्युद्घुष्यते। कलाविद् हि आत्मस्थान् भावान् पार्थिवैरुपादानैरानन्दोन्मत्तः सन्नभिव्यञ्जयति। कलाविदो ह्यानन्दो लौकिकानन्दादन्य एव। स्वशक्त्यनुसारेण कलावित् प्रकृतिगतं सौन्दर्यं स्वकृतिद्वारानुभावयितुं चेष्टते। उपादानभेदाद् द्वयोः पर्याप्त एव भेदः। कलाकारः प्राकृते सौन्दर्ये रसमुद्दीपयितुं शक्नुयात्, परन्तु प्रकृतिं साकारां कर्तुं नैव प्रभवति यतो भावमयं कलाविदो जगत्, भावमयता खल्वपरिच्छिन्ना। ततश्च कथमसौ परिच्छिन्नं निर्मातुं शक्नुयात् ?

तथापि कलाऽऽकृतिः रसमुल्लासयेदेव, एतदप्यस्मदभीष्टमस्ति। श्रमणसंस्कृतिस्तावद् रसरूपमुपादानमप्यङ्गीकरोत्येव। आत्मस्थसौन्दर्योद्बोधाय रस एव व्याप्रियते। एतेन जैनशिल्पकलाया उद्देश्यं स्फुटीभवति। तत्र हि-परमवीतरागस्य परमात्मन आकृतीनां वस्तुतः समुट्टङ्कनस्याशक्यतया तत्प्रतीकरूपैः शिल्पविन्यासैरेव ता उपदर्शिता भवन्ति। तेनापि तन्महत्त्वं प्रत्यभिज्ञायते। तासु मुखमुद्रया सौम्यत्वं शरीरत्रिन्यासैरन्ये भावाश्च प्रोद्भवन्ति। को वा ता अवलोक्य भावमग्नो न स्यात् ? श्रमणैरनया दिशा सौन्दर्योपासना भूयसी विहिता। परमियं परम्परोपदानाश्रितसौन्दर्यरूपा साधनात्मिकैवासीत्,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न तावत् साध्यात्मिका। परन्तु समाजस्तस्य वास्तवमुद्देश्यं विस्मृत्य तथा संवृत्तो यत्कलामप्यसौ नितान्तमुपेक्षते।

सौन्दर्यम्

पूर्वमुक्तमेवैतद् यत् कला सौन्दर्यापेक्षिणी भवति। वस्तुतः कलाया इव सौन्दर्यस्यापि इदमित्थमिति निष्कृष्टं लक्षणं शब्दैः प्रतिपादयितुमशक्यमेव। तथापि योऽत्र केषाञ्चित् प्रयासः स उपदर्श्यते—'अध्यात्माऽऽभासः' 'परमतत्त्वस्यापार्थिवताया पार्थिवे जगत्यपरतत्त्वेन विस्तारः' 'निःसीम्नः ससीमरूपम्' 'नानारूपे जगति अन्तरात्मन उद्योतः' इत्यादि। इतोऽप्यधिकं वैज्ञानिक्या दृष्ट्या केचिद् व्याचक्षते—'बाह्यपदार्थानां याच्छायाऽभ्यन्तरे प्रतिबिम्बिता भवति, तयैव सौन्दर्यभावनाया उदयः, सैव च तस्या मानदण्डः, तयैव तस्या निर्वाहश्च' इति। बहूनि व्याख्यानानीतराण्यप्युपलभ्यन्ते। सौन्दर्यं हि न शब्दाश्रितमपि तु भावाश्रितमेव। तत्रेयमुक्तिरपि द्रष्टव्या—

"उक्तिवैचित्र्येण, काव्यमयोद्गारैर्वा चमत्कारः शक्य उत्पादयितुम्। भावमयं जगदपि शक्यमान्दोलयितुम्। परं तथ्यनिरूपणैर्वैज्ञानिकसमीक्षया सहेतुकव्याख्यानैरूहापोहैः सिद्धान्तनिरूपणैर्वा सत्यप्रतिष्ठा नैव सम्पादयितुं शक्या।" [हिमालयः १२, पृ, १६]

निस्सन्देहं सीमातीतं सत्यं व्याख्यानैः शृङ्खलयितुमयोग्यमेव। रसानन्दमयी सुखसंवित्तिरेव सौन्दर्यानुभूतिः। 'सौन्दर्यं ज्ञानेन्द्रियसमवेतं दानम्' इत्यपि कथ्यते अनुभूतेः साधनानि तान्येवेन्द्रियाणि। संस्कृतवाण्या महाकविना माघेनाप्युक्तं—

"क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः" इति।

अयमेवाशयः 'कीट्स' कविना शब्दान्तरैरुपवर्णितः। हिन्दीभाषायाः कविभिरपि उच्यते—

"ज्यों ज्यों निहारिये नेरे ह्वै, त्यों त्यों खरी निखरे सी निकाई।"

"जनम अवधि रूप निहारल, नयन न तिरपत भेल।" [विद्यापति]

असाधारणीं कलामयीं कृतिं दृष्ट्वा यो भावोदयस्तदपि सौन्दर्यमेव। तदुपलब्धिस्तु श्रुति-

 चक्षुर्भ्यां जायते। कवीन्द्रो रवीन्द्रोऽप्याह—'न केवलं चक्षुर्भ्यामपि तु तदनुगामिना मनसैव यथार्थं सौन्दर्यमवबुध्यते' इति। (साहित्य पृ० ४२)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सौन्दर्यं नाम सर्वजनीपभोग्यं तत्त्वम्। एकस्याः कृतेः सहस्रं प्रेक्षका वर्तन्ताम्। परं तन्न क्षीयते। यतस्तेन सह नास्माकं सप्रयोजनः सम्बन्धः।

अद्यत्वेऽपि सौन्दर्योपासका न न्यूनाः, किन्तु विशुद्धा सौन्दर्यदृष्टिस्तु न सर्वसुलभा भवति। कस्याश्चित्कामिन्या अनुधावनमेव न सौन्दर्यसेवा, तत्तु पतनस्यैव कारणम्। सौन्दर्योपासकस्तावदतीव संयतो धीरश्च भवेत्तत एव तस्य वास्तविकं ज्ञानमुत्पद्येत। उच्छृङ्खलता हि सौन्दर्यं विघटयति बुद्धिञ्च भ्रंशयति। उक्तञ्च रवीन्द्रेण—

"सौन्दर्यस्य सम्पूर्णोपभोगाय संयम आवश्यकः" "अनन्तं सौन्दर्यं मनुष्यं संयममार्गं नयति" "अन्तरङ्गस्थं सौन्दर्यमनुद्बोध्य बाह्यसौन्दर्यमास्वादयितुं न शक्यते" इत्यादि।

भारतीयसंस्कृतौ संयमनियमानां स्थानमतीव महत्त्वशालि विद्यते। मानवजातेर्वास्तविको विकास एतैरेव सञ्जायते। श्रमणसंस्कृतिरमुमेव सिद्धान्तं स्वीयाभिः कलाकृतिभिरुपस्थापितवती। जीवनव्यवहारे च संयमनियमानां प्रणाली तथैव प्रवर्तिता। परमवीतरागैः परमात्मभिः स्वजीवने कठोरतराभिः साधनाभिरात्मस्थं सौन्दर्यं प्रत्यक्षीकृतम्। तदनुभूतिमेव परम्परयाऽऽश्रयन्त्या श्रमणसंस्कृत्या अद्य यावदयं महार्घो निधिः सुरक्षितस्तिष्ठति।

सैव वास्तविकी कला भवति या जीवनं सुखमयं शान्तिमयञ्चापादयेत्। आत्मानन्दश्च यथावगाढः स्यात्। यदि कलायाः सौन्दर्यस्य चोपयोगो विलासमयीनां प्रवृत्तीनां सन्धुक्षणाय कल्पते तर्हि 'ग्रीस' 'रोम' प्रभृतिदेशवदस्य देशस्याप्यधःपात एव भवेत्। परन्तु सौभाग्येन भारतीया कला धर्मे प्रतिष्ठिता सती निर्मलमादर्शमुपोद्बलयति। पाश्चात्त्यानां कला निरीक्षणप्रधाना पौरस्त्यानां भावप्रधाना धर्मप्रधाना चास्ति। पाश्चात्त्यानां कलया जडवाद एव व्याख्यायते, भारतीया कला तु आत्मपूजां (ब्रह्मसमाधिं) अलौकिकमानन्दं वानुगच्छति।

ललितकलाः

कलायाः समुचितपरिचयानन्तरं ललितकलामन्वीक्षितुं वयं प्रवर्तामहे। इयं कला न केवलं सूक्ष्ममानन्दमेव ददाति, किन्तु जीवनदर्शनाय मानवं प्रेरयति, दृष्टिमपि स्थिरीकरोति। ११७
अत एवेयं गुणप्रधाना। कालिदासेनापि ललितकलानाम गृहीतम्—'ललिते कलाविधौ'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(रघुवंशः)। इयमस्माभिर्द्विधा विभज्यते—गतिशीला स्थितिशीला चेति। प्रथमकोटौ सङ्गीत-नृत्ययोरतिरिक्तकाव्यानाञ्च समावेशः। अन्तरङ्गस्थामूर्तभावानां स्वरताललयादिभिर्व्यक्तत्वे-नोपपादनमेव सङ्गीतपदाभिधेयम्।

प्राचीनेषु स्थानाङ्गेषु सूत्रकृताङ्गेषु सङ्गीतविषयिणो बहव उल्लेखा दृग्गोचरीक्रियन्ते। भगवतो महावीरस्य कालेऽपि सङ्गीतस्य महती समुन्नतिरनुश्रूयते। देवानां देवीनाञ्च सङ्गीतचर्चा बहुलाऽऽसीत्। प्रभुगुणगाने सङ्गीतस्य वैपुल्यमासीत्। सङ्गीतद्वारा प्रवर्तिता विचाराः स्थायिनः शीघ्रगामिनश्चानुभूयन्ते। सङ्गीतं जीवजातस्य मनोहरमाकर्षकञ्च वर्तत एव। मध्यकालिकसङ्गीतशास्त्रविकासे श्रमणसंस्कृतेर्महान् सहयोग आलक्ष्यते। एतस्मिन्नेव समये शास्त्रीयसङ्गीते बहूनि परिवर्तनान्यप्यजायन्त। एतद्युगस्य निदर्शनभूतमेकं जैनसङ्गीतमंशत उद्ध्रियते—

हरिगीतम्

द्रें द्रें कि धप मपं धुधुमि धों धों भ्रसकि धरधप धोखं
दों दों कि दों दों दाग्डि दि दग्डि दि कि द्रमकि द्रमरण द्रेणवं
झ झि झें किं झें झें झरण रण रण निजकि निजजनरञ्जनं
सुरशैलशिखरे भवतु सुखदं पार्श्वजिनपतिमज्जनम् ॥ १ ॥
कटरेंगिनि थोंगिनि किटति गिगड्दा धुधुंकि धुटनट पाटपं
गुण गुणण गुणगण रणकि णें णें गुणण गुणगण गौरवं
झझि झूं कि झूं झूं झणण रणरण निजकि निजजन सज्जनाः
कलयति कमला कलितकलमलमुफलमीश महेजिनाः ॥ २ ॥
ठकि ठूं ठूं ठहिं ठहिंकू ठहिं पटास्ताड्यते
तल्लों कि लोंलों त्रेंसि त्रेसिनि डेंसि डेंसिनि वाद्यते
ओं ओं कि ओं ओं थोंगि थोंगिनि धोंगि धोंगिनी कलरवें
जिनमतमनन्त महिमतनुतां नमति सुरनरमुच्छवे ॥ ३ ॥
खुदां कि खुदां खुखुड् दि खुदां खुखुड् दिदों दों अम्बरे
चाचपट चचपट रणकि णें णों डणण डें डें डम्बरे
इह सरगमपधुनि निधपमगरस ससससस सुरसेवता
'जिन नाट्यरंगे कुशलमुनिशं दिशतु शासनदेवता ॥ ४ ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवंविधेषु पद्येषु विविधवाद्यध्वनीनां शब्दैरुपस्थापने सफलः प्रयत्नो दृश्यते। शतशो रागमालाः प्रान्तीयलास्याङ्गानि च काव्यबद्धान्युपलभ्यन्ते। ललितकलाया इयं शाखा श्रमण-संस्कृत्या सम्यगादृता परिवर्धिता च।

नृत्यकाव्ययोः शास्त्रीयपद्धतेर्विवेचनाय स्वतन्त्र एव निबन्धोऽपेक्षितः।

शिल्पं चित्रञ्च

स्थितिशीलकलासु शिल्पञ्चित्रञ्च समाविशति। श्रमणसंस्कृत्याश्रयिण्याः शिल्पकलाया संस्कृत्यपेक्षया कलात्मिकयैव दृष्ट्या वैशिष्ट्यमालक्ष्यते। तत्तत्कलानामुत्कृष्टानि चिह्नानि पादलिप्तपुर-तारंगा-आबू-अहमदाबाद-देवगढ-श्रवणबेलगोलाप्रभृतिस्थानेषु दरीदृश्यन्ते।

चित्रकलाया निदर्शनानि ज्ञानभाण्डागारेषु सुलभदर्शनानि। शिल्पं चित्रं भिन्नमपि रूपोल्लेखात्मकसादृश्यादभिन्नप्रायम्। एवं श्रमणसंस्कृतिराध्यात्मिकाऽऽधारेण पर्याप्तं सौन्दर्य-मुद्बोधयतीति। अलम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काव्यप्रेरणा ।

श्रीबलदेवोपाध्यायः ।

मानवस्य सर्वापि प्रवृत्तिः कञ्चन हेतुमवलम्ब्यैव जायते, विना किञ्चन बलवत् कारणं स काञ्चिदपि प्रवृत्तिं कर्तुं नोद्युक्तो भवति। काव्यकला मनुजस्य श्रेष्ठतमाध्यात्मिकप्रवृत्तीनां प्रतीकमस्ति। बुद्धेरुत्कृष्टतमसारतत्त्वं सम्प्राप्यैव मनुष्यः स्वीयानुभूतीः प्रकटयितुं शब्दार्थ-युगलरूपं सुन्दरं द्वारमङ्गीकरोति। स आत्मीयेनालौकिकज्ञानचक्षुषा (प्रातिभचक्षुषा) पदार्थ-सौन्दर्यं संप्राप्नोति। एवं स जगतः पदार्थेषु मानसिकभावेषु च रसस्याक्षयं निधिं सम्प्राप्य केवलं स्वजीवनमानन्दमयं सम्पाद्य च न कृतकृत्यो भवति, किन्तु स्वानुभूतानन्दस्य प्रकाशन-मात्मकलया विधाय दर्शकान् पाठकाँश्चानन्दरसपरिपूर्णान् विधातुमपि प्रयतते। एतत्सम्पादन-मेव मानवानुभूतेरवसानमस्ति।

अस्माकमृषिप्रवराणां प्रत्यक्षदर्शनं स्पष्टयति यदानन्दानुभवार्थमेव स्वयं रसतृप्तेन केनाप्यंशेनानूनेनापि विश्वसृजा विश्वं व्यरचि। 'रसेन तृप्तः न कुतश्च नोनः' (अथर्व० १०। ८।४४) रसतृप्तविश्वकर्तुरखण्डयैकया रसधारयाभितो विश्वं व्याप्तं विद्यते। अनया रसधारया शतसहस्रसंख्यया सरांसि सर्वत्र समपारिषितेव। ततो रसास्वादनार्थं मानवानां प्राणाः सदा व्याकुलाः सन्ति। रससम्प्राप्तिर्मानवजीवनस्य परमं लक्ष्यमस्ति। आनन्दानुभवार्थमेव विकल-चेताश्चेतन इतस्ततः परिबाभ्रमति। स रसमनुभूय रेखामयं स्वरमयं चित्रमयं वा किमपि द्वारीकृत्य स्वानुभूतरससंतृप्तिं बहिः प्रकाशयति। स क्षुद्रस्वार्थं मुख्यतया स्वोद्देश्यं कृत्वान्यस्मै रसानुभवानन्दमप्रदायैव रसं पातुं नाभिलषति, किन्तु स्वकीयं स्वत्वमियता प्रकारेण बृंहयति यत् ततः परं नावशेषयति किमपि। इदं स्वत्वस्य परत्वेन सह तादात्म्यकरणमेव साहित्यशास्त्र-परिभाषया साधारणीकरणशब्देन व्यवह्रियते। रसोपलब्ध्यनन्तरं रसोन्मीलनस्य प्रधानसाधनं कला विद्यते।

सन्ध्याकाले रक्ताभवारिदमालावृतस्य मञ्जुलध्वनिं कुर्वतां हरितरक्तवर्णानामुड्डीयमान-पक्षिणां गणेनालङ्कृतस्य नभस्तलस्य शोभां वीक्ष्य तूलिकया तां चित्रीकर्तुं चित्रकारो व्याकुलो

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भवति, अत्युन्नताट्टालिकामारुह्य गवाक्षेण पश्यन्त्याः शारदेन्दुविनिन्दकवदनतिरस्कृततिमिराया रमण्या रामणीयकं दृष्ट्वा कविताद्वारा तत्प्रकाशयितुं कविः प्रभवति, कमनीयवीणातन्त्रीर्झाङ्कृत्य तत्स्वरमाधुर्या श्रोतॄन् मोहयितुं वादकोऽतीव परिश्राम्यति वेति विचार्य कलायाः साहित्यस्य च का मूलभूता प्रेरणेति विचिकित्सायां स्वान्तःसुखायेत्येव केवलमुत्तरं पुरः स्फुरति। अथ रसानुभवानन्दमुग्धो विदग्धः स्वीयानन्दानुभूतिमनेकविधकलारूपसाधनान्यवलम्ब्योन्मिषति। तथाहि—सर्वतः पूर्वं ब्रह्मतत्त्वमेकमासीत्। एकेन सता तेन रन्तुं नाशाकि, रिरंसया तेन बहु-स्यामिति समकल्पि। अर्थाद् रिरंसैवैतस्य सतोऽनेकभवनप्रेरिकेत्यायातम्। उपनिषत्स्पष्टमिद-मुद्घोषयति 'एकाकी नैव रमते' 'सोऽकामयत' 'एकोऽहं बहु स्याम्' इति। एषा बहुभवनैषणैव सृष्टिमुद्भावयति। सा चैषणा पुत्रवित्तलोकविषयकत्वेन स्वात्मानं त्रिधा भिनत्ति। (एषणा= कामना, अभिलाषः) एषणात्रयतृप्त्यर्थमेव सर्वः प्रपञ्चो विलसति (अत्र पुत्रैषणायां भार्यादि-विषयकैषणान्तर्भावः, लोकैषणायां यशःसम्पादकधर्मादिकामनाया अन्तर्भावो विद्यते) एवञ्च कामवित्तधर्मास्त्रयः पुरुषार्था विश्वस्मिन् संसारे सर्वप्रवृत्तीनां मूलं निदानमिति फलति। परन्तु मोक्षाख्यश्चतुर्थः परमः पुरुषार्थोऽपि प्राणिजातस्योद्बोधनस्य प्रवृत्तेश्च कारणं भवति। यतो दुःखत्रयलहरिकाप्रताडितो मानवः सदा दुःखत्रयादात्मानं मुमुक्षति। अनेकनियमबन्धन-नियन्त्रितः पारतन्त्र्यशृङ्खलानिगडितश्च स स्वातन्त्र्यमभिलषति। उक्तञ्च-'सर्वं परवशं दुःखं सर्वमात्मवशं सुखम्' इति। प्रयतमानश्च पुरुषः प्रकृतितः सर्वथात्मानं विविनक्ति, ततश्च मुक्तो भवति। अस्यैव साधनार्थं सम्पूर्णाः कलाः शास्त्राणि काव्यानि च प्रथन्ते।

वयन्तु भगवतो गोस्वामिनस्तुलसीदासस्य 'स्वान्तः सुखाय' इति सिद्धान्तमेव समस्तकला-दिकानां मूलभूतप्रेरणशक्तित्वेनाकलयामः। तथाहि—अस्मिन् जगति सम्पूर्णप्रेरणानां स्फुरणा-नाञ्च स्पष्टो भव्यश्च न केवलमाश्रय आत्मा, अपि तु नानाप्रकारेणानेकरूपाण्यनुकृत्यास्माकं पुरतो विलसति। सम्पूर्णप्रियवस्तुष्वात्मैव प्रेष्ठः। कामनावल्लिरात्मद्रुममाश्रित्य स्वात्मनो महान्त-माकारं विस्तारयति। एवं जीवनस्याशेषकार्येषु शक्तिरस्य कार्यं सम्पादयति। विश्वं निरीक्षमा-णस्य निरीक्षणस्यान्ततो मुख्ये केन्द्रभूत आत्मन्येव पर्यवसानं सम्पद्यते। विशालस्यास्य विश्वस्य सर्वतः परिगणने मुख्यं केन्द्रमात्मेति मत्वा वात्सल्यपूरितहृदया मातृतुल्या श्रुतिरनेकसंसार-दुःखग्रस्तान् क्लेशासहिष्णून् जनान् दृष्ट्वा सकलदुःखजिहीर्षयोपदिशति 'आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति। एवञ्च भारतीयाध्यात्मिकविचाराणां परिगलितं फल-मिदमेव 'आत्मानं विजानीहि' इति। तथा यूनान (यवन) देशीयमान्यमहापुरुषस्य महावाक्य-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

मिदमस्ति 'Know thyself.' आत्मनः साक्षात्कार एव कलात्मकचिन्तनप्रवाहस्य रसात्मक-रचनाधारायाश्च मूलं स्रोतोऽस्ति।

महाकविकालिदासविरचितमेघदूतकाव्यस्याध्यात्मिकरहस्यमिमं विषयमतिसुन्दररीत्या स्फोरयति। आनन्दमये स्वर्लोके जीवोऽयमतिसुखेन स्वकीयं जीवनं यापयति, अथवा नित्ये वृन्दावने रसिकोत्तंसेन भगवता श्रीकृष्णेन सह लीलानिमग्नः सन् तन्मयताञ्चानुभूयात्मानं विस्मरति। अनन्तरासमधुरिमाणमास्वाद्य स्वात्मानं कृतार्थं मन्यते च। परन्तु दैवेन विषमकर्मणो विषमपरिणत्या स 'यत्र गावो भूरिशृङ्गा अयासः' इति श्रुतिप्रतिपादितगोलोकादथवा भगवतो विष्णोस्तृतीयक्रमरूपस्वर्गाद् बहिष्कृतो भूलोक आयाति। इयमेव स्वर्गच्युतिः। स्वामिशापग्रस्तो ललितालकातो बहिष्कृतः कालिदासीयो यक्ष आनन्दमयस्वर्गात्पतितानां जीवानां प्रतीकभूतः। स कर्तव्येन साकं प्रेम्णः, विश्वमङ्गलेन सह स्वात्मकर्तव्यस्य, परोपकारेण समं स्वार्थस्य सम्पादने मानवेन नापराद्धव्यमिति सूचयति। ईशवीयग्रन्थतोऽपि ज्ञानफलभोगार्थं निरुद्धेन 'आदमेन' ज्ञानफलं भुक्त्वा स्वप्रियया सह स्वर्गाद् निष्कासनमन्वभावीति श्रूयते। अस्य निष्कासनस्येदमेव रहस्यम्।

एवं मानवस्य पतनमिवोत्थानमपि सम्पद्यते। उत्थानपक्ष एव मनुष्यत्वं सफलं सम्पद्यते। यदि सर्वसुन्दरशिवाद् वियुक्तो मानवः सततं तद्वियोगाग्निदग्धः स्यात्तदा तस्य महत्त्वस्य कृत इदं सर्वथानुचितं भवेत्। वियोगः संयोगोपलब्ध्यैव नितरां शोभते। वस्तुतो वियोगो मानवस्याध्यात्मिकोन्नत्या शिवत्वप्राप्तावेका स्वाभाविकी स्थितिरस्ति। परन्त्विमामवस्थामेव परमफलत्वेन मन्वाना आत्यन्तिकीं स्वोन्नतिं कदापि न प्राप्नुयुः। पतनोत्थाने, ह्रासवृद्धी, वियोगसंयोगौ चाध्यात्मिकोन्नतेरत्यन्तोत्कर्षाय परमावश्यकतां भजन्ते। यतो यथा वियोगपीडा हृदयमामूलं दहति, तथानन्दधामस्मृतिरप्याप्यानन्दानुभवं संस्मार्य शिवसंयोगार्थं जीवमुत्साहयति। वस्तुतो मृत्युं जित्वामरत्वप्राप्तिरथवा प्रपञ्चद्वारेण निष्प्रपञ्चभवनं तदैव सम्पद्येत यदा जीवः परमात्मानं ज्ञात्वा स्वात्मानमपि तत्स्वरूपत्वेन विजानीयात्।

वस्तुतो विश्वस्मिन् जगति यावन्ति रचनात्मकानि रसात्मकानि वा कार्याणि विद्यन्ते तानि सर्वाण्यपि परमात्मनः शक्तेर्विभिन्नविचित्ररूपस्फुरणानि सन्ति। परमात्मैव तानि

स्वानन्दोपलब्ध्यर्थं निर्माययति। आत्मन आनन्दरूपतयैवास्मिन् जगत्यानन्दरूपता विद्यते। आनन्दरूपताया अनुभूत्यर्थमेव चित्रकला स्थापत्यकला कविता सङ्गीतादीनि साधनानि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सन्ति । अतो भारतीयसमालोचकाः कलामात्मशक्तिस्फुरणत्वेनामनन्ति । काव्यनिर्माणेऽप्येतत्स्फुरणमेव प्रयोजकमित्यपि स्वीकुर्वन्ति । आत्मनः स्वरूपस्फुरणं काव्यस्य जीवातुभूतम्, आनन्दोन्मीलनमुद्देश्यम्, सुखपूर्वकञ्चतुर्वर्गप्राप्तिर्मुख्यं प्रयोजनमिति च कथयन्ति ।

काव्यप्रेरणा नूतनमनोविज्ञानञ्च ।

अस्य भारतीयसिद्धान्तस्य समीचीनत्वं ज्ञापयितुमनेकविचारधाराप्रवाहितपाश्चात्यमनोविज्ञानसिद्धान्तैः सहास्य तुलना क्रियते । प्राचीनमनोविज्ञानशास्त्रे प्राणिनां नैकविधकार्येषु प्रवर्तिकाः स्वाभाविक्यस्त्रयोदश शक्तयः सन्ति । ताः प्राणिभिः सह जायन्तेऽतो मूलप्रवृत्ति-(Instincts) नाम्ना व्यवह्रियन्ते । ताः स्वयं नैकविधोत्तेजकसाहाय्येनोत्तेजिताः सत्यो नैकविधक्रियासु प्रकाशन्ते[1] । मूलभूतकामवासनारूपैकशक्तिवादि'फ्रायड'रचितनूतनमनोविज्ञानशास्त्रे (साइको--एनेल्सिस्) मानवस्य सम्पूर्णेच्छानां क्रियाणां वा कारणमेकैव 'लिबिडो'[2] नामिका मूलशक्तिरस्तीति प्रतिपादितम् । परन्तु तस्य शिष्याभ्यां 'एडलर-युङ्ग'नामकाभ्यामेतां मूलशक्तिमङ्गीकृत्याप्यस्याः स्वरूपविचारः फ्रायडविचारापेक्षयात्यन्तभिन्नत्वेन विलक्षणत्वेन च प्रत्यपादि । अस्माभिः क्रमेणैतानि मतान्यालोच्यन्ते—

फ्रायडमहोदयः स्वकीयं सिद्धान्तमित्थं विवेचयति । मानवस्य कार्यविषयिणी या काचित् प्रवृत्तिरस्ति सा सर्वापि स्वतृप्त्यर्थमनेकमागरचनाचतुरया कामवासनयैव प्रवर्त्यते । यदा सा साधारणसरलमार्गेण साफल्यं नैव लभते, तदा साऽसामान्यं पन्थानं विरचयति । स च मार्गोऽवरोध[3]-मार्गान्तरीकरण[4]-रूपान्तरकरण[5]-शोध[6]रूपैस्त्रिधा भिद्यते । एतैरेव सभ्यताया विकासो भवति । एषा कामवासना सर्वत्र विद्यमाना सर्वं व्याप्य तिष्ठति । इमां विश्लिष्य रूपत्रयमपि कथयितुं शक्यते । (१) स्त्रीपुरुषयोः सन्तानफलको दैहिकसंयोगः संभोगेच्छापदेनोच्यते । (२) अन्योन्यं प्रत्याकृष्य प्रेमपूर्वकसंवाददिद्वाराभिव्यक्तो मानसिकः संयोगो द्वितीयः । (३) बालकान् प्रति प्रेमकरणं तेषाञ्च संरक्षणं तृतीयः प्रकारः । प्रकारत्रयमिदं साधारणाभिव्यक्ति-

१ 'मैकडूगल'नामकेन प्रसिद्धेन मनोविज्ञानविदुषा 'आउट लाइन ऑफ् साइकोलॉजी' 'इनर्जीज ऑफ मैन' नामकग्रन्थयोर्मध्येऽस्य मतस्य विवेचनमकारि ।

२ Libido. ३ Inhibition. ४ Redirection. ५ Transformation.

६ Sublimation.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रकारेऽन्तर्भवति। सन्तानोत्पत्तिर्गार्हस्थ्यजीवनस्य पर्यवसानमस्ति। मनोविज्ञानशास्त्रज्ञैरुच्यते, यदा कामवासना साधारणसरलमार्गेण साफल्यं नैव भजते तदा सा मानवजीवनेऽनेका विशिष्टा विलक्षणाः प्रभाववतीश्च घटना घटयित्वा सर्वस्मिन्नपि लोकव्यवहारे स्वसाफल्यं प्रकाशयति।

कामवासना स्वनिरोधोदात्तीकरणयोरनेकाः कला अभिव्यनक्ति। अधः प्रसृता सत्यर्थादवनता सा संसारेऽनेकप्रकारेण व्यवहारयति मानवम्। सा यदोर्ध्वं प्रसरति (परिशोधनम्-उदात्तीकरणम्, 'Sublimation') तदोदेति साहित्यिकं जीवनम्। एवञ्च फ्रायडमते भोगविषयकं दैनन्दिनप्रवाहमवरुद्ध्य यदा कामवासनायाः प्रवृत्तिः कामप्युन्नतां भावनां प्रकाशयितुं प्रवर्तते तदा कलायाः काव्यस्य वोद्गमो भवति।

आधुनिकप्रगतिवादिविचारकाणां काव्यादिकलानामुत्पादिकैका कामवासना अस्ति, या स्वतृप्त्यर्थं काव्यादिकला जनयतीति सिद्धान्तो न स्वीकर्तुं युज्यते। नो चेद् नीतिविरुद्धाचरणशीलाः परस्त्रीव्यभिचारपरायणाः सर्वश्रेष्ठकवयो भवितुमर्हन्ति। परन्तु तैः प्रमाणपदवीमारोपितः फ्रायडमहोदय एव विरोधमुद्घोषयति यत् कामवासनापरिशोधनेनोदात्तीकरणेन वा काव्यकला जन्म लेभ इति। अत्र विषये महाकवीनां श्रेष्ठकलाकाराणाञ्च चरितं प्रमाणकोटिमाटीकते।

यद्यपि भारतीयर्ग्वेदादिग्रन्थेषु कामवासनायाः प्रावल्यं दरीदृश्यते। 'कामस्तदग्रे समवर्तताधि' (ऋ० १०।१२९।४) तथा नासदीयसूक्ते सृष्टिप्रारम्भे कामोदयकथा लभ्यते। एवं यद्यपि वासनारूपेण कामः सूक्ष्मरूपेण सृष्टेर्मूले सर्वत्र व्यापकरूपेण वर्तते, तथापि स एव सर्वत्र कार्यप्रयोजको मूलशक्तिरूप इति मतं न युक्तं प्रतिभाति। कलानामांशिकोदये कामप्रेरकत्वसिद्धान्तो युज्यते न तु समग्रांशेषु। यतोऽतिविस्तीर्णस्य मानवव्यवहारस्य प्रेरिकाणामन्यशक्तीनां सत्तां स तथा सत्यपह्नुवीत।

फ्रायडप्रभृतिमनोविज्ञानवेत्तारः काव्यं स्वप्नसमानयोगक्षेमं मन्वते। तथा हि स्वप्नो नामान्तःकरणैकदेशे निहितानामतृप्तवासनानामन्तर्व्यक्तः प्रकारविशेषोऽस्ति। दैनन्दिनबाह्यव्यवहारे सामाजिकदृढप्रतिबन्धेन कदापि साफल्यमप्राप्ता अन्तःकरणैकदेशे दान्ता वासनाः स्वप्नद्वारमवलम्ब्यात्मानमभिव्यञ्जति। काव्यविषयेऽपि समानमेतद् यतो विशालताभव्यताप्रभृतयो भावना असफलीभूता अज्ञातेऽन्तःकरणैकदेशे ह्रुतास्तिष्ठन्ति, ताश्च कलात्मकवाक्यद्वारमवलम्ब्यात्मानं सफलयन्ति; तथा न केवलं कवयितुर्हृदयं प्रत्युत श्रोतृहृदयमपि प्रसादयन्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

फ्रायडमहाशयस्य काव्यविषयकोऽयं मान्यः सिद्धान्तोऽनेकभ्रामकयुक्तियुतो विचारकोटि-माटीकितुं नैवार्हति। तथा हि स्वप्नकाव्यविषयौ बाह्येन्द्रियगोचरौ न भवत इत्येकं साहश्यं परित्यज्य सर्वथा स्वात्मानं भिन्तः। स्वप्नेऽनुभूताः पदार्थाः प्रत्यक्षवत् स्पष्टाः प्रभावोत्पादकाश्च भवन्ति। न तथा कल्पनाप्रसूताः काव्यपदार्थाः। एवं कदाप्युभयगतपदार्थप्रतीतिर्नैकरूपा भवति। एवमन्यन्महदन्तरमनयोः करुणरसविषये विद्यते। यत् काव्ये करुणरसप्रसङ्गा बहवो विद्यन्ते। परन्तु बाह्ये जगति न कश्चित् शोकमभिलषति, यतो हि शोकवासना नाणुमात्रेणाप्यानन्दमुत्पादयति। शोकवासना दमनार्हा न त्वभिव्यक्त्यर्हा, अतो मनोविज्ञानविदामेतेषां काव्यविषयकः सिद्धान्तः कथमपि ग्राह्यकोटिं नाटीकते[1]।

अतः फ्रायडमहोदयमनुयन्नपि तच्छिष्य 'ऐडलर'महोदयः कामवासनायाः सर्वकार्येषु नितान्तं प्रेरकत्वं नाङ्गीकरोति। सोऽन्यत् कथयति प्रभुत्ववासना मूलशक्तिरस्ति। यया सर्वापेक्षया स्वव्यक्तित्वोत्कर्षविशिष्टयाऽन्यान् तिरस्करोति मनुजः। प्रतिमनुष्यमस्ति कश्चिद् व्यापको दोषः, येन समाजे स महत्त्वहीनः परिगण्यते। अतस्तस्य मनः सर्वदा तेनावमानेन पीडितं सत्तद्दोषं नितान्तमाच्छाद्य तद्विरुद्धं गुणं सम्पादयितुं प्रयतते। सर्वासां सांसारिकप्रवृत्तीनामिदं मूलं कारणम्। अस्य सिद्धान्तस्योत्तमो दृष्टान्तो यवनदेशीय(यूनान)वक्तुः 'डिमास्थिनीज्'-महोदयस्य चरितम्। स 'एथेन्स'नगरस्य सर्वोत्कर्षसमयेऽजनि। बाल्ये काले स ग्रस्तवाचा वदति स्म। तद्दोषपरिहारार्थं तेनेत्थं प्रायाति येन स तत्काले सर्वश्रेष्ठवक्तॄणां मूर्धन्यः समजायत। ऐडलरमहोदयः प्रभुत्वशक्तेस्तुल्यकोटिकां काञ्चनाप्यन्यां प्रभावशालिनीं शक्तिं न मनुते। अत एव तस्य मनोविज्ञानं व्यक्तिमनोविज्ञानमिति नाम्ना प्रसिद्ध्यति।

अयं सिद्धान्तः केषुचिदंशेषु सुयुज्यते, यतः स्वदोषनिरासार्थं बहुभिरलौकिकानि कार्याणि समपादिषत। स्वपत्नीतिरस्कारपराहतेन श्रीमता गोस्वामिना तुलसीदासेन स्वचरित-दोषनिरासार्थं कियन्महत्कार्यं समपादीत्यस्य सिद्धान्तस्य स्फुटमुदाहरणम्, परन्तु दोषजहीनताग्रन्थिनिवारणार्थं[2] न सर्वाः प्रवृत्तयः स्वात्मानं लभन्ते। विशाले संसारे सन्त्यनेके पुरुषाः,

१ आचार्यरामचन्द्रशुक्लविरचितरसमीमांसा (पृ० २९३-२९४) द्रष्टव्या।

२ Inferiority Complex.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

येषु हीनताविरोधिनः स्वाभाविका उदात्तग्रन्थयो[1] विद्यन्ते। एतेषां स्वाभाविकप्रवृत्तिमूलकानुपपत्तिरेवास्मिन् ऐडलरमते महान् दोषः।

अनयोर्मतयोरसामञ्जस्यं दृष्ट्वा प्रसिद्धमनोविज्ञानविदा 'युङ्ग'महोदयेन नूतनः पन्थाः प्राकाशि। तेन सर्वे मानवा बहिर्मुखान्तर्मुखप्रकाराभ्यां व्यभञ्जिषत। बहिर्मुखपदेन (एक्स्ट्रावर्टेड) त एव परिगण्यन्ते येषामन्तःकरणवृत्तिः सदैव सांसारिकभोगविलासेष्वासज्जति। अन्तर्मुखशब्दबोध्यानां (इन्ट्रावर्टेड) सर्वदैवान्तःकरणवृत्तिर्बाह्यविषयेभ्यः परावृत्यान्तर्भूय च शान्तिमन्विष्यति। युङ्गमहोदयश्चेतनाचेतनभेदेन मनो द्विधा विभज्य तयोर्वास्तविको विरोध इत्यपि विवेचयति विवृणोति च स्वीयं सिद्धान्तमित्थम्, बहिर्मुखपुरुषस्य मनोऽत्यन्तं प्रसीदद्प्यचेतनं तावदेवाप्रसन्नं दुःखयुतञ्च विद्यते। अन्तर्मुखमनुजस्य चेतनं मनोऽलसं दुःखयुतञ्च सदुदास्ते, परन्तु तस्यान्यदचेतनं मनोऽत्यधिकप्रसादयुतं शान्तञ्च वर्तते। अस्या वास्तवकस्थितेर्नामधेयं युङ्गमहोदयेन (Mental Compensation) मानसिकसमीकरणमिति प्रत्यपादि। एवञ्च मानसिकवृत्तयो मानवस्य प्रगतिमप्रगतिं वा प्रदर्शयेयुस्तथापि तासामपूर्णमानवजीवनस्य पूर्णताप्रापणमेव मुख्यमुद्देश्यं समस्ति।

हेडफील्डनामा मनोविज्ञानवेत्ता मानसिकविकासस्य पूर्ण आत्मसाक्षात्कार एव मुख्यं लक्ष्यं मनुते। तस्य स्वकीयमतमित्थम्, प्रत्यभिलाषं पूर्णतया स्वातन्त्र्येण चाभिव्यक्तिर्विकासश्चेति[2]। स एतद्विवेचयतीत्थं प्रकारेण, यावत्पर्यन्तं मनुजस्य मनोऽन्तर्विभागे बाल्यकालिकाः प्रौढकालिका वा या असफला अभिलाषा वर्तन्ते ते चेतनं मनः सम्प्राप्य (सबलान्तःकरणवृत्ति) स्वात्मनः साफल्यं न भजन्ति, तावत् तस्य मानसिको विकासोऽपूर्णस्तिष्ठति।

१ Superiority Complex.

२ Self realisation—That is to say, the complete and full expression of all the instincts and impulses within us cannot be achieved so long as there are elements in our soul that are expressed and denied expressions. In a full realised self there is no conflict of purpose, no complexes, no repression, but the harmonious expression of all the vital forces towards a common purpose and end.

—Hadfield, Psychology and Morals p. 77

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवमात्मसाक्षात्कारः पूर्णो न भवितुमर्हति। आदर्शपुरुषाणां जीवनचरिते वैयक्तिकसुखादि-विषयकेच्छानां तथा पारमार्थिकभावानां पूर्णमैकरूप्यमस्ति। श्रेष्ठः पुरुषो न केवलं ज्ञानमुपास्य सांसारिकसुखेच्छां तिरस्करोति, एवं सांसारिकपदार्थानत्यधिकं संसेव्य न ज्ञानमवरुन्धे; प्रत्युत ज्ञानभावयोर्विचारेच्छयोश्च तथा पूर्णं विकासं करोति यथा समष्टिं न विरुन्ध्यात्। पूर्णतायाः प्राप्त्यर्थं व्यक्तेरचेतनमनसः भावस्य ज्ञानं प्रकाशनञ्च न केवलं पर्याप्नोति, किन्तु समष्टेरचेतनमनसो ज्ञानं तदनुकूलाचरणमप्यपेक्षितम्। आत्मसाक्षात्कारार्थं हेडफील्डमहोदय उपदिशति (१) स्वात्मानं विजानीहि। (२) स्वात्मानं स्वीकुरु। (३) स्वात्मनि तिष्ठेति। एवञ्चात्मज्ञानं सम्पाद्य तज्ज्ञानानुकूलं स्वजीवनकाले स्वाचरणं सम्पादनीय-मित्येव व्यक्तेर्मानसिकविकासस्य मुख्यं साध्यम्।

युङ्गप्रोक्तसिद्धान्तानुसारमात्मसाक्षात्कारवृत्तिरेव कलायाः काव्यस्य च प्रेरिका। कला व्यक्तेर्मानसिकविकासानामन्यतमः प्रकारोऽस्ति। अतो व्यक्तेर्मानसविकारस्य पूर्णता तदैव सम्पद्येत यदा स आत्मसाक्षात्कारं कुर्यात्। पूर्वनिर्दिष्टभारतीयमतानुकूलमिदं मतमस्ति। परन्त्वस्मिन्नपि सिद्धान्तेऽनेके विचारणीया अंशाः सन्ति। वयं त्वित्थमनुभवामो यदाधुनिक-मनोविज्ञानं कलाप्रेरणाशक्त्यन्वेषणपरं सदत्यतिप्राचीनं भारतीयर्षिप्रोक्तसिद्धान्तं बलादङ्गी-कुर्यादिति।

कलायां व्यक्तित्वस्य स्थानम्

प्रसङ्गतोऽत्रेदं विचारणीयमापतितं यत् कलायां काव्ये वा कलाकारस्य कवेर्वा कियान् प्रकाशः प्रभुत्वञ्च वर्तत इति। पूर्वोक्तविवेचनेनेदं स्पष्टं प्रतिस्फुरति भारतीयविचारकदृष्ट्या काव्ये कवेर्व्यक्तित्वस्य रामणीयकत्वं केवलं न वर्तते, किन्तु तस्यात्मनः सम्पूर्णः प्रभावः प्रकाशते तत्र बाह्यसामग्र्या आश्रयस्तज्जन्यं बन्धनञ्च न तिष्ठति। अयमभिप्रायः—

काव्ये व्यक्तित्वविषये परस्परविरुद्धमतद्वयं पाश्चात्यविदुषां प्रचलति। एके कलाकाराणां व्यक्तित्वस्य कलायां काव्ये वा पूर्णो विकासोऽस्तीत्यभिप्रयन्ति। अन्ये पुनः कलायां तत्कर्तु-र्व्यक्तित्वस्य सर्वप्रकारेण तिरस्कारं परिहारञ्चामनन्ति। पाश्चात्यविचारकैरस्मिन्विषये कलात-त्कर्त्रोश्च विशिष्टा स्थितिः समालोचि। 'ब्रेडसे'महोदयः कथयति—कला न वास्तविको जगतोंऽशोऽस्ति न वा वास्तविकमनुकरणमपि। कलाया जगत् स्वयं पूर्णं स्वतन्त्रं स्वाधीनं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विलक्षणञ्चास्तीति । अन्यः समालोचकः 'क्लाइमवेल'महाशय इमं सिद्धान्तमनुकृत्य वदति यत् कस्यचित्कलावस्तुनो रसाननुभवितुं न जीवनस्यापेक्षा न वा जीवनस्य विचारैर्घटनाभिर्भावनाभिर्वा सह परिचयस्यावश्यकता वर्तते । अस्य मतस्यानुमन्तारः कलानुभूतिं सांसारिकसर्वानुभूत्यपेक्षया विशिष्टां विलक्षणाञ्च मन्यन्ते । वस्तुत इदमेकदेशिमतमस्ति न वास्तविकम् ।

भारतीयसाहित्यशास्त्रे कवयितुर्व्यक्तित्वस्याभिव्यक्तिः सर्वांशरूपेण नाङ्गीकृतास्ति । भारतीयरसशास्त्राणां प्रधानं लक्ष्यम्, श्रव्यकाव्यपाठकानां दृश्यकाव्यदर्शकानां वा रसोपलब्धिकरणमेव । पाठकश्रोतारौ भारतीयरसशास्त्रे 'सामाजिक' पदेनोच्येते । सामाजिकस्य सर्वसमाजप्रतिनिधिभूतस्य हृदये रसोन्मीलनकरणमेव कवेः प्रधानं लक्ष्यम् । स्वानन्दानुभवकरणेन सह सम्पूर्णसमाजस्य मङ्गलाय हिताय महनीयोपदेशार्थञ्च कविः सततं प्रयतते । काव्ये तस्य सत्त्वं प्रस्फुरदपि तत्सङ्कीर्णं भूत्वा न परत्वं विरुध्यते । इदं तात्पर्यं काव्ये कवेर्व्यक्तित्वं कदापि न समष्ट्या सह कथमपि विरुणद्धि । भारतीयसंस्कृतौ सर्वदैव व्यष्टिसमष्ट्योः रामणीयकं सामञ्जस्यं वर्तते । यथा भारतीयो धर्मो व्यक्त्या आध्यात्मिकोन्नतिसन्देशं ददत् समाजहिताय जागर्ति तथा भारतीयसाहित्यमपि व्यक्तिसमाजयोर्मङ्गलं सम्पाद्योभयस्वार्थसमीकरणार्थं प्रवर्तते । एवं कवेर्व्यक्तित्वद्वारा समाजः काव्यसाधनं सम्पाद्य स्वसुन्दररूपं समुपस्थापयति । भारतीयः कविः स्वकृतिद्वारा कदापि समाजं नोपेक्षते । व्यावहारिकजगतः सुखदुःखाद्यनुभवितृलौकिकपुरुषापेक्षया कलाकारेऽस्त्येव विशेषः, यत्तस्य व्यक्तित्वं साधारणीकृतं भवति। अर्थात्कलाकारः स्वस्वार्थविचारं परित्यज्य स्वीयानुभूतिं साधारणरूपेण गृह्णाति । स्वीयां तां रसानुभूतिं स्वात्मीयत्वेनागृहीत्वा सर्वसाधारणीकृत्य च सरसमङ्गलसाधिकां कलाकारकृतिं मनुते । कलाकारस्यानेन साधारणीकृतव्यक्तित्वेन काव्ये सर्वजनीनता सार्ववर्णिकता च सदैव प्रस्तूयते ।

पाश्चात्त्यसमालोचकानामपीदमेव मतमत्यधिकमभिमतं दृश्यते । प्रसिद्धसमालोचको 'रीचर्डस'महोदयः कलात्मकानुभूतिं विलक्षणनूतनानुभूतित्वेन न स्वीकरोति । किन्तु तां साधारणानुभूतीनां सङ्कलनं मन्यते । अत्र वास्तविकं तथ्यमिदं स्फुरति, कलाकर्तुर्व्यक्तित्वदृष्ट्या कलात्मकरचनायाः समीक्षासमालोचनं न सम्भवति । व्यक्तित्वन्तु स्वयमेकं द्वारमस्ति येन तद् वस्तु व्यक्तं भवति यद् बाह्यजीवनपदेनोच्यते । समाजस्य यादृशी स्थितिर्भवति यथा वा निर्माणमस्ति तथैव कलाकारनिर्माणस्य तदुपादानं भवति । अत एव साम्प्रतिकाः पाश्चात्त्याः समालोचकाः कलाकर्तुर्व्यक्तित्वं महत्त्वेनाविशिष्येतिहासं समाजञ्च विशिंषन्ति । आधुनिकः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुप्रसिद्ध आङ्ग्लदेशीयः कविः 'इलियट'महोदयस्त्वेतावत्पर्यन्तं कथयति यत् कविता कलाकारव्यक्तित्वं नाभिव्यनक्ति। किन्तु तस्य व्यक्तित्वं निराकरोति। (Poetry is not the expression of personality but an escape from personality) अस्य तात्पर्यमिदमस्ति, सुयोग्यः कलाकारो जीवनस्य विशालतां विविधताञ्च परिपश्यन् तत्कृते स्वव्यक्तित्वं सर्वथा तिरस्करोति। यदि काव्यं स्वत्वं प्रति सर्वत्वं विजयतेतरामित्युद्घोषयतीति कथ्यते तदा तत्कथने नात्युक्तिदोषसंस्पृष्टं भवेत्। अभिव्यञ्जनमेव कलाया उद्देश्यम्, तथा व्यक्त्युद्गारस्य स्थाने विश्वानुभूतीनां निवेशनं विनाभिव्यञ्जना नात्मानं सम्पिपर्ति।

एवञ्चेदं फलति कलायां मानवजीवनधारा वहति। समाजस्य प्राचीनाया वर्तमानायाश्च परम्परायाः सर्वतो भिन्नं जगत्कलायाः कृते न विद्यते। कलाकारः समाज एवाजनि स समाजत एव स्वविचारोद्बलकान् पदार्थान् गृह्णाति। स स्वीयसंकुचितव्यक्तित्वक्षेत्रतो विचारान् भावनाश्चोन्नतिपथं नीत्वा विश्वक्षेत्रेण सह सामञ्जस्यं स्थापयितुं प्रयतते। अस्यां स्थितौ भारतीया आलोचकाः कलां कलाकर्तुः सीमितव्यक्तित्वाभिव्यक्तित्वेन न मन्वते। प्रत्युत कलाकर्तुर्व्यक्तित्वं तादृशं मन्यन्ते यत् सम्पूर्णविश्वेन सह सामञ्जस्यमतिष्ठिपत्। एतादृशकलाकर्तुः कृतिः सर्वजनसुखाय तथा सर्वजनहिताय सुतरां भवतीति निश्चप्रचम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



काशिका-तद्रचयितारौ जयादित्यवामनौ च।

श्रीविश्वनाथशास्त्री भारद्वाजः।

महर्षिपाणिनेरष्टाध्यायी चतुस्सहस्रसूत्रगुम्फितेति प्रसिद्धम्। परन्तु तत्रापि महर्षिपतञ्जलेः केषाञ्चित्सूत्राणां वार्तिकत्वेन वार्तिकानाञ्च सूत्रत्वेन स्वीकारात्[१], चान्द्रव्याकरणरचयित्रा चन्द्रगोमिना च संयोगविभागाभ्यां नूतनशब्दयोजनया च सूत्राणां परिवर्तनात्[२] सा संख्या यथोक्ता नैव सिद्धा भवति।

चन्द्रगोमिपरिष्कृताष्टाध्याय्याः प्रसिद्धा टीका काशिकानाम्नी वरीवर्ति। अष्टाध्याय्या उपलब्धासु सर्वासु टीकासु काशिकैव सर्वश्रेष्ठा प्राचीना सम्पूर्णा च। अस्याष्टीकाया इदं वैशिष्ट्यं यदत्र सूत्राणामनुवृत्तिप्रदर्शनपूर्वकं विभिन्नोदाहरणैस्तदर्थस्पष्टीकरणे सफलः प्रयासः कृतः[३]। चन्द्रगोमिकृतपरिवर्तनस्योपादेयतां प्रकटीकृत्य पाणिनीयव्याकरणे तस्य समावेश

१ 'अचि शीर्षः' (६-१-६२) 'नित्यमाम्रेडितेऽचि' (६-१-१००) 'द्वित्रिपूर्वादण्च' (५-१-३६) महाभाष्ये सूत्राण्येतानि वार्तिकत्वेन गृहीतानि।

२ यथा 'सदेः परस्य लिटि' (८-३-११८) इत्यस्य स्थाने 'सदिस्वञ्जेर्लिटि'। विशेषः खलु कीलहार्नमहोदयवर्णनेऽत्रैव लेखे द्रष्टव्यः।

३ यथा 'तृतीया च होश्छन्दसि' (२-३-३) इत्यत्र 'कर्मणीति वर्तते। द्वितीयायां प्राप्तायां तृतीया विधीयते, चशब्दात् सा च भवति। छन्दसि विषये जुहोतेः कर्मणि कारके तृतीया विभक्तिर्भवति द्वितीया च। यवाग्वाग्निहोत्रं जुहोति। यवागूमग्निहोत्रं जुहोति। छन्दसीति किम्। यवागूमग्निहोत्रं जुहोति।' तथा च 'अपवर्गे तृतीया' (२-३-६) इत्यत्र 'कालाध्वनोरत्यन्तसंयोगे' इति वर्तत इत्यादि। 'परस्मिन्विभाषा' (३-३-१३८) इत्यत्र 'भविष्यति मर्यादावचने कालविभागे चानहोरात्राणाम्' इति सर्वमनुवर्तत इत्यादि।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवास्याः प्रधानमुद्देश्यम्। सत्यप्येवं न कुत्रापि काशिकायां चन्द्रगोमिनामोल्लेखो दृश्यते। 'डा० कीलहार्न' महोदयैः काशिकापरिगृहीतसूत्राणां भाष्योद्भूतसूत्रैस्सह तुलनां कृत्वा प्रकाशितं[1] यदष्टपञ्चाशत्सूत्रेषु भेदो वर्तते। तत्र च दशसूत्राणि श्रीचन्द्रगोमिकृतानि, प्राचीनाष्टसूत्राणि विभज्य सप्तदशसूत्राणां कल्पना, एकोनविंशतिसूत्रेषु नवीनशब्दयोजना, अन्यत्र तु शब्दपरिवर्तनमेव। काशिकायामेतत्सर्वं नावीन्यं संगृहीतम्[2]। अत्र प्राचीनवैयाकरणानां[3] नामोल्लेखस्तन्मतञ्च मिलति येषामस्तित्वमपि तदभावे ज्ञातं न स्यात्। तद्विरचितग्रन्था[4] अपि काशिकारचनाकाले विद्यमाना आसन्नित्यपि काशिकाप्रमाणत एव निश्चेतुं शक्यते। कात्यायनकालादनन्तरं पूर्वञ्च क्रमशो बहवो व्याकरणग्रन्था निर्मिता बभूवुरितिपरम्परायास्समर्थनमपि काशिकातो भवति।

काशिकाया रचयितृविषये चिरकालपर्यन्तं महान् मतभेद आसीत्। सुदूरपूर्वमेषा जयादित्यरचिता, वामनविरचिता, वामनजयादित्यनामकेनैकेनैव विरचिता वेति गृहीतमासीत्। 'कोलब्रूक'महोदयेन काशिका जयादित्यस्य वामनजयादित्यस्य वा कृतिरिति निर्धारितमासीत्[5]। प्रातःस्मरणीया अस्मत्परमगुरवः स्व० श्रीबालशास्त्रिमहाभागाः पूर्वं वामनं जयादित्यञ्चैकमेव स्वीचक्रुः। पश्चानन्तरं प्रथमद्वितीयपञ्चमषष्ठाध्यायानां कर्ता जयादित्योऽन्येषाञ्च वामन इति निर्धारितवन्तः[6]। 'डा०बूहलर'[7] महोदयेन 'ऑफ्रेक्ट'[8] महाशयेन चाद्याश्चत्वारोऽध्याया जयादित्यरचिता अन्तिमाश्चत्वारो वामनकृता इति निर्धारितम्। वस्तुतस्तु प्रथमपञ्चाध्यायेषु तत्र जयादित्यस्यान्तिमत्रिके च वामनस्य रचयितृत्वमुट्टङ्कितम्। परन्तु पतञ्जलिकल्पैरस्मत्परमगुरुचरणैर्यत्प्रथमद्वितीयपञ्चमषष्ठाध्यायानां कर्तृत्वं जयादित्ये विनिवेशितं तत्सकारणमेव भवेदिति विद्वद्भिस्तन्मृग्यम्।

१ Indian Antiquary Vol. XVI, page 184

२ Liebich's edition of Chandra Vyakarana.

३ आपिशलिः, सौनागः, काशकृत्स्नः।

४ त्रिकं काशकृत्स्नम्। त्रिकाः काशकृत्स्नाः।

५ Colebrooke's Sanskrit Grammar. page IX.

६ पण्डितनामके संस्कृतमासिकपत्रे मुद्रितायां स्व० श्रीबालशास्त्रिलिखितायां काशिकाभूमिकायाम्।

७ Journal of the Bombay Branch of the R. A. S. 1877

८ Aufrecht's Catalogus Catalagorum.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जयादित्यवामनोभयनामकः कश्चिदेक एवास्य रचयितेति कथनं युक्तियुक्तं न प्रतिभाति। प्रथमभागे जयादित्यनामोल्लेखे द्वितीये च वामननिर्देशे प्रयोजनाभावात्। प्रातःस्मरणीयैर्भट्टोजिदीक्षितमहोदयैः स्वरचितप्रौढमनोरमायां[1] भारतीयप्राचीनपरम्परामनुसृत्यैव जयादित्यवामनयोर्विभिन्नत्वं स्वीकृतम्। जयादित्यवामनयोरेकग्रन्थकर्तृत्वं सहकारित्वप्रयोजकमुत कस्मिंश्चित्काले जयादित्यप्रारब्धग्रन्थस्य कालान्तरे वामनद्वारा पूर्तिरिति तु नाद्यावधि निश्चयधुरं समारोहति। द्वितीयपक्षस्वीकारे तयोस्समकालिकत्वमपि नापेक्षितम्। तयोर्लेखनविषये मङ्गलाकरणे च समानता केवलं लेखनकलापाटवप्रकाशिकैव। एतावता तयोस्समकालिकत्वं समानधर्मित्वं वा नैव सिद्धं भवति।

काशिकारचनाकालोऽन्यप्राचीनसंस्कृतग्रन्थरत्नानामिव नास्ति निरवधिकः। काशिकायामनुक्तेऽपि नामनि श्रीचन्द्रगोमिनः प्रभावः सुस्पष्टतया सिद्धोऽस्ति। चन्द्रगोमिनः समयः ४७६ ई० वर्षसमीपे विद्वद्भिर्निर्धारित इति काशिकाया ४७६ ई० वर्षतः पश्चात्कालिकत्वन्तु निश्चप्रचम्[2]। एवञ्च काशिकाया विवरणपञ्जिका काशिकान्यासापरनाम्नी जिनेन्द्रबुद्धिनिर्मिता टीका, यस्या अंशमात्रमेव सम्प्रत्युपलभ्यते,* काशिकारचनाकालस्य परोऽवधिरिति निर्विवादम्। जिनेन्द्रबुद्धिसमयो विद्वद्भिः ७५० ई० वर्षात्पूर्वमेव कल्पित[3] इति काशिकारचनाकालः ४७० तः ७५० ई० मध्ये पतति।

श्रीबटुकनाथशर्मश्रीबलदेवोपाध्यायाभ्यां प्रकाशितायां भामहरचितकाव्यालङ्कारभूमिकायां प्रमाणविन्यासपुरस्सरं न्यासग्रन्थानां नानात्वसिद्धेः, भामहेन स्वकाव्यालङ्कारे[4] जिनेन्द्रबुद्धि-

१ 'बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्' (५-४-४२) इत्यत्र एतत्सर्वं जयादित्यमतेनोक्तम्। वामनस्त्वाह—इत्यादि प्रौढमनोरमायाम्।

२ Dr. Belvalkar's Systems of Sanskrit Grammar. Page 58

३ Keith's History of Sanskrit Literature, Dr. Belvalkar's Systems of Sanskrit Grammar. etc.

४ 'शिष्टप्रयोगमात्रेण न्यासकारमतेन वा।' भामहस्य काव्यालङ्कारे।

* वस्तुतस्तु सम्पूर्णो न्यासग्रन्थ इतः पञ्चविंशतिवर्षेभ्यः पूर्वमेव 'वरेन्द्र रिसर्च सोसाइटी राजशाही, बङ्गाल' द्वारा प्रकाशितो वर्तते।

—सम्पादकः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कृतकाशिकान्यासस्यैवोल्लेखः कृत इति हेतोर्जिनेन्द्रबुद्धिसमयो भामहकालात् (७५० ई०) पूर्वमेवेति पाश्चात्यपौरस्त्यविदुषां[1] कल्पना समूलं निरस्ता। अपरञ्च तत्रैव भूमिकायां भामहकाल ईशवीयपञ्चमशतके निर्धारितः। तस्य च तथात्वे जिनेन्द्रबुद्धेर्न्यासस्य भामहेनोल्लेखः कृत इति नैव वक्तुं शक्यते। यस्मादेवं स्वीकारे जिनेन्द्रबुद्धिसमयश्चन्द्रगोमिकालादपि प्राचीनो भविष्यति, यस्य साहाय्यं स्वीकृत्यैव काशिकारचना जाता, यस्याश्च व्याख्याने जिनेन्द्रबुद्धिना काशिकान्यासनाम्नी टीका लिखिता।

चीनयात्रिण 'इत्सिङ्गस्य' लेखैः[2] काशिकानिर्माणकालस्य ४७० तः ७५० ई० पर्यन्तं त्रिशतवर्षविस्तीर्णोऽवधिः किञ्चित्सङ्कीर्णो भवति। प्रथमं तावत् तस्य लेखकालात् ४० वर्षपूर्वं ६५० ई० तमे वर्षे वाक्यपदीयकारस्य भर्तृहरेर्मृत्युरभूत्। द्वितीयं खलु काश्मीरनिवासिनो व्याकरणविषयकवृत्तिसूत्रनामकग्रन्थरचयितुर्जयादित्यस्य मरणं तस्य समयतस्त्रिंशद्वर्षपूर्वं ६६० ई० तमे वर्षे बभूवेति। एतेन भर्तृहरिजयादित्यौ समकालिकौ जातौ। परञ्च काशिकायां वाक्यपदीयस्य नामोल्लेखो वर्तते[3]। तेन जयादित्यो भर्तृहरेरुत्तरावस्थायां समकालिकः सम्भवति। 'प्रो० मैक्समूलर'महोदयेन वृत्तिसूत्रमेव काशिकेति गृहीत्वा जयादित्यस्य समयः ६६० ई० समीपे निर्धारितः[4]। परञ्च 'इत्सिङ्ग'लिखितवृत्तिसूत्रवर्णनेन[5] काशिकायास्तस्माद्भिन्नत्वं सुस्पष्टं भवति। 'प्रो० मैक्समूलर'महोदयस्य काशिकाया वृत्तिसूत्रत्वेन ग्रहणं भ्रमात्मकमेव। तेन काशिकारचनाकालः ६२५ तः ७५० ई० मध्य एव सम्भवति, यदि जिनेन्द्रबुद्धेर्यथोक्तसमयो गृह्येत।

१ Dr. Belvalkar's Systems of Sanskrit Grammar, Page 38.

२ A record of Buddhist religion as practised in India and the Malay Archipelago. By Itsing. (Takakusu Translation page lvii)

३ 'शिशुक्रन्दयमसभद्वन्द्वेन्द्रजननादिभ्यश्छः' (४-३-८८) इत्यत्र 'तदित्येव'''श्येनकपोतीयः। शब्दार्थसम्बन्धीयं प्रकरणम्। वाक्यपदीयमित्यादि'

४ Indian Antiquary Vol. 9, 1880. Page 305.

५ A record of Buddhist religion as practised in India and Malay Archipelago by Itsing. (Takakusu Translation, page 175)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कल्हणविरचितायां राजतरङ्गिण्यां राज्ञो जयापीडस्य तन्मन्त्रिणो वामनस्य वर्णनमस्ति। अयं राजा जयापीडः कर्कोटवंशीयः ७५१ ई० वर्षे काश्मीरराज्येऽभिषिक्तः । एकाधिक-त्रिंशद्वर्षाणि यावदनेन ७८२ ई० वर्षपर्यन्तं[१] राज्यधुरोढा । निर्धारितसमयदृष्ट्या जयादित्यस्य जयापीडेन सह, वामनस्य च मन्त्रिणा वामनेन साकमेकताप्रतिपादनमसफलमेव भवति। अपरञ्च राजतरङ्गिण्यां जयापीडो महर्षिपतञ्जलेर्महाभाष्यस्य टीकाकार उक्तो न तु पाणिनेर-ष्टाध्याय्याः[२] ।इदं सम्भवति यदयं मन्त्री वामनः काव्यालङ्कारसूत्रस्य तद्वृत्तेश्च कर्ताऽऽलङ्कारिको भवेत् । परञ्च इत्सिङ्गनिर्दिष्टो जयादित्यः खलु जयापीडविनयादित्यतो भिन्न एव ।

संस्कृतवाङ्मयगवेषणाकार्यारम्भकालादेव गवेषणाकुशलैर्विद्वद्भिः काशिकाकालनिर्णये स्वविचारधारामनुसृत्य तद्रचनाया विभिन्नसमया निर्धारिताः । परञ्च नाद्यावधि तस्याः काल इदमित्थंरूपेण निर्णीतः । 'प्रो०[३]वोथलिङ्क'महोदयेन राजतरङ्गिणीवर्णनमनुसृत्य वामनो जयापीडमन्त्रीति गृहीत्वा काशिकाया निर्मितिरीशवीयाष्टमशतके जातेत्युक्तम् । 'विल्सन'[४]-महाशयेन राजतरङ्गिणीवर्णितो वामन एव काव्यालङ्कारसूत्राणां तद्वृत्तेश्च रचयितेति प्रतिपादितम् । 'डा०[५]केपेलर'महाभागेन विल्सनमतखण्डनपुरस्सरं राजतरङ्गिण्युक्तो वामन एव वैयाकरणो वामन इति विचार्यास्य कालः १००० ई० समीपे वर्णितः । 'प्रो०[६]वेबर' विदुषा स्व० श्रीबालशास्त्रिपादैर्वामनस्य समयस्त्रयोदशशतक ईशवीये निर्धारित इति कथितम् । 'प्रो० गोल्डस्टूकर'मतेन काशिकारचनाकालः[७] श्रीभट्टोजिदीक्षितकाल एव । [८]प्राचीनपरम्परायाञ्च काशिकाकारो भट्टोजिदीक्षितस्य गुरुरासीदिति कथ्यते ।

१ River of Kings. Appendix A. By R. S. Pandit.

२ भाष्यव्याख्याक्षणे श्लोकैर्वैचक्षण्यहृतैः कृतः । सोऽयं तस्य विपर्यासो बुधैरेव प्रवर्तितः ॥ River of Kings, श्लोक 636. By R. S. Pandit.

३ Böthlingk's Introduction to his edition of Panini's Grammar. Page liv.

४ Asiatic Researches. Vol. XV. page 55.

५ Cappellar's Introduction to his edition of काव्यालङ्कारवृत्ति (Jena 1875.)

६ Weber's History of Sanskrit Literature. Page 226.

७ Goldstücker's Panini. Page 89.

८ वेङ्कटेश्वरमुद्रणालये मुद्रितायां सिद्धान्तकौमुद्यां शेषवेङ्कटाचलशास्त्रिलिखिते लघुत्रि-मुनिकल्पतरुनामके प्रस्तावनाविशेषे—'काशिकाकृतशिष्यः'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जयादित्यवामनजीवनचरितविषये नाद्यावधि विशिष्टं ज्ञानं जातम् । जैनपुस्तकेषु तयोर्जैनधर्मावलम्बित्वं वर्णितं वर्तत इति दन्तकथामनुसृत्यैव[1] कैश्चित्तयोर्जैनधर्मित्वमुपवर्ण्यते, परन्तु पाण्डवपुराणादिजैनेतिहासग्रन्थेषु वान्यत्र कुत्रापि तयोर्जैनत्वेन वर्णनं[2] न दृश्यते। अथ च यदि तौ जैनधर्मावलम्बिनावभविष्यतां तदा काशिकायामादावन्ते मध्ये वा कुत्रापि तीर्थङ्करार्हतादिशब्दानां प्रयोगमवश्यमेवाकरिष्यताम् । तदभावान्नेदं मतं विचारार्हम् ।

केचन [3]विद्वांसस्तयोर्बौद्धधर्माश्रयित्वं कारणत्रयेण साधयन्ति । प्रथमं तावद् वैदिकधर्मानुयायिमतानुसारमादावन्ते मध्ये च मङ्गलमावश्यकम् । काशिकायान्तदभावात्तयोर्बौद्धत्वम् । द्वितीयं खलु काशिकायामुदाहरणे [4]चार्वाकमतस्योल्लेखः । तृतीयञ्च पाणिनीयाष्टाध्यायीसूत्रेषु कृतः सूत्रभेदः, यः खलु वैदिकधर्माचारविचारपरम्परायां निषिद्ध इति ।

यद्यपि हेतव इमे हेत्वाभासा एव, तथापि गवेषणाकुशलिपदभाजो विद्वांसो[5] जयादित्यवामनौ बौद्धधर्मावलम्बिनावेवेति कथयन्ति लिखन्ति च । परं तन्न समीचीनम् ।

महर्षिपञ्जतलिना ग्रन्थस्यादावन्ते मध्ये च मङ्गलं कर्त्तव्यतयोपदिष्टम्[6] । महाभाष्यकारस्य पतञ्जलेर्व्याकरणविषयप्रतिपादकाभ्यां काशिकाकाराभ्यामेव कृतोऽनुशासनभङ्गः सदोष अदोषो

१ पण्डितमासिकपत्रे स्व०श्रीबालशास्त्रिलिखितायां काशिकाभूमिकायाम् ।

२ मुम्बापुरीस्थकोर्टप्रिंटिङ्गमुद्रणालये प्रकाशितायाः लघुकौमुद्याः श्रीरणछोडजीशास्त्रिलिखितायां भूमिकायाम् ।

३ Macdonell, Keith, Dr. Belvalkar etc.

४ 'सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषु नियः' (१-३-३६) इत्यत्र ''णीञ् प्रापणे''नयते चार्वी लोकायते । चार्वी बुद्धिः, तत्सम्बन्धादाचार्योऽपि चार्वी स लोकायते शास्त्रे पदार्थान्नयते, उपपत्तिभिः स्थिरीकृत्य शिष्येभ्यः प्रापयति, ते युक्तिभिः स्थाप्यमानाः सम्मानिताः पूजिता भवन्ति ।'' काशिका ।

५ Macdonell, Keith, Dr, Belvalkar etc.

६ 'मङ्गलादीनि हि शास्त्राणि प्रथन्ते वीरपुरुषाणि च भवन्ति, आयुष्मत्पुरुषाणि च, अध्येतारश्च सिद्धार्था यथा स्युः ।' महाभाष्य (१-१-१) । भूवादिसूत्रे च 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते, वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति ।'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वेति विचारणीयो विषयः। काशिकायाः पदमञ्जरीनाम्नी टीका वर्तते। या खलु हरदत्तविदुषा विरचिता। हरदत्तस्यापि समयो नाद्यापि स्थिरीभूतः। परन्तु स सम्भवतः १००० ई० समीपेऽभूदित्यनुमीयते। तेन पदमञ्जर्यां काशिकां मङ्गलरहितां दृष्ट्वा तद्रचयितारौ वैदिकधर्मावलम्बिनावेवेति मनसि निधाय मङ्गलाकरणस्य सप्रमाणं सुचारु समर्थनं[1] कृतमस्ति। अन्यच्च, बहवो वैदिकधर्मानुयायिनां ग्रन्था मङ्गलरहितास्सन्ति[2]। परन्तु बौद्धग्रन्थेषु प्रायः सर्वत्रैव मङ्गलदर्शनात्[3] काशिकायाञ्च मङ्गलाभावात् कथं तद्रचयितारौ बौद्धधर्मानुयायिनाविति कथ्यते। चार्वाकग्रन्थेषु मङ्गलादर्शनात् काशिकायां चार्वाकोल्लेखाच्च तयोश्चार्वाकमतानुयायित्वं यथाकथञ्चित्कल्पितुं शक्यते, न तु बौद्धधर्माश्रयित्वम्। परञ्च तत्कल्पनमपि न युक्तियुक्तम्। यतः काशिकायां चार्वाकोल्लेखस्तस्मिन् काले चार्वाकाणां स्थितिमेव केवलं प्रमाणयति। काशिकाकर्त्रोः स्वकल्पितबौद्धधर्मानुयायित्वसाधनधिया केषाञ्चित् चार्वपदेन बुद्धदेवस्य ग्रहणम्, अत्र चार्वशब्दो बौद्धाचार्यवाचक[4] इत्यादि कथनमपि न युक्तियुक्तं प्रतिभाति। यतः काशिका व्याकरणस्य ग्रन्थविशेषो न तु दर्शनशास्त्रस्य धर्मशास्त्रस्य वा। तत्रोदाहरणेषु प्रयुक्तेभ्यः शब्देभ्यो व्याकरणग्रन्थरचयित्रोस्तद्धर्मानुयायित्वसाधनप्रयासोऽनुपपन्न एव। अत्रैतद्विचारार्हं यदेतत्सदृशान्युदाहरणान्यतिन्यूनतराणि, परञ्च वैदिकशब्दा वैदिकविधयश्च प्रायः प्रत्येकपृष्ठ उदाहरणत्वेनोल्लिखिताः सन्ति। अन्यच्च, चन्द्रगोमिरचिते व्याकरणे वैदिकशब्दानां कुत्रापि विचारो न कृतः। काशिकायान्तु वैदिकशब्दानामपि साधुत्वं साधितम्। अत्रैतदपि विचारणीयं यद् बौद्धग्रन्थकारा बौद्ध-

१ "इष्टदेवनमस्कारः कार्यः सन्नेह किं कृतः। वृत्तौ सूत्रे तथा भाष्ये वार्तिके च तदुच्यते॥ मनसा वचसा च कर्मणा कृत एवाऽयमिहानिवेशितः। नहि दर्भपवित्रपाणिताद्यपरं मङ्गलमत्र कीर्त्यते॥" पदमञ्जरी।

२ यथा—वात्स्यायनरचितं न्यायभाष्यम्।

३ "नमस्तस्मै भगवतेऽर्हते सम्यक्संबुद्धाय। भगवन्तं जगद्वन्द्यमभिवन्द्य तथागतम्। बालावबोधनं बिन्दुं चन्द्रसिन्धौ करोम्यहम्॥" काश्यपरचिते बालावबोधे।

४ पण्डितनामके संस्कृतमासिकपत्रे मुद्रिताशं स्व० श्रीबालशास्त्रिलिखितायां काशिकाभूमिकायां द्रष्टव्यम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

धर्मस्वीकारानन्तरं स्वनामपरिवर्तनं कुर्वन्तो दृश्यन्ते। परञ्च जयादित्यवामनसंज्ञकौ काशिकाकारौ सनातनधर्मानुयायिषु प्रसिद्धाभ्यां जयादित्यवामनशब्दाभ्यामात्मनो वैदिकधर्मावलम्बित्वमेव प्रकटयतः। चन्द्रगोमीव जिनेन्द्रबुद्धिरपि बौद्ध इति निर्विवादम्। यतो जिनेन्द्रबुद्धिना स्पष्टमेवात्मनो बौद्धधर्माश्रयित्वमङ्गीकृतम्[1]। व्याकरणविषयकस्वमतानुकूलविचारयुक्तेऽपि चन्द्रगोमिनि, तन्निर्दिष्टमार्गावलम्बनं कृत्वापि काशिकायां तन्नामानुल्लेखो भिन्नधर्माश्रयित्वाद् द्वेषजन्य एवेति भाति। न कोऽपि समानधर्मी एवं कुर्यात्।

यदि काशिकायां सूत्रभेदं दृष्ट्वा तद्रचयित्रोर्विरुद्धधर्माश्रयित्वमनुमीयते चेन्महाभाष्ये कात्यायनवार्तिके च तत्सत्त्वात् तद्रचयितृधर्मविषयेऽपि कथं कुकल्पनं न क्रियते। नहि सूत्रभेदः सर्वत्र दोषाय[2]।

काशिकानामतोऽपि[3] तद्रचयित्रोर्जयादित्यवामनयोः सनातनधर्मानुयायित्वमेवेङ्गयते। यतः काशी सनातनधर्मावलम्बिनामेव तीर्थस्थानम्, न तु बौद्धानां जैनानां चार्वाकाणां वेत्यलमतिविस्तरेण।

आश्विनशुक्लप्रतिपदि रसवियदभ्राक्षिसम्मिते वर्षे।
लेखोऽयं पूर्तिमगात् श्रियोऽविलम्बावलम्बलाभेन॥

---

१ 'इति श्रीबोधिसत्त्वदेशीयाचार्यजिनेन्द्रबुद्धिपादविरचितायां काशिकाविवरणपञ्जिकायां प्रथमोऽध्यायः।'

२ 'अच उपसर्गात्तः' (७-४-४७) इति सूत्रभाष्ये महर्षिपतञ्जलिनोक्तम्—'सूत्रभेदं तमुपाचरन्ति यत्र तदेवान्यत् सूत्रं क्रियते भूयो वा, यदि तदेवोपसंहृत्य क्रियते नासौ सूत्रभेदः।'

३ 'म० म० पं० गोपीनाथ कविराज एम्० ए०' मतम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

शाकुन्तलीयम् ।

श्रीमुकुन्दशास्त्री खिस्ते ।

उद्वाहसमये शकुन्तला पञ्चविंशतिवर्षदेशीयासीदिति केषाञ्चिदिदानीन्तनानां कृतविद्यानां मतम् । तावद्वयःपर्यन्तं कन्यानामनूढात्वेऽपि समाजस्य न कापि हानिरिति ते समाजमुपदिशन्ति । वस्तुतो विचार्यमाण उद्वाहसमये शकुन्तलाया वयःपर्यन्तमाधुनिकीनां राजन्यतनुजानामनूढात्वे न कापि हानिरेतावदेव सिद्ध्येत् । यतः शकुन्तला राजन्यवंशीयासीत् । द्विजातिषु दारकाणामुपनयनकालो यथा पृथक् पृथङ् निर्दिष्टस्तथा तेषु दारिकाणामुद्वाहकालोऽपि भिन्न एव भवितुमर्हति । शकुन्तलाया विवाहसमये कियद्वय आसीदिति शाकुन्तलीयवाक्यैर्विविच्यते—

"राजा—अये, एतास्तपस्विकन्यकाः स्वप्रमाणानुरूपैः सेचनघटैर्बालपादपेभ्यः पयो दातुमित एवाभिवर्तन्ते ।"

अत्र राज्ञा शकुन्तलां प्रियंवदामनुसूयाञ्चोद्दिश्य 'तपस्विकन्यकाः' इति प्रयुक्तं न तु तपस्विस्त्रियः, अतः पूर्णावस्थामापन्नास्ताः स्त्रियो नेति सिद्ध्यति । 'स्वप्रमाणानुरूपैः सेचनघटैः' इति कथितम्, अनेन परिपूर्णावस्थाभिर्नायिकाभिरानीयमानजलकलशतुल्यास्ते घटा नासन्; किन्तु कन्यकादेहानुरूपा अल्पाः कलश्य आसन्निति सिद्ध्यति । अन्यथा 'स्वप्रमाणानुरूपैः' इति विशेषणं व्यर्थं स्यात् । 'वपुरभिनवमस्याः पुष्यति स्वां न शोभाम्' । अत्राभिनवमिति वपुषो विशेषणं तेन शकुन्तलाया बाल्यावस्थासमाप्तिस्तत्काल एव जातेत्यनुमीयते । रजोदर्शनानन्तरं बहुकाले व्यतीते 'अभिनवम्' इति वपुषो विशेषणं भवितुं नार्हति ।

"शकुन्तला—सखि अनुसूये! अतिपिनद्धेन वल्कलेन प्रियंवदया नियन्त्रितास्मि । शिथिलय तावदेतत् । प्रियंवदा—(सहासम्) अत्र पयोधरविस्तारयितृ, आत्मनो यौवनमुपालभस्व ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रियंवदया, प्रतिदिवसं धार्यमाणा शकुन्तलायाः कञ्चुलिका परिधापिता। तस्या एव शिथिलीकरणाय शकुन्तलयाऽनुसूया प्रेरिता, अन्यस्या धारणाय न। कञ्चुलिकायाः शिथिलीकरणं नाम ग्रन्थिशिथिलीकरणमेव, न तु बाह्वोरुपरितनवस्त्रस्य। एतदत्र सूक्ष्मरीत्याऽऽकलनीयं यच्छकुन्तलाया बाहुलताप्रदेशः पूर्ववदेवासीत्, स्तनप्रदेशो यौवनावस्थया समन्ताद् वृद्धिं गच्छन्नभिलक्ष्यते स्म। बाहुलताप्रदेशस्य वृद्धिं विना स्तनप्रदेशमात्रस्य वृद्धिर्नूतनयौवनावस्थायामेव भवितुमर्हति। या स्त्री विंशतिवर्षवयस्का पञ्चविंशतिवर्षवयस्का वा तस्या दिनचतुष्टयात्पूर्वं या कञ्चुलिका देहानुरूपा तस्या एवाकस्मादतिदार्ढ्यावस्थानं न सम्भवति। यथा गोमहिषप्रभृतीनां जन्तूनां प्रसूतिकाले निकटे स्तनप्रदेशभागमात्रं वृद्धिं गच्छदवलोक्यते तथैवाचिरोपनतपुष्पाणां कन्यकानां स्तनप्रदेश एवाभिवर्द्धते। 'नवकुसुमयौवना वनज्योत्स्ना' अत्र श्लेषवशात् कुसुमशब्दस्य ऋतुपुष्पवाचकत्वेन शकुन्तलाया यौवनं नूतनरजोदर्शनेनैवेति 'नवकुसुमयौवना' विशेषणेन दर्शितं भवति।

"राजा—(सर्वा विलोक्य) अहो समानवयोरूपरमणीयं सौहार्दं भवतीनाम्।

शकुन्तला—किन्नु खल्विमं प्रेक्ष्य तपोवनविरोधिनो विकारस्य गमनीयास्मि संवृत्ता।"

समानावस्थापन्नानि समानाकृतिमन्ति प्रियंवदानुसूयाशकुन्तलानां रूपाणि विलोक्य दुष्यन्तस्य कामविकारः शकुन्तलाविषयक एव नेतरयोः, अनेनैतदनुमीयते यदितरयो रजोदर्शनं नाभूत्। रजोदर्शनानन्तरमेव कामवासनायाः प्राबल्यं न तु तत्पूर्वं कदाचन सम्भवति। आहारनिद्रादयः पशूनां मानवादीनाञ्च समानाः। पशुमानवपदेन जरायुजा गृह्यन्ते। गवादि पशुजातीयानां स्त्रीणामपि रजोदर्शनानन्तरमेव कामविकारः समुत्पद्यते, स च तासामाक्रोशनैर्व्याकुलतया विवक्षितचेष्टाभिश्चानुमीयते। इदमत्र तात्पर्यम्, तिसृणामवस्थायाः साम्येऽप्येका ऋतुमत्यासीदितरयो रजोदर्शनं नाभूत्। अनेन यस्मिन् काले दुष्यन्तस्य दर्शनमभूत्तस्मिन् समये शकुन्तलाया वयो द्वादशसंवत्सरं त्रयोदशसंवत्सरं वा, तदपेक्षयाधिकं नासीदिति सिद्ध्यति। सुश्रुतप्रभृतिप्राचीनायुर्वेदग्रन्थेषु रजोदर्शनस्य साधारणरीत्या द्वादशवर्षकाल एव निगदितः। कन्या स्वस्था चेद् द्वादशवर्षात्पूर्व्वमपि रजोदर्शनं भवितुमर्हति। द्वादशवर्षात्पूर्वं कन्या गर्भमपि धत्ते, इतिवृद्धवाग्भटेषु कथितम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कन्याया विवाहकालः

साम्प्रतं ब्राह्मणादिवर्णानामाचारेषु धर्मप्राधान्यं विलीय कामप्राधान्यस्य प्राबल्यं प्रतिदिनं प्रवर्धमानमवलोक्यते । कियदवध्यनूढायाः कन्यायाः पितृगृहे स्थितिः शास्त्रसम्मतेत्येतत् कस्यापि विचारपथं नारोहति । उत्पन्नयौवनास्वप्यनूढासु कन्यासु दोषोद्गमशङ्कया तन्मूलकस्य समाजविघातकस्य वर्णसङ्करस्य सम्भावनया च द्विजातिकन्यानामुद्वाहमुद्दिश्य धर्मशास्त्रनिर्णयस्य लोकेषु प्रकाशनं सातिशयमपेक्ष्यते । द्विजातिकन्यानां विवाहकालनिश्चयाय द्विजातिदारकाणामुपनयनकालस्य ज्ञानं प्रथममावश्यकम् ।

"गर्भाष्टमेऽब्दे कुर्वीत ब्राह्मणस्योपनायनम् ।
गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ॥ ३६ ॥
ब्रह्मवर्चसकामस्य कार्यं विप्रस्य पञ्चमे ।
राज्ञो बलार्थिनः षष्ठे वैश्यस्येहार्थिनोऽष्टमे ॥ ३७ ॥"

इत्यादिवचनानि मनुस्मृतौ समुपलभ्यन्ते । अस्मिन्नुपनयनप्रकरण एवाग्रतो गत्वा अधस्तनं वचनं दृश्यते—

"अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥ ६६ ॥"

जातकर्माद्यारभ्योपनयनान्ताः सर्वे संस्काराः शरीरशुद्ध्यर्थं कन्यानामपि सम्पादनीया इत्यस्य वचनस्याभिप्रायो दृश्यते । अनेन वचनेन कन्यानामुपनयनसंस्कारस्यापि प्राप्तत्वादनन्तरमेव—

"वैवाहिको विधिः स्त्रीणां संस्कारो वैदिकः स्मृतः ।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिक्रिया ॥"

इतिवचनं मनुनोपन्यस्तमस्ति । विवाह एव स्त्रीणामुपनयनस्थानापन्नो वैदिकः संस्कारः । पतिसेवैव तासां गुरुकुलस्थितिः । गृहकर्मैव तासामग्निपरिचर्या । उपनीतानां दारकाणां वेदाध्ययनार्थं गुरुकुलवसतेरग्निपरिचर्यायाश्चावश्यकर्तव्यतयोपनयनस्थानापन्नोद्वाहेन संस्कृतानां स्त्रीणामपि गुरुकुले वसतिरग्निसेवा च सम्प्राप्ता । सा ताभिः कथं विधातव्येत्येतदुपरितनस्य वचनस्योत्तरार्धे दर्शितमस्ति । द्विजकुलोत्पन्नानां पुंसां द्विजातित्वसिद्ध्यर्थं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यथोपनयनसंस्कार आवश्यकस्तथा द्विजातिकुलोत्पन्नानां स्त्रीणामपि द्विजातित्वसिद्ध्यर्थं विवाहसंस्कार आवश्यकः। 'अमन्त्रिका'इत्यादिवचने यथाकालमिति पदं स्त्रीपुंसयोर्जात-कर्मादिसंस्काराणां कालस्य सामान्यमिव पुंसामुपनयनस्य तथा स्त्रीणामुद्वाहस्य च कालसामान्यं द्योतयति। तस्माद् भगवतो मनोर्वचनानुसारं विप्रकन्याया विवाहकालो गर्भाष्टमो वर्षः, क्षत्रकन्याया गर्भादेकादशः, वैश्यकन्याया गर्भाद् द्वादशवर्षो निश्चितो भवति। काम्यकाल-मुद्दिश्यैवं व्यवस्थापयितव्यम्, जामात्रा ब्रह्मवर्चसेन सम्पन्नेन भवितव्यमित्यभिलाषुकेण विप्रेण स्वीयकन्याया गर्भात्पञ्चमेऽब्दे पाणिग्राहयितव्यः। जामातुः सातिशयं बलमिच्छता राजन्येन गर्भषष्ठे वत्सरे कन्या दातव्या। वाणिज्ये जामातुरुत्कर्षं वाञ्छता वैश्येन गर्भाष्टमे कन्याया उद्वाहः सम्पादनीय इति मनोरभिप्रेतं प्रतिभाति। मनुस्मृतेः पञ्चमेऽध्याये लभ्यमेतद्वचनम्—

"अनृतावृतुकाले च मन्त्रसंस्कारकृत्पतिः।"

इति सर्वासु द्विजातिस्त्रीषु सामान्येन समन्वेति। मन्त्रसंस्कारकृदिति पदं पत्युर्विशेषणम्। पतिर्जायां वारद्वयं समन्त्रकं संस्करोति, प्रथममृतोः प्रागथ ऋतौ। अस्यायमर्थो यद् ऋतोः प्राक् पतिर्जायां समन्त्रकं गर्भाधानेन संस्करोति। अस्मिन् मनोर्वचनेऽक्षिनिक्षेपे सर्वासां द्विजातिकन्यानामृतोः पूर्वमेव विवाहोऽभिप्रेत इति प्रतिभाति।

शाकुन्तलीयसंविधानकेषु काचनाशङ्का

स्वकीयमाश्रममागतेन दुष्यन्तेनानुयुक्ता शकुन्तलोत्तरयति—

"कण्वस्याहं भगवतो दुष्यन्त दुहिता मता।
तपस्विनो धृतिमतो धर्मज्ञस्य महात्मनः॥" इति।

ततो दुष्यन्तः संशेतेऽनुयुनक्ति च—

"ऊर्ध्वरेता महाभागे भगवाँल्लोकपूजितः।
चलेद्धि वृत्ताद्धर्मोऽपि न चलेत् शंसितव्रतः॥" इति।

कथानकस्यैतदेव रूपं महाभारते दृश्यते, तदेव शाकुन्तलेऽपि समनुकृतमस्ति—

"तथा हि भगवान् काश्यपः शाश्वते ब्रह्मणि वर्तते, इयञ्च वां सखी तदात्मजेति कथमेतत्?"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतद् वाक्यं कालिदासमतेऽपि कण्वस्य शाश्वतं ब्रह्मचर्यं पोषयति ।

अनुसूया शकुन्तलां प्रति—"त्वत्तोऽपि तातकण्वस्याश्रमवृक्षाः प्रियतरा इति तर्कयामि, येन नवमालिकाकुसुमपरिपेलवापि त्वमेतेषामालवालपरिपूरणे नियुक्ता" ततो राजा वदति—"कथमियं सा कण्वदुहिता । असाधुदर्शी तत्र भगवान् काश्यपो य इमामाश्रमधर्मे नियुङ्क्ते ।"

अत्र कण्वस्यापत्योत्पत्तेरसम्भवेन राजा न विस्मयते, अपि तु कोमलायाः शकुन्तलायाः पादपसेचने नियुक्तिं वीक्ष्य विस्मयते । इयं कण्वस्यैव तनुजेति निर्णीयैवात्र व्यवहरति । ततो राज्ञो मनसि सन्देहे समुत्पन्ने स्वगतं चिन्तयति—

"अपि नामेयं कुलपतेरसवर्णक्षेत्रसम्भवा स्यात् ? अथवा कृतं सन्देहेन ।"

अत्र राजा शकुन्तलायाः कण्वस्यात्मजात्वमुद्दिश्य नैव संशेते, केवलमियदेव न; अपि तु कण्वादसवर्णायां स्त्रियां शकुन्तलायाः सम्भवमनुमिनोति । सवर्णायां स्त्रियां सत्यामपि शकुन्तला त्वसवर्णायां समुत्पन्नेति निश्चिनोति ।

"ततश्चाद्य यदि तातः सन्निहितो भवेत्तर्हि जीवितसर्वस्वं वितीर्याप्यतिथिं कृतार्थयेत् ।" इति सखीभ्यां निगदिते राजा कथयति—"भगवान् काश्यपः शाश्वते ब्रह्मणि वर्तते । इयञ्च वां सखी तदात्मजेति कथमेतत् ?"

अत्र दुष्यन्तो भगवन्तं कण्वमुनिमूर्ध्वरेतसं मत्वा शङ्कते । 'शाश्वते ब्रह्मणि वर्तते' इति पदस्य यावज्जीवं ब्रह्मचर्यपालक इत्यर्थो भवति ।

'वेलोपलक्षणार्थमादिष्टोऽस्मि तत्रभवता प्रवासादुपावृत्तेन काश्यपेन' इति शिष्यः स्वगतमेवं विचिन्त्य बहिरागत्य तत्कालजातं प्रभातकालं विलोकयन् पश्चिमभागे चन्द्रोऽस्तं गच्छति, पूर्वस्यां दिश्यरुणपुरःसरस्य रवेरुदयो भवतीत्यव्यक्तं सम्भाष्य 'यावदुपस्थितां होमवेलां गुरवे निवेदयामि' एवमुक्त्वा गुरोः समीपं गच्छति । अत्रोभाभ्यां वाक्याभ्यां काश्यपो गुरुश्चैकैव व्यक्तिरिति सिद्ध्यति । अन्यच्च कण्वश्च प्रत्यहं सूर्योदयानन्तरं जुहोति स्म । स चाहिताग्निरुदितपक्षीयश्चासीदित्यपि सिद्ध्यति । तदग्रे कण्वमुनिः स्नात्वाऽऽगत्य पतिगृहं गच्छन्तीं शकुन्तलां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

दृष्ट्वा कीदृशी मनसो वृत्तिर्बभूवेति वर्णयति—

"वैकल्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथन्नु तनयाविश्लेषदुःखैर्नवैः ॥"

अस्मिन् श्लोकार्द्धे गृहिणोऽरण्यौकस इति पदद्वयं परस्परं विरुद्धावस्थां द्योतयदुपन्यस्तम्। 'अरण्यौकसः' इति पदेन भगवान् कण्वो गृहस्थाश्रमी नासीदपि तु वानप्रस्थाश्रमीति सिद्ध्यति। पत्युर्गृहगमनसमये प्रणमन्त्यै शकुन्तलायै शुभाशिषं वितीर्य कण्वः कथयति— 'वत्से, इतः सद्यो हुताग्नीन् प्रदक्षिणीकुरुष्व' इत्युक्त्वा तेन ऋग्वेदच्छन्दसा याऽऽशीः प्रदत्ता—

"अमी वेदीं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः।
अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥"

अत्र वैतानाग्निपदेनाहिताग्नीनामग्नित्रयस्य ग्रहणं भवति। प्रथमं होमस्य वेलोपलक्षणार्थं कण्वेनादिष्टः शिष्यो होमवेलामुपलक्ष्य गुरुं कथयति। ततश्च कण्वोऽपि स्नात्वाऽऽगत्याग्निं जुहोति। ततश्च हुतानग्नीन् प्रदक्षिणीकुरुष्वेति शकुन्तलां कथयति। ते चाग्नय आहिताग्नीनामेवेति दर्शितं ग्रन्थकारेण। अनेन भगवान् कण्वः सपत्नीक आहिताग्निश्चासीदिति स्पष्टं प्रतीयते।

तृतीयाङ्कस्यारम्भे 'ततः प्रविशति यजमानशिष्यः' इत्युक्तम्। अत्र यजमानपदेन कण्व एव गृह्यते। यस्य यज्ञेऽधिकारः स एव यजमान इति संज्ञां लभते, यजमानश्च सपत्नीकोऽवश्यं भवति 'यावदिमान् वेदिसंस्तरणार्थं दर्भानृत्विग्भ्य उपहरामि' एतद्वाक्यं शिष्येणोक्तम्। यदा यजमानः कण्वः प्रवासार्थं गतस्तदा शिष्यो गुरोः समीपं दर्भान्नयामीत्युक्त्वा ऋत्विग्भ्य उपहरामीत्युक्तवानतो यजमान ऋत्विजश्च पृथग्भूता-इति सिद्ध्यति। अयं यजमानस्य शिष्यः ऋत्विजां न।

"तत्रभवतः कण्वस्य महर्षेरसान्निध्याद्रक्षांसि न इष्टिविघ्नमुत्पादयन्ति, तत्कतिपयरात्रं सारथिद्वितीयेन भवता सनाथीक्रियतामाश्रमः" इति।

अत्र ऋषिद्वयमाश्रमवासिनां सर्वेषामृषीणां सन्देशं राज्ञे निवेदयति। सेयमिष्टिर्महर्षेः कण्वस्यैवेति प्रतिभाति। अग्रे च 'अहमपि वैतानिकं शान्त्युदकमस्यै गौतमीहस्ते विसर्जयिष्यामि' इत्येषा शिष्योक्तिः। इष्टेरवसानावसरेऽध्वर्युणा होतृषदनोपयुक्ता दर्भा वेद्यां वितन्यन्ते। तदुपरि निहितो यजमानस्याञ्जलिरध्वर्युणा प्रणीतोदकेन पूर्यते। एतदेव प्रणीतोदकमुद्दिश्य वैतानिकशा- १४३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

न्त्युदकशब्दः प्रयुक्तोऽस्ति । अवसितायामिष्टौ यज्ञमण्डपस्था यजमानेन कुशाग्रैः शान्त्युदकेन प्रोक्ष्यन्ते । तदेवेष्टरवभृतमित्युच्यते । समाप्तायामिष्ट्यां राजा वदति—

"क्व नु खलु संस्थिते कर्मणि सदस्यैरनुज्ञातः श्रमक्लान्तमात्मानं विनोदयामि ।"

अत्र राजा 'सदस्यैरनुज्ञातः' इत्येव वदति । यजमानेनानुज्ञात इति न । यतो यजमानः कण्वस्तत्र सन्निहितो नासीत् ।

"पौरव, स्वयं मम शरीरवृत्तान्तोपलम्भायार्या गौतमीत एवागच्छति । तद् विटपान्तरितो भव ।"

उपरितनं वाक्यं शकुन्तला दुष्यन्तं वदति । एतेन गौतमी शकुन्तलाया मान्या काचन स्त्र्यासीदिति सिद्ध्यति । सा च कण्वस्य पत्नी, इत्येव कालिदासोऽत्र सूचयति । गौतम्या सह महर्षेः कः सम्बन्ध इत्यस्य निर्णयः शाकुन्तलं दृष्ट्वा भवितुं नार्हति । दाक्षायण्यदितिश्च यथा मारीचर्षेः पत्न्यावास्तां तथैव गौतमी कण्वस्य पत्नी भवेदिति कालिदासो दर्शयति । गौतमी विधवा शकुन्तलायाः पितृभगिन्यासीदिति केचिद् वदन्ति । परन्तु तत्र प्रमाणं नाटके कुत्रापि नावलोक्यते ।

उपरितनवाक्येषु विविच्यमानेषु शाकुन्तले नाटके कालिदासो महर्षिं कण्वं क्वचिद् गृहस्थं क्वचिद् वानप्रस्थं क्वचिन्नैष्ठिकब्रह्मचारिणं सूचयति । सुधीभिर्निर्णयो विधेय इति मनीषया स्वकीयाऽऽशङ्का प्रकाशितेति शम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रजापतिवधः ।

अनन्तशास्त्री फडके ।

वैदिकपौराणिकग्रन्थेषु प्रजापतिवधकथानेकविधरूपेणोपलभ्यते । तां कथां तथान्याश्च दृष्ट्वा केचन पाश्चात्यास्तदनुयायिनो भारतीयाश्च वैदिकपौराणिकवाङ्मयं निःसारमामनन्ति । अपरे पुनर्वैदिकवाङ्मयेषूपलभ्यमानाः सर्वा अपि कथा वैदिकर्षिभिर्वाय्वादिकानां विलक्षणा घटना दृष्ट्वा भीत्याऽऽदरेण वा मनुष्याकारैस्ता रूपयित्वाऽलौकिकसामर्थ्ययुता देवताः कल्पयित्वा च वैदिकसूक्तेषु स्तुता अनेकयज्ञेषु हुताश्चेति वर्णयन्ति । निरुक्ताध्वरमीमांसाकाराणामपीदमभिमतम्[1] ।

प्रजापतिवधस्वरूपनिर्णयार्थं प्रजापतिस्वरूपवर्णनमावश्यकम् । संहिताब्राह्मणग्रन्थेषु प्रजापतिपदं [2]क्षत्रमनोविराडात्माग्नियज्ञसंवत्सराऽभिरण्यगर्भब्रह्मविश्वकर्मसोमवाग्दक्षप्रभृत्यर्थेषु प्रयुक्तं दृश्यते । एवं तदुत्पादितप्रजास्वरूपमप्यनेकविधं [3]लोकपालाम्भवागादित्यतूपरादिरूपे-

१ 'इति नैरुक्ताः' इत्यादिनानेकत्र दृश्यते । 'विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः' (पू० मी० १, २, ७)

२ 'प्रजापतिर्वै क्षत्रम्' (श० ब्रा० ८, ३, ११) 'मनो हि प्रजापतिः' (सामवि० ११, १) 'विराट् प्रजापतिः' (अ. ९, १५, १५) 'आत्मा ह्ययं प्रजापतिः' (श० ४, ६, १) 'अग्निर्वै प्रजापतिः' (कपि०सं० ७, १) 'प्रजापतिर्यज्ञः' (ऐ० ब्रा. २, ७) 'संवत्सरः प्रजापतिः' (श० १२, ५, ४) 'आपो वै प्रजापतिः' (श० ८, २, ३) 'प्रजापतिर्वै हिरण्यगर्भः' (तै० सं० ५, ५, १) 'प्रजापतिर्वै ब्रह्मा' (मैत्रा. १, ११, ७) 'प्रजापतिर्विश्वकर्मा' (श० ८, २, ३) 'सोमो वै प्रजापतिः' (श० ५, १, ३) 'प्रजापतिर्हि वाक्' (तै० ब्रा० १, ३, ४) 'स वै दक्षः' (श० २, ४, ४) इत्यादिषु ।

३ 'स ईक्षतेमे नु लोकाश्च०' (ऐ० उ० ३, १) 'अम्भो मरीचीर्मरमाप' (ऐ० उ० १, २) 'स मनसा वाचम्' (बृ. २, २, ३-४) 'स त्रेधात्मानं व्याकुरुत, आदित्य०' (बृ० १, २, ३) १४५
'प्रजापतिरात्मनो वपां०……तूपरः०' (तै० सं० २, १, १) इत्यादि ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

णोपलभ्यते। तथा प्रजोत्पत्तिसाधनान्यप्यनेकानि [1]यज्ञतपःप्राणाब्विराड्योनिस्वात्मस्वशरीरादिकानि प्राप्यन्ते। तत्कथास्थदुहितृस्वरूपमप्यनेकप्रकारकं [2]दिवोषोवाक्प्रभृतिना दृश्यते। एवञ्चानेककल्पनायुते संशयादिव्याकुलेऽस्मिन्विषये विज्ञविचारकाणां पाठकानाञ्च पुरतो विचारदिक्प्रदर्शनरूपेण किमपि विचारजातमुपस्थाप्यते, न तु सिद्धान्तस्वरूपेण। प्रजापतिवधविषयविचारप्रसङ्गतो वैदिककथानामृग्वेदत आरभ्य ब्राह्मणपुराणादिवाङ्मये कथं विस्तरो विपरिणामो वाजायत, तदपि वृत्तं प्रकाश्यते। विचारात्पूर्वं केचनाविरोधिनः प्रायो मान्याश्च विषयाः प्रदर्श्यन्ते विचारविषयसौकर्यार्थम्।

सर्वेषु वेदोपलब्धभागेषु ऋक्संहितात्यन्तप्राचीनतमा, यतः सर्वत्र ऋक्प्राथम्यं दृश्यते[3]।

ऋक्समुदायेषु केचन मन्त्राः प्रलयपूर्वकालिकाः प्रलयपूर्वकालिकस्थितिबोधकाश्च[4]। अपरे प्रलयस्थितिबोधकाः प्रलयोत्तरकालिकस्थितिबोधकाश्च[5]। भौतिकपदार्थेषु देवतात्वमारोप्यैतेष्वेव वर्णनमुपलभ्यते।

आर्याणां यत्र कुत्र वाऽतिपूर्वनिवासस्थानं भवतु परन्त्वेकदा हिमजन्यः प्रलयः सम-

१ 'यज्ञेन वै प्रजापतिः०' (तै० सं० ६, ४, १, १) 'तपसा वै०' (कपिष्ठ० ४, ३) 'प्राणेभ्यो वै०' (कपि० ७, ७) 'अद्भ्यः प्रजाः०' (कपि० १, ६, ३) 'स त्रेधात्मानं०' (बृ० १, २, ३) 'विराजो वै योनेः०' (मैत्रा० १, १०, ८) 'सोऽभिध्याय शरीरात्०' (मनु० १, ८)

२ 'प्रजापतिर्वै स्वां दुहितरं.......दिवमित्यन्य आहुरुषसमित्यन्ये०' (ऐ० ब्रा० ३, ३, ८) 'वाग् द्वितीयासीत्, तां मिथुनम्०' (कठसं० १२, ४)

३ 'ऋक्सामयोः' (शु. य. ४,९ । कण्व० ४,१० । कठ० २,४) 'ऋक्सामाभ्याम्' (अथ० १०,१)

४ येषु मनुष्यवत्साधारणस्थितिर्बोध्यते। यथा 'प्रजापतेर्नत्व०' (ऋ० १०,१२१,१) इत्यादिकाः।

५ भौतिकपदार्थेषु देवतात्वमारोप्य वर्णयितारः। यथा ऋ० (२,१३,१०) इत्यादयोऽनेके। तथा नासदीयसूक्तस्थाः।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

जायत । यत्र संस्कृतेस्तत्कर्तृणाञ्च सर्वेषां प्रायो विनाशः सञ्जातः[1] । प्रलयशब्दाद्धिमार्थक-प्रालेयरूपसंसाधकः (अ० ७।३।२) पाणिनिरपि हिमप्रलयं सूचयति ।

तन्महासङ्कटकालादवशिष्टैरार्यैस्तपसा स्मारं स्मारं व्युत्क्रमखण्डितब्राह्मणादिमिश्रितानां वेदानां प्राप्तिः कृता[2] । अत एव ऋग्वेदमन्त्रेष्वनेकत्र 'पूर्वेभिर्ऋषिभिः' 'नूतनैः' (१।१।२, ६।४४।१३,७।२६।४) 'नवीयसीं गिरम्' (८,६५,५) 'पूर्वेभ्यः पथिकृद्भ्यः' (१०,१४,१५) इत्यादयो निर्देशा उपपद्यन्ते ।

हिमप्रलयात्पूर्वं यज्ञविधिः सामान्यः सरलश्चासीत्, प्रलयानन्तरं त्रेतायां विस्तृतो जातः[3] ।

प्रलये वेदविभागा बहवो नष्टाः, अवशिष्टा ये तेऽपि खण्डितरूपा[4] भगवता व्यासेन यज्ञसङ्गत्यर्थं व्यस्य क्रमान्वयव्यवस्था कृता[5] । प्रलयानन्तरं पुनस्तथैव विनाशो मा भूदिति-हेतुना वेदवाङ्मयानुपूर्वीरक्षणे महर्षिभिर्महान् प्रयत्नः कृतः[6] । वर्णश्चैकस्तद्रक्षणार्थं नियुक्तः[7] । पुराणसंरक्षणार्थं तादृशः प्रयत्नो न जातः, किन्तु प्राक्कालिकमर्थज्ञानं कथञ्चित्परम्परया संरक्ष्य

१ 'मनवे ह वै प्रातः.........सर्वाः प्रजा निरुवाह, मनुरेवैकः परिशिशिषे' (श० ब्रा० १,८,१-८) (मत्स्यपु० अ० १-२)

२ "युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः ।
लेभिरे तपसा पूर्वमनुज्ञाता स्वयंभुवा ॥" (भार० शा० २१०,१९)

३ 'तदेतत्सत्यं मन्त्रेषु कर्माणि कवयो यान्यपश्यंस्तानि त्रेतायां बहुधा संततानि' (मुं० २,१)

४ पुरुरवउर्वशीयमयमीसंवादप्रभृतिभागो द्रष्टव्यः ।

५ 'व्यदधाद्यज्ञसंतत्यै वेदमेकं चतुर्विधम् । ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ॥' (भा० ४।१०) एवमन्यत्र ।

६ "जटा माला शिखा रेखा ध्वजो दण्डो रथो घनः ।
अष्टौ विकृतयः प्रोक्ताः क्रमपूर्वा महर्षिभिः ॥" (जटापट०)

७ 'ब्राह्मणेन निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति' अत्र ब्राह्मणपदं विशेषार्थबोधकं प्रतिभाति ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुनर्योग्यस्थितौ तद्ग्रन्थरूपेण निबद्धय तत्परम्पराप्रचारार्थमेकोऽधिकारी नियुक्तः[1]। एवमानुपूर्वीरक्षणाभावात्पुराणेष्वानुपूर्व्यर्थश्चानेकरूपेणोपलभ्यते, स्मरणस्यानेकरूपत्वात्। तत्र भिन्नभिन्नस्मरणस्याप्रामाण्ये प्रमाणाभावात्कल्पभेदेन कथाभेदं पौराणिकाः समादधति।

प्रलयपूर्वकालिकप्रजापतिप्रभृतिष्वादरातिशयात्तेषां विलक्षणमाहात्म्यबोधकवर्णनश्रवणात् प्रलयावशिष्टैर्ऋषिभिस्तेषु देवत्वमारोप्य भौतिकघटनाभिः साकमलौकिकं तेषां चरितं तपसा प्रतिभातमिति।

यो मन्त्रः प्रायः सर्ववेदभागेषूपलभ्यते स प्रलयपूर्वकालिकवेदभागस्थ इति कथनमुचितं स्यादिति भारतीया विचारपद्धतिः। अस्तु। प्रजापतेर्मनुष्यवत्साधारणस्वरूपस्य बोधकः 'प्रजापते- र्नत्वदेतान्यन्यो विश्वा जातानि०' इत्यादिमन्त्रस्तथा 'हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्' इत्यादिकः प्रायः सर्ववेदभागेषूपलभ्यते[2]। दशममण्डलस्थोऽयं मन्त्रः। केचन दशममण्डलस्था मन्त्रा ऋक्संहितान्यमण्डलानामपेक्षया नूतना इति कथयन्ति। परन्तु मन्त्रकर्तारः ऋषयो मन्त्रान्नूतनान् स्वीकृत्यापि तत्रत्यवर्ण्यमानं तत्त्वमतिप्राचीनमिति स्पष्टं सूचयन्ति[3]। अस्तु। प्रजापते नेत्यादिमन्त्रस्यायं भावः, प्रजापतिभिन्नः कश्चिदपि नास्ति यः सम्पूर्णभूतसमुदायस्य प्राणिमात्रस्य च व्यापकतया संरक्षको द्रव्यदाता च भवेदिति। 'हिरण्यगर्भ' इत्यादिकस्य चाभिप्रायः, ज्ञानप्रदः[4] प्रजापतिर्मुख्यः (पूर्वमुत्पन्न इति सा०) प्राणिमात्रस्याधिपतिः पृथिवीमन्तरिक्षं चाधिकरोति, तस्मै प्रजापतये[5] हविषा परिचरेमेति। अस्मिन् सूक्ते

१ 'इतिहासपुराणानां पिता मे रोमहर्षणः।' (भाग० १, ४, २२)
'स्वधर्म एष सूतस्य सद्भिर्दृष्टः पुरातनैः।' (वा० १, १, २६) अन्यत्रापि।

२ 'प्रजापते०' मन्त्रः (अथर्व० ७, ७९, ४। वाज० १०, २०। तै० सं० १, ८, १४। तै० ब्रा० २, ८, १, ८) एवं 'हिरण्यगर्भ०' मन्त्रः (अथ० ४, २, १। वाज० १४, ४। तै० सं० ४, १, ८। ताण्ड्यब्रा० ९, ९, १२) एवमन्यत्र।

३ 'इमां प्रत्नाय सुष्टुतिं नवीयसीं वोचेयमस्मा उशते शृणोतु नः' (ऋ० १०, ९१, १३)

४ 'अथ हिरण्मयः कस्मात् स हि हिरण्मयः विज्ञानमयः सर्वभूतानां तत्कृतत्वादन्तःप्रकाशस्य' इति निरुक्तभाष्यम्।

५ कस्मै काय, क इति प्रजापतेर्नाम (तै० ब्रा० २, २, १०)।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

प्रजापतिमाहात्म्यस्य विस्तरशोऽनेकप्रकारेण बोधका अनेके मन्त्राः सन्ति[1]। एतैर्मन्त्रैरिदं प्रसिद्ध्यति यत् प्रजापतिः सर्वप्राणिजातस्याधिपतिरासीत्[2]। स च सर्वेभ्यो ज्ञानमन्नं धनञ्च ददाति स्म। तस्य सर्वे शासने तिष्ठन्ति[3], स च पृथिव्या अधिपतिरिति। अस्मिन्सूक्ते 'हिरण्यगर्भ' इति प्रथमो मन्त्रः 'प्रजापतिः' इत्यन्तिमः। आभ्यां सर्ववेदभागोपलब्धाभ्यां मन्त्राभ्यां प्रलयपूर्वकालिकलोकाधिपतेः स्वरूपं ज्ञातुं शक्यते। ब्राह्मणादिभागैश्चेदं ज्ञायते यत् प्रजापतिनाग्निरुत्पादितः[4]। अनेके क्रतवो निष्पादिताः[5]। नूतनाः पशवोऽश्वादयः कार्येषु योजिताः[6]। एवं प्रकारेण सर्वप्रजानां समुन्नतिर्यथा भवेत्तथा प्रयतितम्। अत एव स एक एव राजेति मन्त्रेषूपलभ्यते[7]।

प्रजापतिसमयेऽन्या अपि संस्कृतय आर्याणामासन्, यत्रात्रिभरद्वाजवसिष्ठविश्वामित्रप्रभृतय[8] ऋषयो मुख्या आसन्। तत्र केचन ब्रह्मणा मनसा पुत्रवत्कल्पिता आसन्[9]। तेऽपि प्रजापतिं पितृवत्स्वीकुर्वन्ति स्म। प्रजापतिः संवत्सरपर्यन्तं किञ्चित्कार्यं सम्पादितवान्, अतः

१ १०।१२१।१-१०।

२ 'य ईशे अस्य द्विपदश्चतुष्पदः' (१०, १२१, ३)

३ 'यस्य विश्व उपासते प्रशिषं यस्य देवाः' (१०,१२१, २) 'प्रशिषं-प्रकृष्टं शासनमाज्ञां विश्वे सर्वे प्राणिनः उपासन्ते सेवन्ते।' (सायणः)

४ 'प्रजापतिर्वा इदमासीत्। तस्मादग्निरध्यसृज्यत' (कठसं० ६, १)

५ 'प्रजापतिरकामयत ····· स तपोऽतप्यत स तपस्तप्त्वेमं द्वादशाहमपश्यत्' (ऐ० ब्रा० ४, ४, १)

६ 'प्रजापतिर्वा ओषधीः परुश्शो वेद प्राजापत्योऽश्वः' (कठसं० ३१, १, १)

७ 'महित्वैक इद् राजा जगतो बभूव' (ऋ. १०, १२१, ३)

८ अत्रिः (ऋ. ५, ७८, ४ । इ.) भरद्वाजः (ऋ. ६, ६५, ६ । इ०) विश्वामित्रः (ऋ. ३, ५३, १३ । इ०) वसिष्ठः (ऋ. १०, ६६, १४ । इ०)

९ 'पतीन् प्रजानामसृजं महर्षीनादितो दश' ··· 'प्रचेतसं वसिष्ठञ्च भृगुं नारदमेव च' (मनुः १, ३४-३५)

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संवत्सरस्य नामापि प्रजापतिरिति कृतं दृश्यते[1]। तेनाग्निमुत्पाद्य तत्र यज्ञकरणादग्नेरपि[2] यज्ञस्य च [3]प्रजापतिरिति नाम कृतं लभ्यते। अयं भावः, अधुना यथा प्रसिद्धार्थकशब्दानामर्थस्य मुख्यत्वं स्वीकृत्यान्यत्रापि मुख्यत्वं बोधयितुं यथा तच्छब्दप्रयोगः क्रियते [4]तथैव प्रजापतिविषये तत्काले कृतमिति प्रतिभाति। एवमन्यत्र ज्ञेयम्। प्रजापतिकाले ऋषिसमुदायवदन्येऽपि समुदाया आसन्। येषां वर्णनं तैत्तिरीयसंहितायां सम्यक् कृतमुपलभ्यते। 'देवा मनुष्याः पितरस्तेऽन्यत आसन्, असुरा रक्षांसि पिशाचास्तेऽन्यतः०' (२।४।१।१) एतेषां सर्वेषां संस्कृतयः किञ्चिदंशेन समानाः किञ्चिदंशेन विरुद्धाश्चासन्। एवञ्च ऋषिसंस्कृतिः प्रायः सर्वांशेन प्रजापतिसंस्कृतिमनुकरोति स्म, विवाह एव किञ्चिद् भेदो लभ्यते, तथैव देवसंस्कृतिरपि विवाहभेदं परित्यज्य प्रजापतिसंस्कृतिसमानैव प्रायः। आसुरराक्षसपिशाचसंस्कृतयस्तु सर्वप्रकारेणैव भिन्नाः।

दीक्षायामुपनयने विवाहे कन्याप्रदाने च स्वकीयं प्रजापत्यनुयायित्वं प्रकाशयितुं प्रजापतिवद् रूपधारणं कर्तव्यमिति सूत्रकारादिभिर्ज्ञापितम्। आश्वलायनगृह्यसूत्रे 'ऐणेयेन वाजिनेन ब्राह्मणं रौरवेण क्षत्रियमाजेन वैश्यम्' इति। (आ० गृ० १।१९।८) एवञ्च मृगचर्मावृतप्रजापतिवदुपनयनेऽपि तदनुयायिभिश्चर्मावरणं कर्तव्यमिति लभ्यते। एवं यज्ञदीक्षायामपि 'कृष्णविषाणया कण्डूयति' इति मृगचर्मावृतो यजमानो मृगवदात्मशरीरं मृगशृङ्गेण कण्डूयति। एतत्सर्वं प्रजापतेर्मृगादिपशुयुक्तत्वात्तदनुयायिभिस्तथा वर्त्तितव्यमिति सूचयति[5]

१ 'प्रजापतिरकामयत प्रजायेयेति''' तं संवत्सरमबिभस्ततो वै स प्रजायत' (तै० सं० ५।५।२) 'सप्तदशो वै प्रजापतिर्द्वादशमासाः पञ्चर्तवस्तावान् संवत्सरः, संवत्सरः प्रजापतिः' (ऐ० ब्रा० १।३)

२ 'अग्निर्वै प्रजापतिः' (कपिष्ठलसं० ७।१) ३ 'प्रजापतिर्यज्ञः' (ऐ० ब्रा० २।७)

४ रुद्राक्षजाबालोपनिषदि रुद्राक्षाणां ब्राह्मणादिसंज्ञाः कृता दृश्यन्ते। 'श्वेतास्तु ब्राह्मणा ज्ञेयाः क्षत्रिया रक्तवर्णकाः। पीतास्तु वैश्या विज्ञेयाः कृष्णाः शूद्रा उदाहृताः॥' (१।९) एवं वृक्षादिषु पश्वादिष्वपि भेदो ब्राह्मणादिरूपेण दृश्यते।

५ प्रजापतेः पश्वधिपतित्वं ब्राह्मणग्रन्थे प्रसिद्धम्। 'यथा प्राजापत्यं भवति प्राजापत्या वै पशवः' (तै. सं. २, ३, २)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपनयने बटोः समर्पणं प्रजापतये कर्तव्यमिति विहितम्[1]। कन्यादानेऽपि 'कन्यादासश्च दासी च प्राजापत्या इति स्मृताः' इति विष्णुधर्मोत्तरवचनमनुस्मृत्य कन्यायाः प्रजापति-दैवता स्वीक्रियते। प्राजापत्यविवाहस्य ब्राह्मविवाहतो भेदो विशेषरूपेणाश्वलायनसूत्रतो मनुस्मृतितश्च नैव दृश्यते। आश्वलायनः 'सहधर्मं चरत इति प्राजापत्यः'। इत्येव केवलं वक्ति। मनुश्च—

"सहोभौ चरतां धर्ममिति वाचानुभाष्य च।
कन्याप्रदानमभ्यर्च्य प्राजापत्यो विधिः स्मृतः॥" इति।

(मनुस्मृतिः ३। ३०)

अस्य लक्षणस्य ब्राह्मविवाहेन साकं संयोज्य विचारकरणे न भेदो विशेषतः प्रतिभाति[2]। प्राजापत्यविवाहादार्षविवाहभेदस्तु 'गोमिथुनं दत्त्वोपयच्छेत स आर्षः' (आ. गृ. १, ६) इति स्पष्ट एव। एवञ्च विवाहभेदं स्वसमुदाये प्रवृत्तं परित्यज्य प्रायः सर्वे प्रजापतिमनुयान्ति स्म। स्वस्वसमुदायेऽधिपतीनामधिकारे स्थितानां कन्यादासदासीनां स्वामित्वेऽपि तत्स्वाम्यं न जायाभोगतुल्यम्। किन्तु रक्षणपोषणस्वरूपं स्वौरस्यकन्यातुल्यमत एवाश्वलायनेन श्रौतसूत्रे स्मृतिकारैः पौराणिकैश्च तत्र तत्र स्वगोत्रसमुदायान्तर्गतकन्याविवाहो निषिद्धः। अयं नियमोऽतिप्राचीनकालत एव प्रजापतिसमयत एव प्रवृत्त इति शतपथब्राह्मणतो ज्ञायते—

"प्रजापतिर्वै स्वां दुहितरमभिदध्यौ ... अतिसन्धं वा अयं चरति" इति।

१ 'कस्य ब्रह्मचार्यसि प्राणस्य ब्रह्मचार्यसि, कस्त्वामुपनयते काय त्वा परिददामि' इति (आ० गृ० १, २०)

२ 'आच्छाद्य चार्चयित्वा तु श्रुतिशीलवते स्वयम्। आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः॥' (म. ३, २७) अत्र मनुना स्वयमितिपदोपादानात् प्राजापत्यविवाहे वरोऽर्थीति लभ्यते। याज्ञवल्क्यस्तु स्पष्टतया प्रकाशयति 'इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने। स कायः....' इति (या० १, ३, ६०) सूत्रकारमते यद्यपि नास्ति विशेषस्तथापि मनुस्मृत्यादिवज्ज्ञेयः। 'अलङ्कृत्य कन्यामुदकपूर्वं दद्यादेष ब्राह्मः' इत्येव सूत्रकारमतम्। अस्तु, तात्पर्यमेतावद् भेदो विशेषो नास्त्येवेति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अत्रातिसन्धो नाम प्रतिज्ञातिक्रमणमिति । एवञ्च पालनरूपमेव स्वगोत्रीय-(समाजीय) कन्यानां कृते प्रजापतेः कर्तव्यमासीत् । तच्च तेन प्रतिज्ञातमपि न पालितमिति ज्ञायते । ऋङ्मन्त्र-तोऽपि तथैव ज्ञायते यद् ऋङ्मन्त्रे कनाया दुहितुरिति द्वौ शब्दावुपात्तौ । तत्रैकेनैव दुहितृशब्देन कार्यनिर्वाहे कनापदं कन्यापरमस्वीकृत्य कमनीयपरं सायणाचार्येण योजितम् । परन्तु कनाशब्दः कन्यारूपार्थमपि बोधयति, यतो यास्केन कन्याशब्दस्य निर्वचनम् 'कन्या कमनीया भवति' (४।१५) इति कृतम् । तेन कन्याबोधकमपि मन्त्रस्थं पदं संभवति । एवञ्च दुहितृतुल्यां स्वसमुदायस्थां कन्या-मित्यर्थोऽपि कर्तुं युज्यते । एवं तदग्रिमेऽपि मन्त्रे 'पिता यत्स्वां दुहितरमधिष्कन्' (१०।६१।७) इत्यत्र दुहितृतुल्यामित्यर्थकरणमुचितं भाति । भवत्वेतन्नास्त्याग्रहोऽस्मिन्विषये । परन्तु पूर्वं विवाहक्रमोन्नतावस्थासु राक्षसपैशाचविवाहवद्युद्धाद्यनेकसंकटत्यागार्थं स्वसमाजाद् भिन्नसमाजा-न्तर्गतकन्यां याचयित्वा तदिच्छया विवाहः स्यात्, ततो यज्ञादौ योग्यतां दृष्ट्वा यज्ञीयकार्यं कारयित्वा च कन्यादानम्, ततो योग्यतमाय स्वयं गत्वाऽप्रार्थिने कन्यादानमयं क्रमो भवेदिति सम्भाव्यते[1] । एवञ्चैतादृशपद्धतिं गोत्राद् भिन्नगोत्रीयकन्याग्रहणरूपां परित्यज्य स्वगोत्रीय-कन्याग्रहणमेवातिसन्धकरणं प्रजापतिना कृतम् । तदा तत्समाजस्थ एव प्रजापतिना यज्ञात् पूर्वं बहिष्कृतो[2] रुद्रो देवैर्वास्तोष्पतित्वेन प्रजापतिस्थाने स्थापितः[3] । तदा प्रजापतिर्लज्जितः स्वाधि-कारं स्वशरीरं वा तत्याज[4] । अन्यत्र सर्वत्र ब्राह्मणपुराणग्रन्थेषु तस्य वधो रुद्रेण कृत इति लभ्यते[5] ।

१ सूत्रादौ विद्यमानविवाहविषयं तत्तद् विवाहफलानि च दृष्ट्वायं विचारः कल्प्यते— 'तस्यां जातो द्वादशावरान् द्वादशपरान् पुनात्युभयतः' (आ. गृ. १,६)

२ 'प्रजापतिर्वै रुद्रं यज्ञान्निरभजत्' (गो० ब्रा० उ० १,२)

३ 'पिता यत् स्वां दुहितरमधिष्कन्…देवा वास्तोष्पतिं व्रतपां निरतक्षन्' (ऋ० १०।६१।७।)

४ 'वाचं दुहितरं तन्वीं स्वयम्भूर्हरतीं मनः । स इत्थं गृणतः पुत्रान् पुरो दृष्ट्वा प्रजा-पतीन् । प्रजापतिपतिस्तन्वं तत्याज व्रीडितस्तदा ।' (भाग० ३, १२, २८-३३)

५ 'प्रजापतिर्वै स्वां दुहितरं०…'स वै वरं वृणा इति वृणीष्वेति स एतमेव वरम-वृणीत पशूनामाधिपत्यं तदस्यैतत्पशुमन्नाम । तमभ्यायत्याविद्ध्यत् ।' (ऐ. ब्रा. ३,३,८)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रजापतिकथात इमेंऽशा लभ्यन्ते । (१) ब्राह्मणः प्रजापतिः[१] प्रजाधिकारी । (२) तत्सम्बन्धिनी दुहितृतुल्या काचिद् व्यक्तिः । (३) देवैर्योजितो वधकर्ता कश्चिद् । (४) वधस्वरूपम्—शरीरत्यागः, अधिकारत्यागः, अवमानः, मस्तकच्छेदः, शरीरच्छेदो वा । एतैरंशैर्मूलप्रजापतिकथारहस्यमज्ञात्वानेककल्पना अनेकविषयकाश्च कथाः प्रादुर्भूताः स्युस्तासां विचारः प्रदर्श्यते ।

प्रजापत्यधिकारः कियतांशेन इन्द्रे रुद्रे चागतः, यतः प्रजापतिना वावाता प्रासहा नाम कन्येन्द्राय प्रदत्ता । तत्र सा कन्या नाम सेना प्रजापतिना दत्तेति विवरणमैतरेयब्राह्मणे दृश्यते[२] । तथा प्रजापतिना देवानामाधिपत्यमिन्द्राय दत्तम्[३] । तथा जयकारका मन्त्राः प्रदत्ताः[४] । एवं रुद्राय प्रजापतिना देवैश्च पशुपतित्वं प्रदत्तम्[५] । एवञ्च क्वचिदिन्द्ररूपेण क्वचिद् रुद्ररूपेणायोग्याचरणकर्तुः शिक्षाकरणं फलति । अस्तु । 'दक्षो वै प्रजापतिः' इति श्रुत्या दक्षस्य प्रजापतित्वमवलम्ब्य सतीनामकदुहित्रा दक्षयज्ञेऽग्नौ स्वीयदेहोऽहूयत, ततो रुद्रनिर्मितवीरभद्रद्वारा तस्य शिरश्छेद इत्यादिकं भारते भागवते च[७] प्रसिद्धम् । अत्र दुहितृगमनं नास्ति तत्स्थाने दुहितुरपमानः । तथा स्वनिन्दाकारिणो ब्रह्मणो मस्तकच्छेदो भैरवरूपरुद्रेण

१ 'प्रजापतिर्वै ब्रह्मा' (मै. सं. १,११,७) 'ब्राह्मणो वा एष जायते यो दीक्षते तस्माद्राजन्यो वैश्योऽपि ब्राह्मण इत्येवावेदयति ।' (आपस्तम्बश्रौतसूत्रम्) 'यः कश्चिद्दीक्षते ब्राह्मण इत्येवावेदयेत् ।' (सत्याषाढहिरण्यकेशीयश्रौतसूत्रम् प्र. ७ प. १)

२ 'सेना वा इन्द्रस्य प्रिया जाया वावाता प्रासहा नाम को नाम प्रजापतिः श्वशुरस्तद्यास्य कामे सेना' (३, २, ११)

३ (तै. ब्रा. २, २, १०)

४ 'देवासुराः संयत्ता आसन् स इन्द्रः प्रजापतिमुपाधावत्, तस्मा एताञ्जयान् प्रायच्छत ।' (तै. सं. ३, ४, ४३)

५ 'प्रजापतिर्वै स्वां दुहितरं····अबिभेत्सोऽब्रवीत्पशूनां पति करोमीति' (मै.सं.४,२,१२)

६ '····विध्येति स तथेत्यब्रवीत्स वै वरं वृणा इति वृणीष्वेति स एतमेव वरमवृणीत पशूनामाधिपत्यम् ।' (ऐत. ३, ३३)

७ (महा० शां. २८५, भाग० ४,३०,७ । वायु० १,१०,१८ । ब्रह्माण्ड २,१३,४५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कृत इति[1]। अत्र दुहितृस्थानेऽयोग्याचरणं स्वीकृतम्। क्वचिन्मिथ्याभाषणार्थं ब्रह्मणे रुद्रेण शापो दत्तः[2]। अत्र मिथ्याभाषणं दुहितृस्थाने स्वीकृतं वधस्थाने शापः। क्वचिद् दुहितृस्थाने द्यौरुषा वा कल्पिता[3]। क्वचिद् वाक् कल्पिता[4]। तथा प्रजापतेर्ब्राह्मणत्वमिन्द्रस्य च तच्छासनकर्तृत्वमवलम्ब्य विश्वरूपवृत्रवधकथा प्रवृत्ता। विश्वरूपवधकथायां प्रजापतिस्थाने विश्वरूपः, दुहितृधर्षणस्थाने राक्षसेभ्यो हविर्दानम्, रुद्रस्थाने शासक इन्द्रः स्वीकृतः, वधः साक्षादेव शिरश्छेदरूपः[5]। तथा षण्डामर्कवरत्रित्वाष्ट्ररूपदैत्ययाजकानां दाहेन नाशः कृतः। अत्र प्रजापतिस्थाने षण्डामर्कादीनां ग्रहणं दुहितृस्थाने दैत्ययाजनं वधप्रकारः प्रदाहः[6]। क्वचित् प्रजापतेर्मृगसम्बन्धमवलम्ब्य मृगस्वरूपिणो नमुचेर्वधः कृतः[7]। अत्र प्रजापतिस्थाने नमुचिः, दुहितृस्थाने स्वविरोधः। तथा ब्राह्मणवृत्रस्य वधः प्रदर्शितः। तत्र प्रजापतेः स्थाने वृत्रः, दुहितृस्थाने स्वविरोधः, वधसाधनस्थाने फेनान्तर्गतं वज्रम्, साक्षाद्वधः[8]।

एवमेव प्रजापतिस्थाने इन्द्रं ब्रह्माणं वाश्रित्य तथा शासकस्थाने रुद्रं श्रीकृष्णं गौतमं चाश्रित्य कथा प्रचलिता दृश्यते। इन्द्रः शंकराय वज्रं पातयितुं प्रवृत्तः, परन्तु तद्दृशा तस्य हस्तावरोधः[9] सञ्जातः। एवं प्रजापतिस्थाने ब्रह्माणं शासकस्थाने श्रीकृष्णं दुहितृगमनस्थाने ब्रह्मकर्तृकगोपादिहरणं वधस्थाने तिरस्कारं परिकल्प्य भागवतीया कथा प्रवृत्ता भवेत्[10]।

१ मत्स्य० १८३, ८४-८६

२ स्कन्द० १, १, ६ तथा १, ३, २, ९-१५

३ ऐतरेयब्रा० ३, ३३, तथा ५, २

४ कठसं. १२, ५, १४

५ स्कन्द० १, १, १७ तथा पद्म उ० १५३, १६८

६ ब्रह्माण्ड० ३, १,८५.

७ 'यद्धत्यं मायिनं मृगं तमु त्वं माययावधीः' (ऋ. १, ८०, ७)

८ तै० सं. २, १,४। देवीभा० ६, १, ६। म० उ० १०। वा.रा.उ० ८४—८६ भाग० ६, ९। पद्म. भू. २५ इत्यादि।

९ 'जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः' रघु० २ तथा शिवपुराणेऽपि।

१० भागवतब्रह्मस्तुतिप्रकरणम् (१०, १३—१४)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एवमिन्द्रेण कृतो गोकुलनाशाय जलवर्षणरूपप्रयत्नः श्रीकृष्णेन निवारितः। अत्र प्रजापतिस्थान इन्द्रः, दुहितृगमनस्थाने गोकुलनाशप्रयत्नः, शासकस्थाने श्रीकृष्णः, वधस्थाने गर्वदमनञ्च कल्पितं स्यात्[1]। एवं प्रजापतिस्थान इन्द्रः, दुहितृस्थानेऽहल्या, शासकस्थाने गौतमः परिकल्पितः, वधस्थानेऽनेकभगत्वञ्च परिकल्पितं भवेत्[2]। एवमनेकत्र कल्पयितुं शक्यते। अस्तु, यानि प्रजापत्यादिप्रतिनिधित्वेन चरित्राणि प्रदर्शितानि तानि प्रायः सूक्ष्मरूपेण संहिता-ब्राह्मणभागेषु दृश्यन्त एव। एवं वैदिककथा आश्रित्य पौराणिककथा अनेकप्रकारैर्विपरिणमय्य ग्रथिताः पुराणेष्विति प्रतिभाति। सत्यवसरे पुनश्चात्र विषयेऽवशिष्टाननेकांशानवलम्ब्य प्रदर्शयितुं शक्येत किञ्चिदत्र दिक्प्रदर्शनमात्रं कृतमिति शम्।

---

१ भागवत० १०, २४, २७। विष्णु० ५, १०, १२ ब्रह्मवैवर्त० ४, २१। ततो भागवती कथा प्रवृत्ता।

२ म. भा. अनु. ४१. १५३। ब्रह्म० ८७। पद्म० सृ० ५७ इत्यादि। बालकाण्डीया रामायणस्था कथा।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भगवतो बुद्धस्य श्रुतिधर्माद्यविरोधः ।

श्रीविभूतिभूषणभट्टाचार्यः ।

विद्यालयपाठ्यभूतेषु भारतीयपण्डितरचितेषु केषुचित् पुरावृत्तग्रन्थेषु दृश्यते यद् भगवान् बुद्धस्तु तदानीन्तनस्य श्रुतिविहितवर्णाश्रमधर्म्मानुसारिणः समाजस्य संस्कर्त्ता बभूव । श्रुतिविहितधर्म्मस्य वर्णजात्यादिव्यवस्थायाश्च विरोधिनोऽस्य महात्मनो धर्म्मोपदेशमधिकृत्यासीद् ब्राह्मणैः सह विवादः[1] ।

पाश्चात्यानां केषाञ्चित् पुरावृत्तविदाम्मते पुनर्नायं श्रुतिविरुद्धस्याभिनवस्य कस्यचिद्धर्म्मस्योपदेष्टासीत् । न वा तेन समाजस्य संस्कारार्थं वर्णजात्यादिव्यवस्थाया विरोधो वा कृतः[2] ।

अपरञ्च भारतीयपुरावृत्तविदामग्रेसरेण 'विन्सेन्ट स्मिथ' महोदयेन तु सुस्पष्टमुक्तं यन्नासीद् भारते वर्षे एवम्भूतः कश्चित् कालो यस्य खलु 'बौद्धयुग' इति संज्ञा भवितुमर्हति । न वा भारते वर्षे बौद्धेति नाम्ना प्रसिद्धस्य सम्प्रदायस्य जनसङ्ख्या स्मार्त्तधर्म्मानुसारिजनसङ्ख्यातोऽधिका किं बहुना तुल्यापि वा जाता[3] ।

१ डा० ईश्वरीप्रसादकृते 'भारतवर्ष का इतिहास' नामके ग्रन्थे १९३८ ईशवीये संस्करणे ४७, ५१, ५५ तमेषु पृष्ठेषु, 'आर. सी. दत्त'रचिते 'ए हिस्ट्री ऑफ् ऐंशियेन्ट एन्ड माडर्न इंडिया' नामके ग्रन्थे १९०९ ईशवीये संस्करणे ३३तमे पृष्ठे च द्रष्टव्यम् ।

२ 'हिस्ट्री ऑफ् इंडिया' नामके 'ए. एफ. रुडाल्फ हॉर्न्‌ल, हर्वर्ट ए. स्टार्क' इत्येताभ्यां रचिते ग्रन्थे १९०९ ईशवीये चतुर्थे संस्करणे ३०, ३५ तमयोः पृष्ठयोः, 'ऐंशियेन्ट एन्ड हिन्दु इंडिया' नामके 'वी. ए. स्मिथ'रचिते ग्रन्थे १९३२ ईशवीये द्वितीये 'एस. एम. एडवर्ड्स'-परिवर्द्धिते संस्करणे ५२ तमे पृष्ठे च द्रष्टव्यम् ।

३ तत्रैव ५५ तमे पृष्ठे द्रष्टव्यम् ।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पुरावृत्तविदां विवादास्पदेऽस्मिन् बुद्धचरित्रे याथार्थ्यं निर्णेतुं वयमत्र यतिष्यामहे। तत्रादौ विप्रतिपत्तीनां स्वरूपमुपस्थाप्यानन्तरञ्च विनयपिटकेति प्रसिद्धस्य बौद्धानामाचारमूलभूतस्य ग्रन्थस्यालोचनेन तत्र निर्दिष्टं बुद्धचरित्रमुपस्थापयिष्यामः। बुद्धचरित्रविषये तावदधोलिखिता विप्रतिपत्तयः सम्भवन्ति।

१ अयं समाजस्य संस्कर्त्ता न वा ?

२ अयं वर्णजात्यादिव्यवस्थाविरोधी न वा ?

३ अयं वेदयज्ञादिनिन्दको न वा ?

४ अयं ब्राह्मणविद्वेषी न वा ?

५ अयं शिष्टाचारविरोधी न वा ?

(१) तत्र भगवतो बुद्धस्य समाजसंस्कर्त्तृत्ववादस्तु केषाञ्चित्पुरावृत्तविदां स्वकपोलकल्पित एव। यतो बहुशः खलु दृश्यते विनयपिटके यत् शाक्यकुलात् प्रव्रजितः शाक्यपुत्रः श्रमणो गौतमो धर्म्ममुपदिशति। न तु कुत्रापि तस्य समाजसंस्कारेच्छा तदर्था वा प्रवृत्तिर्विनयपिटके दृश्यते। स खलु शुद्धस्य (निवर्त्तकस्येति यावत्) धर्म्मस्यैव प्रवक्तासीत्। तेन खलु महात्मना निवर्त्तकधर्मप्राप्त्यर्थं सार्वभौमस्य ब्रह्मचर्यस्यैव उपदेशः कृतः[1]। बहुशश्च जनानां तादृशब्रह्मचर्यानुष्ठानेन सामाजिकमनस्सु प्रजोत्पत्तिसम्भावनालोपकृता समाजनाशाशङ्कैव उदग्रा जाता। विनयपिटकस्थवाक्यानुशीलनेनैतत्प्रतीयते यत् तदानीन्तनैः सामाजिकैः लोकेऽपुत्रकत्ववैधव्यकुलोपच्छेदादीनां प्रयोजकत्वेन जुगुप्सितः खल्वासीद् भगवान् गौतमः[2]।

१ "सो धम्मं देसेति आदिकल्याणं मज्झे कल्याणं परियोसानकल्याणं सत्थं सव्यञ्जनं केवलपरिपुण्णं परिसुद्धं ब्रह्मचरियं पकासेति" (महावग्गे 'ओल्डेनवर्ग'संस्करणे ६।३४।११)

२ "मनुस्सा उज्झायन्ति खीयन्ति विपाचेन्ति अपुत्तकताय पटिपन्नो समणो गोतमो वेधव्याय पटिपन्नो समणो गोतमो कुलुपच्छेदाय पटिपन्नो समणो गोतमो। ××× अपिस्सु भिक्खू दिस्वा इमाय गाथाय चोदेन्ति—

आगतो खो महासमणो मगधानं गिरिब्बजम्।
सब्बे सञ्जये नेत्वान कं सु दानि नयिस्सतीति॥" (महावग्गे १।२४।५)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२) न च तस्य महात्मनः शिष्टजनपरिगृहीतायाः सामाजिकमर्यादाया भङ्गे प्रवृत्ति-रुपलभ्यते। वर्णजात्यादिव्यवस्थायाश्च विरोधोऽपि कदाचिदपि तेन न कृत इत्येव विनयपिटकालोचनेन प्रतीयते। अनेन च महात्मना कुलानां वर्णापराख्यानां चातुर्विध्यं ब्राह्मणादि-भेदेन स्वीकृतमासीत्। जातीनाञ्च कासाञ्चिद् हीनत्वं कासाञ्चिच्चोत्कृष्टत्वमस्यानुमतमेवासीत्। तथैव गोत्रकर्मशिल्पानाञ्चोत्कृष्टापकृष्टभावोऽनेन स्वीकृतः। तदीयोपदेशवाक्यतात्पर्यालोचनेन प्रतीयते यज्जनपदभेदेन गोत्रकर्मशिल्पानामुत्कर्षापकर्षयोर्भेदे सत्यपि जातीनान्तूत्कर्षापकर्ष-योर्नासीदेवंविधो भेदः[1]।

(३) भगवतो बुद्धस्य वेदयज्ञादिनिन्दकत्वप्रवादोऽपि तदुक्तितात्पर्याग्रहणकृत एव। यतो मोक्षमार्गमुपदिशता तेन भगवता यदि यज्ञानां मोक्षं प्रत्यकारणत्वं तत एव च मुमुक्षूणां कृते तदनुष्ठानस्यानतिप्रयोजनीयत्वं ख्यापितं भवेत् तत्तु नैव दोषावहमिति मन्तव्यम्। यतः शिष्टपरिगृहीतेष्वपि साङ्ख्यन्यायवेदान्तादिप्रस्थानेषु यागादीनां मोक्षं प्रत्यनुपयोग एव ख्यापितोऽस्ति। तस्माद् यागादीनां मोक्षानुपायत्वकथनेन यदि भगवतो बुद्धस्य वेदादिनिन्द-कत्वं स्यात् तदास्तिकमूर्द्धन्यानां वादरायणकपिलपतञ्जलिगौतमकणादादीनामपि तथात्व-मर्थादापद्यते। इदमत्र विवेचनीयम्, पूर्वमीमांसाशास्त्रादृते केनापि शास्त्रेण यागादीनां परमनिःश्रेयससाधकत्वं नाभ्युपगतम्। इदमपि च द्रष्टव्यम्, यज्जटिलेन केनियेन कदाचिद्

१ (क) "कुलं नाम चत्तारि कुलानि खत्तियकुलं ब्राह्मणकुलं वेस्सकुलं सुद्दकुलम्" (सुत्तविभङ्ग, सङ्घादिशेष १३।२)

(ख) "जाति नाम द्वे जातियो, हीना च जाति उक्कट्ठा च जाति। हीना नाम जाति चण्डालजाति वेणजाति नेसादजाति रथकारजाति पुक्कुसजाति एसा हीनानाम जाति। उक्कट्ठा नाम जाति खत्तियजाति ब्राह्मणजाति। × × ×"

"गोत्तं नाम द्वे गोत्तानि हीनञ्च गोत्तं उक्कट्ठञ्च गोत्तं। हीनं नाम × कोसियगोत्तं भारद्वाजगोत्तं तेसु तेसु वा पनजनपदेसु ओञ्ञातं अवञ्ञातं × × × एतं हीनं नाम गोत्तं। उक्कट्ठं नाम गोत्तं गोतमगोत्तं मोग्गल्लानगोत्तं कच्चायनगोत्तं वासिट्ठगोत्तं तेसु तेसु वा पनजनपदेसु अबौञ्ञातं × × × चित्तिकतं एतं उक्कट्ठं नाम गोत्तं।" एवमेव कर्मणः शिल्पानाञ्च विषयेऽपि द्रष्टव्यं (सुत्तविभङ्गे, पाचित्तिये २।१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

भोजनाय निमन्त्रितो भगवान् भोजनावसान उपस्थितं केनियमुद्दिश्यैकां गाथामुदाहृतवान्। यस्यां खल्वग्निहोत्रस्य सर्वयज्ञमूर्द्धन्यत्वं सावित्र्याश्च गायत्रीति ख्यातायाः सर्ववेदसारभूतत्वञ्च वर्णनप्राथम्येन सबहुमानमावेदितमिति नैव तिरोहितं विनयपिटकानुशीलनपराणां पाठकानामिति[1]। एवमेव केनचिद् ब्राह्मणेन ब्रह्मोपदेशयोग्यत्वनिर्वाहका ब्राह्मणत्वसम्पादका धर्माः क इति पृष्टेन भगवता प्रतिष्ठापितब्रह्मचर्यस्य वेदान्तगस्य ब्राह्मणस्यैव ब्रह्मोपदेशयोग्यत्वमिति सुस्पष्टमुक्तम्। अत्रापि परम्परया वेदस्य ब्रह्मविद्योपकारकत्वमनेन ख्यापितमिति वेदयज्ञादिनिन्दकत्वप्रवादो निर्मूल एव प्रतीयते[2]।

(४) अथ तस्य महात्मनो ब्राह्मणान् प्रति द्वेषस्तैः सह विरोधो वासीदिति ब्रुवतां केषाञ्चित्पुरावृत्तविदां हृदयकलुषतैव प्रकाशिता स्यान्न तु वास्तवी स्थितिरिति मन्तव्यम्। यतो धर्मचक्रप्रवर्त्तनत आरम्य सहस्रशो ब्राह्मणा भगवतो बुद्धस्य शिष्यत्वमङ्गीचक्रुः। बुद्धशिष्येषु प्रमुखाः केचन ब्राह्मणा एवासन्। इदमपि च द्रष्टव्यम्, विनयपिटकप्रपञ्चितासु कथासु वर्ण्यते यद् वेरञ्जादयो ब्राह्मणा भगवतो बुद्धस्य यशः कीर्त्तिञ्च श्रुत्वा तथाविधानामर्हतां दर्शनं शुभावहमिति मत्वा तं द्रष्टुमुपगता आसन्[3]। किं बहुना, अन्यतीर्थीयपूर्वाणामुपसम्पदा जिघृक्षूणां कृते मासचतुष्टयं व्याप्य परिवासदानानन्तरमेवोपसम्पदा दातव्येति सत्यपि सामान्यविधौ जटिलानां (वानप्रस्थानां) साग्निकानां ब्राह्मणानां कृते नैवास्ति परिवासदानापेक्षेति यदैव त

१ "अग्गिहुत्तमुखा यञ्ञा सावित्थी छन्दसो मुखम्।
राजामुखं मनुस्सानं नदीनं सागरो मुखम्॥
नक्खत्तानं मुखं चन्दो आदिच्चो तपतं मुखम्।
पुञ्ञं आकङ्खमानानं सङ्घो वे जयतं मुखन्ति॥"
(महावग्गे ६।३५।८)

२ "यो ब्राह्मणो बाहितपापधम्मो निहुहुङ्को निक्कसावो यतत्तो।
वेदन्तगु वुसितब्रह्मचरियो धम्मेन सो ब्राह्मणो ब्रह्मवादं वदेय्य॥"
(महावग्गे १।२।३)

३ 'साधु खो पण तथा रूपाणं अरहतं दस्सनं होतीति' (सुत्तविभङ्गे, पाराजिके १।१।२. महावग्गे ६।३४।११. एवमन्यत्रापि बहुशः)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उपसम्पदाग्रहणार्थमागच्छेयुस्तदैव त उपसम्पादनीया इति विशेषेणोपदिष्टवान्[1]। यदि नाम भगवतो बुद्धस्य ब्राह्मणान् प्रति द्वेष एव स्यात्तदा तेषां कृते विशेषविधेरुपदेश एव कथं युक्तिसिद्धो भवेत्? निर्मलचित्तस्य तस्य रागद्वेषाविष्करणं आविष्कारकचित्तमालिन्यस्यैव द्योतकमिति विभावनीयम्।

(५) अथ तस्य महात्मनस्तात्कालिकशिष्टाचारविप्लावकत्ववादोऽपि नितरामसूयापरिकल्पित एव। केचन मन्यन्ते योऽयं ब्राह्मणादौ ज्येष्ठ आगतेऽभ्युत्थानासनादिदानाभावो भगवतो बुद्धस्य स तु तस्य शिष्टाचारविप्लावकत्वे प्रमाणभूत एव मन्तव्य इति। एतदपि नितराममूलमेव। यतः कदाचिद् वेरञ्जनाम्ना ब्राह्मणेन 'भो गौतम श्रुतं मयैतद्, यत् त्वं ब्राह्मणे जीर्णे वृद्धे महल्लके आगते नाभिवादयसि प्रत्युत्तिष्ठसि वा, आसनेन वा निमन्त्रयसि'इति पृष्टे भगवतोक्तम्, 'भो ब्राह्मण नाहमस्मिन् लोके तादृशं कञ्चिजनं पश्यामि यमहमभिवादयामि प्रत्युत्तिष्ठाम्यासनादिना निमन्त्रयामि वा। भो ब्राह्मण यं खलु जनं तथागतोऽभिवादयेत् प्रत्युत्तिष्ठेदासनेन वा निमन्त्रयेत्, मूर्द्धापि तस्य जनस्य विपाटयेदिति[2]।' अत्र त्विदानीन्तनानामपि योगर्द्धिसम्पन्नानां भासुरानन्दनाथापरनाम्नां भास्कररायाणां प्रणामेन संन्यासिनः कस्यचित् कमण्डलुविस्फोटोऽजायतेति नैव तिरोहितं शाक्तसम्प्रदायपुरावृत्तरसिकानां पण्डितानाम्। अतः स्पष्टमेवैतद् यद् भगवतो बुद्धस्य यत्र कुत्रचित् शिष्टाचारलङ्घनन्तु लोकानुकम्पार्थमेव न तु स्वैराचारानुरोधादिति ध्येयम्।

१ (क) "यो भिक्खवे अञ्ञोपि अञ्ञतित्थियपुब्बो इमस्मिं धम्मविनये आकङ्खति पब्बज्जं आकङ्खति उपसम्पदं तस्स चत्तारो मासे परिवासो दातब्बो" (महावग्गे १।३८।१)

(ख) "ये ते भिक्खवे अग्गिका जटिलका ते आगता उपसम्पादेतब्बा, न तेसं परिवासो दातब्बो। तं किस्स हेतु। कम्मवादिनो एते भिक्खवे किरियवादिनो।" (महावग्गे १।३८।११)

२ "नहि भवं गोतमो ब्राह्मणे जिण्णे वुड्ढे महल्लके अद्धगते वयो अनुप्पत्ते अभिवादेति वा पच्चुट्ठेति वा आसनेन वा निमन्तेति। तयिदं भो गोतम न सम्पन्नं एवाति। नाहं तं ब्राह्मण पस्सामि सदेवके लोके समारके सब्रह्मके सस्समण ब्राह्मणिया पजाय सदेवमनुस्साय यं अहं अभिवादेय्यं × × ×। यं हि ब्राह्मण तथागतो अभिवादेय्य वा पच्चुट्ठेय्य वा आसनेन वा निमन्तेय्य मुद्धापि तस्स विपटेय्याति।" (सुत्तविभङ्गे, पाराजिके १।१।२)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इदमप्यालोचनीयं यदनेन खलु महात्मना ब्राह्मण्यसम्पादकानां धर्म्माणां निर्वचनावसरे शिष्टाचारमनुसृत्यैव तपसा श्रुतेन चैं सार्द्धं योनेश्चापि परिगणना कृता। अत्रेदं मन्तव्यं यदुद्धृतायां गाथायामुद्देश्यविधेयरूपेणोपन्यस्ताभ्यां ब्राह्मणशब्दाभ्यां व्यज्यते- जन्मना ब्राह्मणस्यैवोक्तविधगुणयोगाद् ब्रह्मवादयोग्यत्वमन्यथोद्देश्यत्वेनोपस्थापितस्य ब्राह्मणशब्दस्य निरर्थकत्वमापद्येत।

धर्म्मपदार्थख्यापनप्रवृत्तेन तेन ऋषिभाषितस्यापि[1] धर्म्मत्वेनाङ्गीकारः कृतः। येन च ऋषीणामपि सत्यदर्शित्वादिधर्मदेशनोपयोगिगुणयोगोऽप्यस्यानुमत आसीदिति व्यज्यते। ये खलु पुरावृत्तग्रन्थरचयितारः स्वेषु ग्रन्थेषु भगवन्तं बुद्धं शिष्टाचारप्राप्ताधिकारिभेदप्रयुक्तस्य धर्म्माचारयोर्भेदस्यापलापकत्वेन[2] वर्णयामासुस्ते परप्रत्ययनेयबुद्धयो दयनीयाः। यतो विदितमेवैतद् बौद्धविनयरसिकानां यद् भगवता बुद्धेन तु सहस्रशोऽधिकारिभेदाद् धर्म्माचारयोर्भेदोऽभ्युपेत इत्यत्रैव विरमामः।

---

१ 'धम्मो नाम बुद्धभासितो सावकभासितो इसिभासितो' इत्यादि। (सुत्तविभङ्गे, पाचित्तिये ४।२)

२ लेखस्य प्रथमा टिप्पणी द्रष्टव्या तुलनीया चानया-'यो पनभिक्खु अनुपसम्पन्नं पदसो धम्मं वाचेय्य पाचित्तियन्ति' (सुत्तविभङ्गे, पाचित्तिये ४।१)

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS



महीधरसङ्ग्रहः ।

श्रीव्रजवल्लभद्विवेदः ।

शुक्लयजुर्वेदभाष्यकारस्य महीधरस्य समयविषये द्वे मते वर्तेते । श्रीसत्यव्रतसामश्रमिमहोदयैः स्वीये 'निरुक्तालोचने' तस्य समयो विक्रमद्वादशशताब्दीचतुर्थपाद इति निरणायि । तथाहि—

"तथा शुक्लयजुर्भाष्यप्रणेता महीधरमिश्रः खलु सायणमाधवयोरग्रज इत्यपि ध्रुवम् ; महाराजजयचन्द्रप्रदत्तदानपत्रतो महीधरपौत्रस्य १२३२ संवत् समायामवस्थित्युपलब्धेः । तथाहि तत्ताम्रशासनत एवेह किञ्चिदुद्धरामः—'यश्चोपरिलिखितग्रामौ सजलस्थलौ सलोहलवणाकरौ समत्स्याकरौ सगर्तोषरौ सगिरिगहननिधानौ समधूकाम्रवनवाटिकाविटपतृण + तिगोचरपर्यन्तौ सोर्द्ध्वाधश्चतुराघाटविशुद्धौ स्वसीमापर्यन्तौ द्वात्रिंशदधिकद्वादशसंवत्सरे भाद्रे मासि शुक्लपक्षे त्रयोदश्यां तिथौ रविदिने, अङ्कतोऽपि संवत् १२३२ भाद्रसुदि १३ रवौ, अद्येह श्रीमद्विजयवाराणस्यां गङ्गोदकेन स्नात्वा .... महापण्डितश्रीमहीधरपौत्राय महामिश्रपण्डितश्रीहालेपुत्राय महापण्डितश्रीहृषीकेशशर्म्मणे ब्राह्मणाय....प्रदत्तौ मया' इत्यादि । मुद्रितञ्चैतत्पत्रं ताम्रफलकतः 'काशीविद्यासुधानिधौ' (सितम्बर, १८६६)

नन्वेवं महीधरीयप्रथममङ्गलाचरणवाक्यत एव यदवगम्यते माधवीयभाष्यस्य च ततः प्राचीनत्वं 'भाष्यं विलोक्यौवटमाधवीयम्' इति; अस्य का गतिरिति चेत्, अत्र वच्मि देवराजेनापि दृष्टं प्राचीनतरमेव माधवीयभाष्यं तत्र प्रमाणिकत्वेनोपन्यस्तं महीधरेणेति । इह हि नैघण्टुकनिर्वचने उद्धृतानां माधवीयभाष्यवचनानामेकमपि नोपलभ्यते सायणमाधवीयेऽस्मद्दृष्टभाष्ये, अत आसीदेव तदानीं तद्भाष्यान्तरं

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

माधवीयं नामेत्यत्रास्ति किं विचार्यम् ? वाजसनेयिसंहिताभाष्ये यदवोचन्महीधरो माधवस्त्वित्यादि (१३।४५) तदपि न सायणमाधवीयवचनमिति च ध्येयम् ।

तदेवं १२३२ संवत् समायां स्थितस्य हृषीकेशस्य पितामहो महीधरः प्रायो द्वादशशताब्दीचतुर्थपादे (सं० ११७६-१२००) प्रणिनाय वेददीपं नाम शुक्ल-यजुर्भाष्यमित्यनुमानञ्च भवेन्नासङ्गतम् ।" [निरुक्तालोचन-दो, दौ]

तथैव डा० लक्ष्मणस्वरूपमहोदया अपि 'इन्डाइसेज़ एन्ड अपेन्डाइसेज ऑफ् दि निरुक्त' नामकपुस्तकभूमिकायां ७३-७४ पृष्ठयोस्तमेव का स्वीकृतवन्तः । निरुक्तालोचना-पेक्षयैतदधिकं तत्र वर्तते—

"कन्नौजराज्याधिपतिना महाराजाधिराजजयचन्द्रदेवेन मातापित्रोरात्मनश्च पुण्ययशोभिवृद्धये शार्करक्षगोत्राय भार्गवच्यवनाप्रवानौर्व्वजामदग्न्येतिपञ्चप्रवराय महापण्डितश्रीहृषीकेशशर्म्मणे ब्राह्मणाय राजपुत्रहरीश्चन्द्रनामकरणमहोत्सवे द्वौ ग्रामौ ताम्रपत्रोपरि लिखित्वा दत्तावास्ताम्। एष च ताम्रलेखः 'इण्डियन एन्टिक्वेरी' नामके पत्रेऽपि (भाग० १८, पृ० १२६-१३४, सन् १८८६) मुद्रितो वर्तते, वाराणसीत उत्तरपूर्वदिशायां स्थिते सिहवारनामके ग्रामे च उपलब्धः ।"

'ऑफ्रेख्ट' बृहत्सूचीपत्रे तु महीधरविषये एवं लिखितं वर्तते—

"रामभक्तस्य पुत्रः, रत्नाकरस्य पौत्रः, केशवसुतरत्नेश्वरस्य शिष्यो महीधरः काश्यां निवसति स्म, इमान्यधोलिखितानि पुस्तकानि च तेन प्रणीतानि ।

अद्भुतविवेकः	मातृकाक्षरनिघण्टुः
ईशावास्योपनिषद्भाष्यम्	योगवासिष्ठसारविवृतिः
एकाक्षरकोषः	रामगीताटीका
कात्यायनगृह्यसूत्रभाष्यम्	विष्णुभक्तिकल्पलताप्रकाशः
कात्यायनशुल्वसूत्रभाष्यम्	वाजसनेयिसंहिताभाष्यम् (वेददीपः)
नृसिंहपटलः	षडङ्गरुद्रभाष्यम्
पुरुषसूक्तटीका	सारस्वतप्रक्रियाटीका
मन्त्रमहोदधिः	सौत्रामणीविनियोगसूत्रार्थः
मन्त्रमहोदधिटीका (नौका)	

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

एतेषु 'मन्त्रमहोदधिः' १६४५ विक्रमे वत्सरे, 'विष्णुभक्तिकल्पलताप्रकाशः' १६५४ विक्रमे वत्सरे लिखितो महीधरेण ।"

एतेन विक्रमसप्तदशशताब्द्या मध्यभागे महीधरस्य स्थितिः सिद्धा भवति ।

ऑफ्रेक्टसूच्याधारमेवाङ्गीकृत्य श्रीभगवद्दत्तमहाशया अपि स्वकीये 'वैदिक वाङ्मय का इतिहास' नामके हिन्दीभाषापुस्तके श्रीसत्यव्रतसामश्रमि–डा०लक्ष्मणस्वरूपयोर्मतं निरस्य विक्रम-सप्तदशशताब्द्या मध्यभागे महीधरस्य स्थितिं स्थिरीकृतवन्तः । तदित्थम्—

"महीधरः काश्यां निवसति स्म। 'प्रणम्य लक्ष्मीं नृहरिं गणेशं भाष्यं विलोक्यौवटमाधवीयम्' इत्यत्र मङ्गलश्लोके महीधरः सायणमाधवस्य स्मरणं करोति ।१३।४५ मन्त्रभाष्ये 'माधवस्तु पृथिव्या उपरिस्थादुत वा.......' इत्यादिना सायणमाधव-भाष्यमुद्धरति । यच्च डा० लक्ष्मणस्वरूपादिभिर्नेदं सायणमाधववचनमपि तु सायण-माधवातिरिक्तस्य वेङ्कटमाधवादेरिदं वचनं भविष्यतीत्युक्तम् ; तन्न, पूर्वोक्तस्थले महीधरेण यावत्यः पङ्क्तय उद्धृतास्तासां सर्वासां स्वल्पेन पाठभेदेन सह सायण-माधवस्य काण्वसंहितायाश्चतुर्दशाध्यायस्य चतुर्थानुवाकभाष्ये सद्भावोपलब्धेः । अतो मङ्गलाचरणे माधवपदेन सायणमाधवस्यैव ग्रहणम् , सायणमाधवभाष्यस्यैव चोद्धरणं महीधरेण दत्तमिति सिद्धयति ।

ऑफ्रेक्टसूचीतो ज्ञायते यन्मन्त्रमहोदधिकारो वेददीपकारश्च एक एव महीधरः । उभयोः पुस्तकयोर्मङ्गलश्लोकदर्शनेनैतत्स्पष्टतरं भवति । वेददीपस्य मङ्गलश्लोक उपरि दत्त एव, मन्त्रमहोदधौ च 'प्रणम्य लक्ष्मीं नृहरिं महागणपतिं गुरुम्' इत्येवं वर्तते । अत्रोभयोरपि मङ्गलश्लोकयोः समानदेवतानमस्कारदर्शनादवगम्यते एक एवानयोर्निर्मातेति । मन्त्रमहोदधौ च महीधरेण ग्रन्थसमाप्तिकाल इत्थं दत्तः—

'अब्दे विक्रमतो जाते बाणवेदनृपैर्मिते ।
ज्येष्ठाष्टम्यां शिवस्याग्रे पूर्णो मन्त्रमहोदधिः ॥'

मन्त्रमहोदधिटीकायां नौकायां तस्य व्याख्यानमित्थं कृतम्—'पञ्चचत्वारिंशदु-

त्तरषोडशशततमे विक्रमनृपाद्गते सति...........' इति । वेददीपनिर्माणकालोऽप्यस्य समीप एव स्वीकर्तव्य इत्येवमुपरि प्रतिज्ञातः समयो महीधरस्य सिद्धयति ।"

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

इत्थं महीधरसमयविषये द्वे मते वर्तेते। तयोः कतरत् समीचीनमेष एवात्र विचारणीयो विषयः। उभयोरपि मतयोर्महीधरः काशीनिवासीति सुनिश्चितमेव। 'भाष्यं विलोक्यौवटमाधवीयम्' इति मङ्गलश्लोकतो ज्ञायते यद् उवटभाष्यं माधवभाष्यञ्च दृष्ट्वा महीधरः स्वकीयं शुक्लयजुर्वेदभाष्यं प्रणिनाय। तत्र उवटभाष्यवन्माधवभाष्यमपि शुक्लयजुर्वेदस्यैव मन्तव्यम्। तेनैव तत्र साहाय्योपलब्धिसम्भवात्, साहचर्याच्च। न हि सायणमाधवातिरिक्तेन केनचिन्माधवेन शुक्लयजुर्वेदस्य प्रणीतं भाष्यं विद्यते। वेङ्कटमाधवस्य भाष्यन्तु ऋग्वेदस्योपरि विद्यते। एतदेव 'प्राचीनतरम्' वेङ्कटमाधवीयं भाष्यं देवराजेन दृष्टम्, स्वकीये 'नैघण्टुकनिर्वचने' च तेनास्यैवोद्धरणं कृतम्। तानि च ऋग्वेदभाष्यवचनानि सायणमाधवीये शुक्लयजुर्भाष्ये नोपलभ्यन्त इति तूचितमेव। तस्माद् 'भाष्यं विलोक्यौवटमाधवीयम्' इत्यत्र माधवीयपदेन सायणमाधवभाष्यमेव ग्रहीतव्यम्। स्वल्पेन पाठभेदेन सहात्र १३। ४५ मन्त्रे सायणमाधवभाष्यमुद्धृतं वर्तत इति पूर्वमुक्तमेव। तथा च महीधरो न सायणमाधवयोरग्रजः, अपि तु पश्चाद्भव एवेति। एवञ्च वेदभाष्यकारो महीधरभट्टस्ताम्रपत्रोद्धृतहृषीकेशपितामहमहीधरमिश्रतो भिन्न एवेति स्वीकर्तव्यम्।

अत्र दृढतरमेकं प्रमाणं दीयते। वाराणस्यां कालभैरवमन्दिरसमीपे घासीटोलाख्ये स्थाने एकस्मिन् गृहे नृसिंहभगवतः प्राचीना मूर्तिर्वर्तते। एतच्च गृहं वेदभाष्यकारस्य महीधरस्येति तत्र सुप्रसिद्धतरम्। महीधरकुले श्रीनृसिंह इष्टदेव आसीत्, अत एव महीधरः सर्वत्र ग्रन्थारम्भे तस्य स्मरणं करोति। यद्यप्यधुना महीधरकुले कोऽपि पुरुषो न वर्तते—अन्तिमपुरुषस्य वाराणस्यां प्रसिद्धतरस्य श्रीदामोदरवैद्यस्य पुत्री जयपुरनगरे विवाहिता वर्तते—तथापि श्रीदामोदरवैद्यमित्रस्य श्रीचुन्नीलालवैद्यस्य कनिष्ठभ्रातुः श्रीमुन्नीलालौदीच्यस्य संरक्षकतायां नृसिंहपूजादिकं सर्वविधकार्यजातमधुनाऽपि सम्पद्यते। अस्मिन् कुले बहूनि हस्तलिखितानि पुस्तकान्यासन्। तेषु वैदिकसाहित्यस्य विशिष्टपुस्तकानि काशीस्थराजकीयसंस्कृतमहाविद्यालयस्य भूतपूर्ववेदाध्यापकैः श्रीविजयचन्द्रमहोदयैः कुत्रचिन्नीतानीति श्रीनारायणशास्त्रिखिस्तेमहोदयसकाशाज्ज्ञातम्। अवशिष्टानि पुस्तकानि च १९३१ईशवीये वर्षे श्रीनारायणशास्त्रिभिरेव सरस्वतीभवनाय क्रीतानि। अस्मिन् सङ्ग्रहेऽधुनापि सार्द्धद्विसहस्रपरिमितानि पुस्तकानि विद्यन्ते। अस्य सङ्ग्रहस्य च नाम 'महीधरसङ्ग्रहः' इत्येव कृतं वर्तते। अत्र बहूनि पुस्तकानि महीधरहस्तलिखितानि, कानिचिच्च महीधरेण क्रीतान्यपि वर्तन्ते। पुस्तकानां लेखनसमयश्च विक्रमसंवत्

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

१६३०तः१६६८ पर्यन्तं विद्यते। तत्र बहुषु स्थलेषु महीधरेण स्वनाम 'महीदास' इति धृतं वर्तते। ऑफ्रेक्टबृहत्सूच्यामप्युक्तमेव—'महीदास इति सुप्रसिद्धतरस्य महीधरस्यैव अपरं नाम' इति।

महीधरसङ्ग्रहस्थसामग्रीतो महीधरविषये पर्याप्तः प्रकाशः पतति, अतः सा सर्वा सामग्री क्रमेणात्र सङ्गृह्यते।

(३९) अङ्काङ्कितायां 'पदस्वरचर्चायां' विंशतितमे पत्रे–'संवत् १६३१ वर्षे आषाढ बदि ५ बुधे। महीदासो व्यलेखीत्।' समाप्तौ च—

"नरहरिः सकलाघविनाशनो रविहिमांशुहुताशनलोचनः।
नर····यात्मजया परिचुम्बितोऽवतु जनं निजसेवनतत्परम्॥"

(४०) अङ्काङ्कितस्य 'वेदाङ्गचतुष्टयस्य' मुखपृष्ठे–'भट्टश्रीमहीधरस्य पुस्तकमिदं दत्तं भानुदेवोपाध्यायमहादेवाभ्याम्। शुभं भूयात्।' मध्ये यत्र तत्र टिप्पणीरूपेण महीधरहस्तलेखो विद्यते। अन्तिमपृष्ठे च—'श्रीमद्दिव्यलक्ष्मीनृसिंहो जयति। इदं पुस्तकं श्रीमत्परमतार्किकभट्ट-श्रीवेणीदत्तस्येति ज्ञातव्यम्।'

(४२) अङ्किते सर्वानुक्रमणीभाष्ये—'संवत् १६३१ वर्षे आषाढ सुदि रवौ महीदासेन काश्यामनुक्रमणीभाष्यं क्रीतं विप्रसन्निधौ। ············' पुस्तकमध्ये यत्र तत्र महीधरेण टिप्पणी लिखिता। खण्डितपत्राण्यपि पूरितानि। २०७ सङ्ख्याकेऽन्तिमपत्रे च—

"भूरामाङ्गधरामितेऽब्दे इषमास्यन्त्ये दले वह्न्यहे
वारेऽर्कस्य च नीलकण्ठनगरे भूदासनामा पठन्।
सर्पच्छत्रधरामरान्वयभवो विद्वन्फनूनन्दनोऽ-
क्रीणात् स्वीयकृते नृसिंहभजनेऽनुक्रान्तिभाष्यं रतः॥१॥
शिवा नीलकण्ठो गजास्यो नृसिंहो रविर्दण्डपाणिर्गुहो भैरवोऽजः।
कलिन्दात्मजा जाह्नवी ब्रह्मपुत्री महीदासविप्रं सदावन्तु काश्याम्॥२॥
श्रीभानुदीक्षित इति प्रथिताभिधानो नारायणो द्विजवरः कमलाकरश्च।
श्रीकृष्णपण्डितवरः पुरुषोत्तमश्च गोपीति शास्त्रजलधौ कलशोद्भवो यः॥१॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

वेदाङ्गशास्त्रकुशलः खलु माधवो यो ज्ञश्चैकनाथ इति वामनवासुदेवौ ।
सोमेश्वरो द्विजवरो बुधभानुदेवो यश्चेन्द्रनन्दनगुरुर्बुधविश्वनाथः ॥२॥
श्रीमुद्गलो द्विजवरः खलु रामविज्ञोऽनन्ताह्वयः शिवपुरीवसतिं करा ये ।
ये माधवप्रभृतियोगिवराश्च काश्यां ते मां स्मृताः सकलदुःखहराः प्रपान्तु ॥'

(४७) उपनिषत्सङ्ग्रहः । अत्र महीधराक्षराणि कतिपयस्थानेषु टिप्पणीरूपेण लिखितानि दरीदृश्यन्ते ।

(२५५) अङ्कितो ग्रन्थः (३५६१) अङ्कितस्य पुस्तकस्य प्रारम्भांशो विद्यते । अनवधानेन द्वयोः स्थानयोः स्थापितः ।

(२५४३) आचार्यहेमचन्द्रविरचितोऽनेकार्थसङ्ग्रहः । अत्र ४७ तमे पत्रे—'संवत् १६५१ वर्षे फाल्गुन सुदि १३ बुधे महीदासेन काश्यामलेखि श्रीनृसिंहप्रीत्यै ।' ६४ तमे पत्रे च—

"नेत्रेष्वङ्गधरामिते तु समये श्रीविक्रमार्काद्गते
चैत्रे मासि सिते दले फणितिथौ वारे गुरोर्वह्निभे ।
विश्वेशे पुटभेदने समलिखद् भूदासविप्रस्त्विमान्
नानार्थान्स्वपरोपकारविधये पौत्रादिपाठाय च ॥१॥

संवत् १६५२ वर्षे चैत्रशुक्लपञ्चमीगुरौ महीदासेन काश्यामनेकार्थसङ्ग्रहोऽलेखीश्वरप्रीत्यै ॥ श्री ॥

श्रीमन्नृसिंहो जगदेकवन्द्यः सुधाकराभो रमया समेतः ।
सुनीलकण्ठो चरचक्रचापाभयानि बिभ्रद् भजतां श्रियेऽस्तु ॥ १ ॥
हरिशम्भुस्मरक्रोडैः सपत्नीकैश्चतुर्दिशम् ।
सेवितः सततं भूयान्महागणपतिः श्रिये ॥ २ ॥"

(२५४४) अशोकत्रिरात्रव्रतम् । अन्तिमे पत्रे—'संवत् १६४६ आश्विनशुक्लचतुर्दश्यां महीदासेनालेखि ।'

(२५४५) उत्तरतापनीयोपनिषद्दीपिका । मुखपृष्ठे—'संवत् १६४० वर्षे काश्यां महीदासेन उत्तरतापनीयदीपिका क्रीता ।' अन्तिमपृष्ठे—'महीदासेन क्रीतं काश्यां संवत् १६४० वर्षे स्वपाठाय, तेन नरकेसरी प्रीयतां श्रीनृसिंहः ।'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२५४६) काव्यादर्शटीका । (प्रथमद्वितीयपरिच्छेदौ) प्रथमपत्रे—

"गणेशं नृहरिं श्रीशं वाणीं गिरिशमद्रिजाम् ।
प्रणम्य विलिखाम्येतत् काव्यादर्शस्य टिप्पणम् ॥
तं वन्दे यस्य नखरैरुत्पलादपि कोमलैः ।
शिक्षितं दृप्तदैत्येन्द्रवक्षः पाटनपाटवम् ॥"

एकादशे पत्रे—

"गणेशं नृहरिं वाणीं रमां नत्वा महीधरः ।
दण्डिद्वितीयकोल्लासे टीकां लिखति बुद्धये ॥"

(२५४७) काव्यादर्शटीका । (तृतीयपरिच्छेदः) प्रथमपत्रे—

"गणेशश्रीनारसिंहान् नत्वा दण्डितृतीयके ।
उल्लासे लिख्यते टीका यमकालङ्कृतौ शुभा ॥"

पञ्चविंशतितमेऽन्तिमे पत्रे—

"वाणाङ्काङ्गेन्दुब्द ऊर्जे शिवाहे कृष्णे काश्यां भूमिदासो व्यलेखीत् ।
काव्यादर्शे भाष्यमेतद् बुधोक्तं स्वीयालोकायोपकाराय यत्नात् ॥
श्रीनृसिंह रमानाथ नीलकण्ठ त्रिलोचन ।
त्वत्पादपद्मयोः स्वामिन् षट्पदं कुरु मां सदा ॥"

(२५४८) गरुडपुराणम् । अन्तिमे पत्रे—"श्रीमन्नृकेसरिणे नमः । गुणनिगमरसक्ष्मासम्मिते हायनेशे धवलमदनघस्रे फाल्गुने मासि काश्याम् । इह गरुडपुराण··· खण्डं व्यलेखीन्महिध····जन्मा माधवस्तेन तुष्यात् ॥ महीदासः पूर्णम·······"

(२५५०) नलोदयकाव्यम् । अत्र महीधरेण टिप्पणी कृता । अन्तिमपत्रे—'महीदासोऽलिखत् काश्याम्·······' अन्तिमपृष्ठे च—'भट्टश्रीमहीदासस्य नलोदयम् ।'

(२५५१) नारसिंहपूर्वतापनीयोपनिषत् षट्स्वरसामप्रकारश्च । प्रथमपत्रे—'इति षट्स्वरसामप्रकारोऽलेखि महीदासेन ।' अन्तिमपत्रे च—'महीदासोऽलिखत् काश्याम् । संवत् १६३४ चैत्र बदि १३'

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२५५३) नृसिंहपरिचर्या । (वैष्णवानुष्ठानपद्धतिः) मुखपृष्ठे—'संवत् १६४० वर्षे काश्यां महीदासेन क्रीता नृसिंहपरिचर्या स्वस्य पुत्रस्य च विलोकनाय ।' अन्तिमपत्रे—

"नभोवेदाङ्गभूवर्षे वाराणस्यामजार्चनाम् ।
महीदासः स्ववसुनाऽक्रीणात् प्रीत्यै हरेः शुभाम् ॥"

अस्य पुस्तकस्य महीधरेण स्वयमेव विषयानुक्रमणी रचिता—'इति नृसिंहपरिचर्यानुक्रमणिका महीदासेन कृता नृहरिप्रीत्यै, संवत् १६४७ वैशाखशुद्बुधे ।'

(२५५४) नृसिंहार्चनरत्नमाला । समाप्तौ—'महीदासेनालेखि काश्याम् ।'

(२५५५) पूर्वतापनीयोपनिषद्भाष्यम् । मुखपृष्ठे—'संवत् १६४० वर्षे काश्यामुपनिषद्भाष्यं महीदासेन क्रीतं पाठाय ।' अन्तिमपृष्ठे—'महीदासेन क्रीतं काश्यां संवत् १६४० वर्षे स्वपाठाय तेन नरकेशरी प्रीयताम् ।'

(२५५६) प्रक्रियाकौमुदीटीका ।

"रसशराङ्गधरामितवत्सरे ... शंभुदिने हरितुष्टये ।
व्यरचि कारकषट्कवृतिर्मुदा महिधरेण निजेक्षणहेतवे ॥"
"षडिषुषड्वसुधामितवत्सरे सहसि मासि सिते वसुवासरे ।
विवरणन्तु समासभवं मुदा निजकृते व्यलिखन्महिकिङ्करः ॥"

(२५५७) कात्यायनप्रणीतं प्रातिशाख्यसूत्रम् । समाप्तौ—

'संवत् १६३१ वर्षे कार्तिकशुक्लपञ्चम्यां महीदासः काश्यां प्रातिशाख्यमलेखीत् ।'

(२५५८) प्रातिशाख्यसूत्रभाष्यम् । समाप्तौ—'वाल्मीकिज्ञातीयेन शिवाख्येन लिखितमिदं भट्टमहीदासपठनार्थम् ।' अन्तिमपृष्ठे च—"स्वस्ति संवत् ।

चन्द्ररामरसभूमिहायने आश्विनाद्यदलविष्णुवासरे ।
विश्वनाथपुरि भूमिकिङ्करः प्रातिशाख्यविवृतिं त्वलीलिखत् ॥"

(२५५९) मन्त्रराजरहस्यदीपिका । समाप्तौ—'श्रीनृसिंहप्रीत्यै महीदासेनालेखि काश्याम् । सं० १६४१ आश्वि....' १६९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(२५६१) वैदिकीप्रक्रियाटीका । अस्य पुस्तकस्याद्यपत्रद्वयमनवधानतया (२५५) क्रमाङ्के पातितम् । समाप्तौ—

"स्वस्ति श्रीमति खाग्निषोडशमिते वर्षे सहस्ये सिते
वह्नेरह्नि सितस्य वासर इमां श्रीवैदिकीप्रक्रियाम् ।
श्रीब्रह्मर्षिसुगोत्रजः फनुसुतो नाम्ना महीकिङ्करः
श्रीविश्वेश्वरपत्तने समलिखल्लक्ष्मीपतेस्तुष्टये ॥"

(२५६२) ईश्वरकृष्णप्रणीता साङ्ख्यकारिका । समाप्तौ—

"वस्वङ्गाङ्गधरावर्षे शुचौ कृष्णे दिशा तिथौ ।
महीदासोऽलिखत् काश्यां साङ्ख्यं स्वीयावलोकने ॥
तेन श्रीनरपञ्चास्यः प्रीयतां रमया युतः ।"

(२५६३) स्वरप्रक्रिया । अन्तिमे पत्रे—

"श्रीमन्नागातपत्रद्विजकुलतिलको विश्वरत्नाकरस्य
सूनुर्भूमीतलेऽस्मिञ्जयति फनुबुधो रामचन्द्रैकचेताः ।
तत्सूनुर्भूमिदासोऽधिगिरिशनगरं स्वाञ्चले जाह्नवीये
स्वारीमेतां व्यलेखीत् स्वपठनकृतये प्रक्रियां विष्णुतुष्ट्यै ॥
खगुणाष्टिमिते वर्षे पौषान्त्याजदिने रवौ ।
महीदासोऽलिखत् काश्यां प्रक्रिया स्वर…"

एवमत्र त्रयोविंशतिपुस्तकानामुद्धरणानि दत्तानि । एतेषु (२५५, २५६१) अङ्काङ्किते पुस्तके वस्तुतो न भिन्ने, अपि त्वेकमेव पुस्तकं द्वयोः स्थानयोः स्थापितम् । एवञ्च महीधर-सङ्ग्रहे महीधरसम्बद्धानि द्वाविंशतिपुस्तकानि वर्तन्ते । तेषु पञ्चदशपुस्तकानि महीधरेण स्वय-मेव लिखितानि । चत्वारि पुस्तकानि तेन क्रीतानि । एकस्मिन् पुस्तके टिप्पणी कृता । क्रीत-पुस्तकेष्वपि तेन यत्र तत्र टिप्पणी कृता । एका पुस्तिकोपायने लब्धा, अपरा च तस्य पठनार्थं वाल्मीकिज्ञातीयेन शिवाख्येन लिखित्वा दत्तेति ।

एतदतिरिक्तास्तिस्रो लघुपुस्तिका महीधरहस्तलिखिता महीधरसङ्ग्रहादन्यत्र सरस्वती-भवन एव लेखकेनोपलब्धाः । तासां विवरणमिदम्—

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(१) कृत्यासूक्तम् । प्रथमपत्रे—'श्रीनृसिंहाय नमः । अथर्ववेदे दशमकाण्डादौ कृत्यासूक्तं त्रिवर्गं लिख्यते ।' द्वितीयपत्रे—'वाराणस्यां महीदासेनालेखि । संवत् १६४५ वर्षे ।'

(२) अथर्ववेदे दशमकाण्डे कृत्यासूक्तपदानि ।

(३) प्रत्यङ्गिराकल्पः ऋणधनचक्रञ्च ।

अत्र 'महीदास' इतिनाम्नः षड्विंशतिवारमावृत्तिः सञ्जाता, द्विवारं महीधरभूदासभूमिदासमहिधराणाम् , महिकिङ्करभूमिकिङ्करमहीकिङ्कराणान्त्वेकवारमेव । महीधरमहीदासावित्येव वास्तविके नामनी, भूदासादयस्तु श्लोकयोजनार्थमेवेति सुस्पष्टतरमाभाति । तत्रापि 'महीदास' इत्यपि वैनयिकं नाम प्रतीयते । तस्य वास्तविकन्तु नाम 'महीधर' इत्येव । मन्त्रमहोदध्यादौ तस्यैव सर्वत्र दर्शनात् प्रसिद्धतरत्वाच्च । महीधरस्य वैष्णवत्वात् 'महीदास' इति संज्ञा वैष्णवमतानुसारिणीत्यपि वक्तुं शक्यते ।

एष च महीधरो नृसिंहभगवतः परमभक्त आसीदिति लेखदर्शनत एव प्रतीयते । गणेशादीनामप्यैष यत्र तत्र स्मरणं करोति । मन्त्रमहोदधिसमाप्तावपि—

"राजा लक्ष्मीनृसिंहो जयति सुखकरं श्रीनृसिंहं भजेयं ।
दैत्याधीशा महान्तोऽहसत नृहरिणा श्रीनृसिंहाय नौमि ॥
सेव्यो लक्ष्मीनृसिंहादपर इह नहि श्रीनृसिंहस्य पादौ
सेवे लक्ष्मीनृसिंहे वसतु मम मनः श्रीनृसिंहाऽव भक्तम् ॥
विश्वेशो गिरिजा बिन्दुमाधवो मणिकर्णिका ।
भैरवो जाह्नवी दण्डपाणिर्मे तन्वतां शिवम् ॥"

इत्येवं लक्ष्मीनृसिंहविश्वेश्वरादीनां स्मरणं विदधाति ।

अत्र 'सर्पच्छत्रधरामरान्वयभवः' 'श्रीमन्नागातपत्रद्विजकुलतिलकः' इति द्वाभ्यामुद्धरणाभ्यां तेन स्वकीयकुलस्य परिचयो दत्तः । तथैव 'विद्वन्फनूनन्दनः' 'विज्ञरत्नाकरस्य सूनुर्भूमीतलेऽस्मिन् जयति फनुबुधो रामचन्द्रैकचेताः । तत्सूनुर्भूमिदासः' इत्याभ्यां स्वपितुः पितामहस्य च नामनिर्देशः कृतः । एतदेव तथ्यं मन्त्रमहोदधिसमाप्तौ स्थितैरेभिः श्लोकैरपि स्फुटीभवति —

"अहिच्छत्रद्विजच्छत्रो वत्सगोत्रसमुद्भवः ।
आसीद् रत्नाकरो नाम विद्वान् ख्यातो धरातले ॥

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

तत्तनूजो रामभक्तः फनूभट्टाभिधोऽभवत् ।
महीधरस्तदुत्पन्नः संसारासारतां विदन् ॥
निजदेशं परित्यज्य गतो वाराणसीं पुरीम् ।
सेवमानो नरहरिं तन्त्रग्रन्थमिमं व्यधात् ॥
कल्याणाभिधपुत्रेण तथान्यैर्द्विजसत्तमैः ।
सम्प्रार्थितः स्वमत्यासौ नाम्ना मन्त्रमहोदधिः ॥"

इयांस्तु विशेषः—महीधरो वत्सगोत्रसमुद्भवः, एष च संसारस्यासारतां विदित्वा निजदेशं परित्यज्य स्वयमेव वाराणसीमागत इति । पितृपितामहादीनां भूमिस्तु 'आनर्त' देश आसीदिति 'अहिच्छत्रद्विजच्छत्रः' इत्यादिना प्रतीयते । आनर्तदेशश्च सौराष्ट्रे द्वारावती-समीपस्थः प्रदेश उच्यते । स्कन्दपुराणीयनागरखण्डतो जातिभास्करीयनागरब्राह्मणोत्पत्तिप्रकरण-तश्च ज्ञायते यदानर्तदेशे कश्चिदहिच्छत्रनामको ग्राम आसीत् । अनेन ग्रामेणैव सम्बद्धयैकया कथया पिशुनहरापरपर्यायाहिच्छत्रवंशीयानां नागरब्राह्मणानामुत्पत्तिस्तत्र निर्दिष्टा विद्यते । पिशुनहरशब्द एव कालक्रमेण 'प्रश्नोरा' सञ्जातः । तथा चानर्तदेशीयः, अहिच्छत्रवंशीयः, नागरान्तर्गतपिशुनहरज्ञातीयः, वत्सगोत्रीयः, विज्ञरत्नाकरस्य पौत्रः, रामभक्तस्य फनूभट्टस्य पुत्रो महीधरः स्वदेशं त्यक्त्वा वाराणस्यामागत इति सिद्ध्यति ।

ऑफ्रेख्टबृहत्सूच्यां महीधरस्य पितुर्नाम 'रामभक्त' इति दत्तमस्ति । तच्च न साधु । फनूभट्ट इत्येव तस्य नाम । स च रामचन्द्रस्य भक्त आसीदिति 'रामचन्द्रैकचेताः' इत्यादिना स्पष्टं प्रतीयते । एवञ्च मन्त्रमहोदधौ 'तत्तनूजो रामभक्तः फनूभट्टाभिधोऽभवत्' इत्यत्र विशेषणतया समागतो रामभक्तशब्द एव ऑफ्रेख्टसूच्यां मुख्यनाम्ना दत्त इति प्रतीयते ।

ऑफ्रेख्टसूच्यां महीधरस्य गुरोर्नाम रत्नेश्वर इति दत्तम्, स च केशवस्य पुत्र इति । उपर्युद्धृतायां सामग्र्यां महीधरस्य प्रकाशितेषु ग्रन्थेषु चैतन्नाम न दृश्यते । यद्यपि (४२) अङ्काङ्किते पुस्तके 'श्रीभानुदीक्षित इति प्रथिताभिधानः' इत्यादिना बहूनां विदुषां नामान्युट्टङ्कि-तानि किन्तु तत्र रत्नेश्वरः केशव इति वा नाम न दृश्यते । गुरोर्नामधेयस्य कुत्रापि चर्चा नास्तीत्यस्य किं कारणमिति न जानीमः ।

महीधरस्य पुत्रस्य नाम 'कल्याण' आसीदिति मन्त्रमहोदधिस्थश्लोकेन ज्ञायते । एष च

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

कल्याण आयुर्वेदीयबालतन्त्रनामकग्रन्थस्य प्रणेताऽऽसीदिति ऑफ्रेख्टसूचीतो ज्ञायते। यतो हि तत्र बालतन्त्रग्रन्थस्य प्रणेता कल्याणो महीधरस्य पुत्र इति स्पष्टमेवोक्तम्।

महीधरस्य पौत्रः प्रसिद्धो महानैयायिको वेणीदत्त आसीदित्येषा जनश्रुतिरत्र विद्यते। महीधरसङ्ग्रहस्य (४०) अङ्काङ्किते पुस्तके 'इदं पुस्तकं श्रीमत्परमतार्किकभट्टवेणीदत्तस्येति ज्ञातव्यम्' इति लिखितं विद्यते। इदञ्च पुस्तकं महीधराय भानुदेवोपाध्यायमहादेवाभ्यां दत्तम्। तस्मिन्नेव पुस्तक उपर्युक्तं वाक्यमपि भिन्नाक्षरेण लिखितं विद्यते। तेन ज्ञायते यद् भट्टवेणीदत्तेन महीधरसम्बन्धिना भाव्यमिति। तेन च वेणीदत्तो महीधरस्य पौत्र इति नामूलेयं जनश्रुतिरित्यपि कथयितुं पार्यते।

महीधरेण वैदिकप्रक्रियाटीका स्वरप्रक्रिया च १६३० मिते विक्रमे वत्सरे लिखिता। १६२८ तमे वत्सरे लिखितं वेदाङ्गचतुष्टयपुस्तकमस्मिन्नेव समय उपायने लब्धम्। १६३१ मिते वत्सरे च सर्वानुक्रमणीभाष्यं प्रातिशाख्यसूत्रञ्च लिखितम्। अस्मिन् समये यदि महीधरो विंशतिवर्षवयस्कः स्वीक्रियेत तर्हि तस्य जन्मकालः १६१० विक्रमवत्सरसमीपे समायाति। एवमेव तेन काव्यादर्शटीका १६६५ मिते वर्षे लिखिता, १६६८ तमे वत्सरे च साङ्ख्यकारिका। एवञ्च १६१० विक्रमवत्सरतः १६६८ वत्सरपर्यन्तं महीधरस्य स्थितिः साधु सिद्धा भवति। तथा च ऑफ्रेख्टभगवद्दत्तमहोदयाभ्यां स्वीकृत एव महीधरसमयः साधु। सत्यव्रतसामश्रमि-डा० लक्ष्मणस्वरूपमहोदययोर्मतन्तु न शोभनमित्यनयोपर्युद्धृतया सामग्र्या निर्विवादरूपेण सिद्ध्यति।

अस्मिन् महीधरसङ्ग्रहे यद्यपि महीधरलिखितानि बहूनि पुस्तकान्युपलभ्यन्त तथापि ऑफ्रेख्टसूच्यनुसारं महीधरप्रणीतेषु सप्तदशसु ग्रन्थेषु मध्ये एकमपि पुस्तकं तेन लिखितमत्र नोपलभ्यत इति महान् खेदस्य विषयः। चत्वारः पञ्च वा महीधरप्रणीता ग्रन्था अत्रोपलभ्यन्ते। तेऽप्यत्याधुनिकलेखकलिखिता इति साम्प्रतमेतावदेवोक्त्वा विरम्यते।

———

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सम्पादकीयम्

सुस्वागतम्

अद्य परमहर्षस्यावसरो यद्वयं काशिकराजकीयसंस्कृतमहाविद्यालयस्य पञ्चमदीक्षान्तपर्वणि समागतानां महाभागानां परमोल्लासेन स्वागतं कुर्मः। दीक्षान्तसमारोहेषु प्रथमोऽयमवसरो यद्वयमुत्तरप्रदेशीयराज्यपालानां महामान्यश्रीमोदीमहोदयानां साभापत्यमवाप्यात्यन्तं गौरवमनुभवामः। एष शुभयोगो महाविद्यालयस्यास्याभ्युदयाय भविष्यतीत्याशास्महे। संस्कृतविद्यां स्वगौरवं प्रापयितुं सर्वदा यतमानानां शिक्षासचिवानां श्रीसम्पूर्णानन्दमहाभागानाम्, आचार्यनरेन्द्रदेवप्रभृतिमहाविदुषाम्, दीक्षान्तभाषणकर्तॄणां वैयाकरणपुङ्गवानां श्रीसभापत्युपाध्यायमहोदयानाम्, अन्येषां शिक्षाधिकारिणामादरणीयविदुषां नागरिकाणाञ्च—यैः स्वीयामूल्यसमयमविगणय्य, यात्राकष्टादिकञ्च सहर्षं सोढ्वैष महोत्सवः सफलीकृतः—सविनयमभिनन्दनं कुर्मः।

श्रद्धाञ्जलिः

मार्गशीर्षशुक्लसप्तम्यां शुक्रवासरे प्रातः सार्द्धनववादनसमये मुम्बापुर्यां भारतराष्ट्रशिल्पिनो लौहपुरुषस्य सरदारवल्लभभाईपटेलमहोदयस्य नश्वरो देहः पञ्चतत्त्वेषु विलीनः। नवार्जितस्वातन्त्र्यस्य देशस्योपरि द्वितीयोऽयं दारुणः प्रहारः। राष्ट्रपितुर्महात्मगान्धिनोऽवसानसमये स्तम्भायमानावास्तामस्य राष्ट्रस्य जवाहरपटेलौ, अधुना तस्याभावमाधारपातमिव मेने एष विशालो देशः। विषमा साम्प्रतिकी जागतिक्यवस्था, यस्यां स्थिरदृढनिश्चयिनो महाप्राणस्यास्यातीवावश्यकता आसीत्। ईदृश एव समये पटेलमहोदयस्य परिनिर्वाणं महते कष्टायाहिताय चाभवत्।

१७४ भारतीयस्वातन्त्र्यसङ्ग्रामस्य सुदृढं नेतृत्वं सम्पादयतानेन सरदारपदमलङ्कुर्वाणेन देशस्याखण्डत्वमेकत्वञ्च स्थापितम्। भारतीयेतिहासे समुद्रगुप्तस्य बृहत्तरभारतापेक्षयापि

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुदृढं भारतं विधाय राष्ट्रस्य सार्वभौमस्वरूपं स्थिरीकृतम् । भूमण्डलस्याद्य यावदितिहासे रक्तहीनक्रान्तेः साफल्यं यदनेन लौहपुरुषेणावाप्तं तत्तुल्यं नाधिगच्छति ।

आकस्मिकेनानेन निधनेन खिन्नचेतसे राष्ट्राय भगवान् विश्वेश्वरो बलं शौर्यञ्च प्रयच्छतु येन तन्निर्दिष्टं मार्गमनुसरेत् । वयमेतस्य महापुरुषस्य चरणयोर्भावभरितं श्रद्धाञ्जलिमर्पयामः ।

सुषमाया भाविस्वरूपम्

सन्ति भारते तत्र तत्र प्रकाश्यमानाः काश्चित् संस्कृतपत्रिका या दारिद्र्यपीडिता इव कृशगात्राः कथञ्चिज्जनेषु सञ्चरन्ति । तत्पाठकाश्च तदङ्गानामुत्तरोत्तरकार्श्यं वीक्ष्य तासां लोपं प्रतिक्षणं प्रतीक्षमाणास्तिष्ठन्ति । लुप्ता इति वार्तामुपलभ्य न किञ्चिदाश्चर्यमनुभवन्ति । तासु काश्चित्कस्यचिदेकस्य विद्वद्वीरस्य वीर्येण पुरुषकारेण चानेकवर्षपर्यन्तं कृशाङ्गिन्योऽपि तेजस्विन्यो जीवन्ति । यथा दक्षिणभारते तिरुवाडिनगरे श्रीनिवासमुद्रणालये मुद्रिता मीमांसार्णव-मीमांसाकेसरि-श्रीताताचार्यशिरोमणिसम्पादिता 'उद्यानपत्रिका' याधुना त्रयोविंशतिं समाः समतिक्रम्य चतुर्विंशे संवत्सरे पादन्यासं कृतवती । एतादृशीभिः पत्रिकाभिर्यानि कृच्छ्राण्यनुभूयन्ते तत्र तत्प्रकाशनेऽपेक्षितस्य द्रव्यस्याभाव एव मुख्यं कारणम् । नेयं दशा सुषमायाः । काशिकराजकीयसंस्कृतमहाविद्यालयस्य मुखपत्रिकेयं राजकोशे कृतहस्तक्षेपा न दारिद्र्यमनुभवति । अस्मिन् विद्यालय एव कृताध्ययनानां काशीस्थविदुषामनुग्रहस्य सहयोगस्य चेयं भाजनम् । अतः केवलं पञ्चवर्षवयस्केयं भारते तत्र तत्र प्रकाश्यमानाः सर्वा अपि पत्रिका न केवलं पत्र-मुद्रणादिसौष्ठवरूपबाह्याकारेण, अपि तु प्रकाशितलेखानां विषयवैचित्र्येण भाषासौन्दर्येण चातिशेते ।

अस्य विद्यालयस्य यद् भाविस्वरूपं तदनुरूपं तन्मुखपत्रिकाया अपि स्वरूपं भवितुमर्हति । विश्वविद्यालयो बुभूषुरयं विद्यालयः । विश्वविद्यालयमुखपत्रिकायाः किं स्वरूपं भवितुमर्हति । अस्य प्रश्नस्य प्रायेणेत्थमुत्तरं दीयेत–विश्वविद्यालयाध्यापकानामितरेभ्योऽयमेव विशेषो यत्ते न केवलमध्यापयन्ति, कस्मिंश्चिदनुसन्धानकर्मण्यपि व्यापृता भवन्ति । स्वशास्त्रे स्वविज्ञान-विशेषे वा यद् यदज्ञातं तत्त्वं तदाविष्करणे प्रवृत्ता भवन्ति । प्रश्नसमाकुलं भवति विमर्शकानां चेतः । प्रश्नसमाधाने या सामग्र्यपेक्षिता तत्सञ्चये सततं प्रयतमाना आसते । कुत्रोपलभ्यते सामग्रीति चेत् समाधित्सितप्रश्नस्वरूपानुसारेण विस्तृतेऽस्मिन् बाह्ये जगति वा स्वीय एव

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विचित्रचित्तवृत्तिजटिलेऽन्तरङ्गे वा परम्परागतलक्ष्यलक्षणोभयात्मकवाङ्मये वोपलभ्यते सा। एवं सञ्चितायाः सामग्र्या मननेन यानि तत्त्वान्याविष्क्रियन्ते तेषां कुत्रचित् प्रकाशनमावश्यकम्। अप्रकाशितं ह्यज्ञातकल्पं स्यात्। यत्संस्थाध्यापकैराविष्क्रियन्ते तत्त्वानि तत्संस्थामुखपत्रिकाया-मेवेदम्प्रथमतया प्रायेण तानि प्रकाश्यन्त इति स्वाभाविकमेतत्। यद्येतद्विद्यालयीयाध्यापका अनुसन्धानकर्मणि व्यापृता भविष्यन्ति तर्हि तैः समुत्प्रेक्षितान्याविष्कृतानि वा नूतनानि तत्त्वानि सुषमायां प्रकाशयिष्यन्ते।

पूर्वाचार्यैराविष्कृतानामेव तत्त्वानां कयाचिन्नवीनया लेखकस्य प्रातिस्विक्या दृष्ट्या शैल्या वा प्रकाशनमपि पत्रिकायां भवितुमर्हति। प्राचीनं तत्त्वमपि स्वानुभवप्रकाशितं नूतना-यते। प्राचीना अन्या अपि संस्कृतयः सन्ति पृथिव्याम्। भारतादन्यत्रापि शास्त्राणां विज्ञानानाञ्च विकासः पुराभूत्। अद्यापि च भवति। विदेशीयशास्त्रविज्ञानादिज्ञानं विदेशीयभाषाज्ञाना-धीनम्। विदेशीयभाषाज्ञानञ्च प्रायेण संस्कृताभिज्ञानां न भवति। तेषामन्यदेशीयशास्त्रविज्ञाना-दिप्रगतिज्ञानं यथा स्यादेतदर्थं सुषमायां तद्विषयका निबन्धा अप्यवश्यं प्रकाशयितव्याः। परन्तु निबन्धास्ते तैरेव रचयितव्या येषामेका द्वे वा तिस्रो वा पाश्चात्त्यभाषा वश्याः स्युः। यथा सिद्ध-रूपसमासचक्रादिग्रन्थमात्रपठनेन मुनित्रयकृतव्याकरणशास्त्रमहत्त्वबोधो न भवति तथा हिन्द्यादि-भाषासु ये पाश्चात्त्यविज्ञानादिविषयका ग्रन्था उपलभ्यन्ते तदवलम्बनेन रचितः संस्कृतभाषामय-निबन्धः पठ्यमानः पाठकानां तद्विज्ञानमहत्त्वबोधजननाय नालम्। कामवासनैव सर्वासामपि मानुषचित्तवृत्तीनां प्रवृत्तीनाञ्च निदानमिति मनोविज्ञानवित्-फ्रायडमतस्य गाम्भीर्यम्, येन याव-ज्जीवव्यापिभगीरथप्रयत्नकृतलक्ष्यपरीक्षणेन तत्त्वमिदं समुत्प्रेक्षितं तस्य महत्त्वञ्च हिन्दीभाषया लिखितस्य कस्यचिदपि तद्विषयकस्य लेखस्य ग्रन्थस्य वा पठनेन नावगन्तुं शक्यते। यथा एको रसः शृङ्गार एव इति भोजराजमते शृङ्गारो नाम न स्त्रीपुरुषयोः परस्परानुरागः, परन्तु किञ्चिदन्यत्तत्त्वम्, तथैव फ्रायडभिप्रेता कामवासनापि न स्त्रीपुरुषयोः सम्भोगेच्छा परं त्वन्यत् किंचित्तत्त्वम्। इदं तु फ्रायडरचितग्रन्थानां मूलतः परिशीलनेनैवावगन्तुं शक्यते।

एवं पूर्वाचार्यसमुत्प्रेक्षितानां तत्त्वानां नवीनया दृष्ट्या प्रतिपादनमनुसन्धानकर्मणि व्यापृतैरध्यापकैराविष्कृतानां तत्त्वानामिदम्प्रथमतया प्रकाशनं तत्तत्पाश्चात्त्यभाषासु प्रकाशितानां वैज्ञानिकानां तत्त्वानां तद्भाषाभिज्ञैर्विद्वद्भिः संस्कृतभाषयानुवाद इति त्रिविधा लेखा सुषमाया-मवश्यं प्रकाशमर्हन्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

अस्माकमीक्षणम्

'सूक्तसंग्रहः'

काशिकराजकीयसर्वविधशास्त्रिपरीक्षायामनिवार्यरूपेण
निश्चितानां षण्णां वैदिकसूक्तानां संग्रहः ।
प्राप्तिस्थानम्—२० नीचीब्रह्मपुरी, काशी ।

अत्र हि परीक्षायां निर्धारितानि दैर्घतमसं विष्णुसूक्तम्, वासिष्ठं विष्णुसूक्तम्, शौनःशेपं वरुणसूक्तम्, कौत्समुग्रःसूक्तम्, यजुर्वेदीयः शान्त्यध्यायः, अथर्ववेदीयं पृथ्वीसूक्तमिति संगृहीतानि सन्ति। प्रामाणिकं मुद्रणदृष्ट्याप्यत्युत्तमं संस्करणमिदं परीक्षार्थिनां सायणादिभाष्यानुकूलान्वयभाषानुवादाभ्यां सूक्तसारादिभिश्च विशिष्टमुपकारमावहन्नथायथं सायणस्कन्दस्वामिमहीधरपीयूषाभिधनानाभाष्यैः मन्त्रार्थदीपिकापीयूषकणिकाज्योत्स्नाविवृतिभिश्च सनाथीकृतं गवेषकाणां मन्त्रार्थमालोचयतां जिज्ञासूनामपि च कृते सातिशयमुपकरणं दधाति। अत्र हि प्रतिसूक्तमारम्भे ज्योत्स्नाविवृत्याः सूक्तर्षिच्छन्दोदेवताविनियोगानां प्रामाणिको विस्तृतो रुचिकरश्च परिचयो विद्यते। ग्रन्थस्यास्य परीक्षोपयोगित्वेन श्रीगोपालचन्द्रमिश्रस्य श्लाघ्योऽयं यत्नः ।

प्राप्तिस्थानम्—
पं० श्रीश्यामकुमारसिंह आचार्यः
भारतीयविद्याप्रचारसमितिः, आगरानगरम् ।

'कीदृशं संस्कृतम्'

पुस्तकमिदमनुरोधात्मकं समीक्षात्मकञ्च । आचार्याः श्यामकुमारसिंहाः संस्कृतस्य राष्ट्रभाषात्वसम्पादनाय प्रयत्नशीलाः। अतएव संस्कृते राष्ट्रभाषात्वक्षमत्वमानेतुं तेषामनुरोधः प्रस्तावश्च स्वाभाविकः। तन्मते संस्कृतस्य सर्वगुणसम्पन्नत्वमपि कैश्चिद् व्याकरणकठोरनियमैर्जनतयोपेक्ष्यते। ते दोषा यदि निराक्रियेरंश्चेत्तस्य राष्ट्रभाषात्वं शीघ्रं सम्पद्येत। अस्य विषयस्योपरि चिरं विचार्य महता श्रमेणाचार्यैश्चत्वारि सूत्राणि प्राणीयन्त । (१) असंहिता वाक्ये (२) द्विवचननिस्सारणम् (३) चतुर्लकाराः (४) विसर्गादर्शनम्। संहितायां वाक्ये विवक्षितत्वस्योक्तप्रायत्वान्नियमार्थोऽयं यत्नो वाक्येऽसंहितैवेति। एवं सर्वेषु। यदि संस्कृतस्य १७७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

लेखनोच्चारणाभ्यामिमे दोषा निष्कासिताः स्युस्तर्हि संस्कृतं सर्वजनप्रिया भाषा भवेत्। इमान् दोषानादधती संस्कृतभाषा महल्लेखनकाठिन्यं समुत्पादयति। विश्वस्यान्यासु भाषासु इमे दोषा न सन्तीति ता राष्ट्रभाषाक्षमाः सन्ति। मध्यकालिकैराधुनिकैश्च संस्कृतपण्डितैरेव श्लिष्टवाक्यप्रयोगं कृत्वा विसर्गद्विवचनादिप्रयोगबाहुल्यञ्च विधाय संस्कृते काठिन्यं समानीतमिति तैरेवाऽस्याः सारल्याय चतुःसूत्रीविहितनिर्दुष्टवाक्यप्रयोगरूपं प्रायश्चित्तं स्वीकरणीयम्। अन्यथा संस्कृतप्रचारह्रासरूपो दोषस्तेषां शिरस्येवापतेत्। संस्कृतप्रचारसमभिलाषुकैर्विपश्चिद्भिरत्र ध्यानं देयमेव।

गीर्वाणवाण्याः समभ्युदयाय समुद्यतानामेषां महानुभावानामेते संस्कृतप्रचारोद्बलकाः प्रस्तावाः संस्कृतस्य राष्ट्रभाषात्वजनने यदि वस्तुतः साहाय्यं दद्युस्तर्हि को नाम संस्कृतप्रसाराभिलाषुकः पुरुष एषां प्रस्तावानां विरोधं कुर्यात्? केषाञ्चिन्मते कस्याश्चिदपि भाषायाः सर्वजनप्रियत्वे राष्ट्रभाषाक्षमत्वे च संक्षेपेणेमानि कारणानि भवितुमर्हन्ति। भाषाभाषिणां महती सङ्ख्या, राजप्रश्रयः, विपुलं विविधञ्च साहित्यम्, भाषायाः प्रभविष्णुता, सर्वाङ्गीणसुन्दरं व्याकरणम्, विश्वभाषाभिस्तुलनायां तस्या गाम्भीर्यं दार्ढ्यञ्च। द्वितीयादृतेऽन्यानि सर्वाणि कारणानि संस्कृते सन्ति। राजप्रश्रयहीनेयं प्रतिपदं दुत्कारमावहति। श्रूयते स्वस्यावनतिदशायामात्मन्येव जना दोषोद्घाटनं कुर्वन्ति। बाह्यकारणमनवलोक्य अभ्यन्तरस्याकारणभूतस्यापि वस्तुनः कारणत्वमङ्गीकुर्वन्ति। संस्कृतविषये त्वियमुक्तिः साधु सङ्घटते। मूलं प्रतिबन्धकीभूतं कारणमनिवर्त्य कामं भूरिप्रयत्नो विधीयतां नाम कार्यसिद्धिस्तु दूरापास्तैव स्थास्यति, दूरे तिष्ठतु पराधीनकालिकी संस्कृतदशाकथा, स्वतन्त्रेऽपि भारते संस्कृतं न कस्मिंश्चिदपि प्रदेशेऽनिवार्यपाठ्यक्रमे निर्धारितमस्ति। एतादृशे विशाले हि देशे नैकोऽपि संस्कृतविश्वविद्यालयः प्रचलति। संस्कृतं राष्ट्रभाषाक्षममिति नामग्राहं यशोऽर्जनं क्रियते। यावान् राजप्रश्रयो राष्ट्रभाषार्थमपेक्ष्यते तच्छतांशोऽपि संस्कृतस्य कृते नास्ति। उदाहरणार्थं कस्मिंश्चिदेकस्मिन् प्रदेशे संस्कृतस्य राष्ट्रभाषात्वमनिवार्यपाठ्यत्वञ्चोद्घोष्य ततोऽस्य प्रायोगिकीस्त्रुटीः परिमार्जयेच्चेद् संस्कृतस्य कीदृक्त्वं प्राप्तकालं स्यात्। संस्कृतस्य व्यावहारिकं प्रगतिशालिस्वरूपञ्चापरीक्ष्य रोगोत्पत्तेः प्रागौषधोपचार इवायं यत्नः प्रतिभाति। राष्ट्रभाषोद्घोषात्

प्राक् संस्कृतस्याङ्गच्छेदः किञ्चिदसामयिक इव लगति। तदित्थं जाग्रति मतभेदे वैकल्पिकत्वस्य सर्वसम्मतत्वात् श्रीसिंहप्रोक्तानुरोधात्मकप्रस्तावराजप्रश्रयापेक्षयोः कतरेण समीचीनेन पथा

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

गन्तव्यमिति दोषज्ञा विचार्य निर्णायकपथं निर्दिशेयुरिति विश्वसिमः। समालोचनात्मकस्यास्य ग्रन्थप्रणयनेन लेखकस्य संस्कृते दृढानुरागस्तदभ्युदये च परममात्मसन्तोषश्चाभिव्यज्यते। संस्कृतसमाज एतदर्थं कृतज्ञतां न प्रदर्शयेत् ?

'देवकीदेवनम्'

प्रकाशकः—लक्ष्मी प्रेस, सदर मेरठ।
कविः-श्रीप्रभुदत्त स्वामी। मूल्यम् २)

'देवकीदेवनम्' इति नूतनं खण्डकाव्यम्। दान्तिक्रान्तिशान्तिनामानस्त्रयोऽध्याया अत्र सन्ति। अत्र करुणरसस्य प्राधान्यम्। कंसविमर्दिता देवकीमृतपुत्राश्चालम्बनम्। वसुदेव-देवक्यौ कंसेन बलान्निगृह्य कारागृहे निपातितौ। कंसव्यापादितान् स्वमृतपुत्राननुशोचन्ती देवकी सुदुःखिता क्रन्दनं करोति। वसुदेवश्च दैवानीतदुर्दशानिमग्नो दैवं कदर्थयन् ऐश्वर्य-कालिकान् भोगान् विविधसुखानि च संस्मरन् पराधीनतोद्विग्नस्तामेव गर्हयति—'अधीनता पापमहो महीयः' 'अपेक्षया नूनमधीनवृत्तेर्भवेऽत्र सर्वोऽपि भवत्यखर्वः' 'को वा स्वधर्मोऽन्यवशं-वदानाम्' इत्यादिना। स्वतन्त्रताया आशाऽपि पराधीनस्य जीवनम्। यथाह कविः—स्वतन्त्रतेतीदमहो महार्थं धात्राद्भुतं किञ्चिदभावि भूमौ। आशैव यस्या निरसून् मनुष्यान् करोति सासून् किमुताध्यवाप्तिः। किम्बहुना, स्वाधीनताभिलाषुकः सुधासञ्जीवनरसावप्युपेक्ष्य तदाशामेव बहु मन्यते, तस्याः स्वरूपाभिध्यानेनेतरयोश्च पानेन सुखजनकत्वात्। अमुतो देवकी स्वपुत्रघातुकत्वेन सूर्यचन्द्रनभोवारिदशुकहंसकपोतादीन् पुरो वर्तमानानाक्षिपन्ती समस्तप्रकृतिमेव विद्विषन्त्यात्मानं बहुशो धिक्कुर्वती प्राणांस्त्यक्तुमिच्छति। अस्यां स्थितौ वसुदेवो 'विपदि धैर्यमथाभ्युदये क्षमा' इत्युक्तिं स्फोरयन् महात्मनां विपत्सुलभं धैर्यमवलम्ब्य शोक-विषादादिभावोत्थमनर्थं नियन्तुं देवक्या मृत्युविषयिणीं भ्रान्तिं निरस्यन् द्वादशभिः श्लोकैर्मृत्युविज्ञानं निपुणं समुपदिशति। "दैवाधीना भवति जगतां जन्ममृत्युव्यवस्था बोभूयन्ते भुवि तनुभृतः कालवक्त्राभिपूर्त्यै। बोध्यः प्राज्ञैर्जगति मरणं मर्त्यजातस्य धर्मो यात्येवान्ते मरणजलधौ प्राणसिन्धुर्निपातम्॥ श्वासे श्वासे श्वसिति निभृतं प्राणिनां मृत्युरेव न स्यान्मृत्युर्यदि तनुभृतां जन्मनः क्वावकाशः" इत्यादि। देवकीं प्रबोधयन् मृत्योर्निष्कृष्टं स्वरूपं वर्णितं वसुदेवेन। अग्रे सुखदुःखयोः पर्यायगतिं संसारस्य परिवर्तनशीलताञ्च ध्यायन् भाविसुखस्यालोकं प्रतीक्षमाणः दुःखसहिष्णुत्वस्य तपोरूपत्वं निश्चिकाय। मनस्यहिंसां निधाय सत्यपणावावां

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

यदि कंसाय स्वपुत्रान् वधाय दद्वस्तन्नूनं तद्धृदयं द्रावयेत्। सत्याहिंसारूपेणावयोर्व्रतेन द्रवीभूतः क्रूरः कंसः स्वयमेवावां मोचयेत्। नो चेद्गाविजनान्दोलनेन स्थापिते प्रजातन्त्रे शासन आवां स्वत एव शीघ्रं विमुच्येवहीति कृतं विलापेन। इत्थं शान्ति प्रापिता देवकी कारामेव राजभवनममंस्त। कविपरिगृहीतवर्ण्यवस्तुदर्शनेनेदं स्पष्टं यत् कवेरुपरि तत्समकालिकीनां घटनानां पर्याप्तः प्रभावः। प्रसादगुणगुम्फितमिदं खण्डकाव्यमचिरेणैव लोकप्रियतां लभेदित्याशासे। कवेः प्रयासोऽभिनन्दनीयः।

प्राप्तिस्थानम्—श्रीमहेशमिश्र,

'संस्कृति'

रानीकोठा मीरघाट, काशी, मूल्यम् २)

श्रीमता पण्डितप्रवरेण श्रीबलदेवमिश्रेण लिखितं 'संस्कृति' नामकं पुस्तकं 'समालोचनार्थं' मया समासादितं समवलोकितञ्च। पुस्तके भारतीया, मैथिली च संस्कृतिर्मैथिलीभाषायां क्रमेण विभागद्वयेन वर्णिते स्तः। तत्र मैथिली संस्कृतिविषये तु मया किमपि नोच्यते, किन्तु भारतीयसंस्कृतिविषये विदुषा लेखकेन यदुक्तं तत्र केचन शब्दा उच्यन्ते संस्कृतीनां वैविध्यात् तत्स्वरूपाणां तद्व्याख्यानां परिभाषाणां वा वैविध्यं स्वाभाविकम्। भारतीयसंस्कृति-नाम्ना लेखकस्य हिन्दूसंस्कृतिरेवाभीष्टा लक्ष्यते। तत्रेश्वरभावना, परलोकभावना, मानवजीवनस्योद्देश्यम्, धर्मार्थकाममोक्षाणां पुरुषार्थानां गभीरं विस्तृतञ्च विवेचनम्, वर्णाश्रमव्यवस्थावर्णनम्, संस्कृति-सभ्यतयोर्भेदः, हिन्दूसंस्कृतेर्वैशिष्ट्यम्, हिन्दूसंस्कृतौ नारीसमाजस्य स्थानं तत्कर्त्तव्यञ्चेत्यादिविषयाः सरलतया सम्यक्तया च रीत्या समुपवर्णिताः सन्ति। जात्याश्रिताखिलपरम्पराणां वर्णनं विधाय संस्कृतेर्वर्तमानकालिकस्वरूपस्यापि सङ्ग्रहः सम्पादितः। किं बहुना, अनेनैकलेनैव ग्रन्थेन हिन्दूसंस्कृतेर्यथावज्ज्ञानं भवेत्। संस्कृतेः स्वरूपनिर्धारणविषयेऽद्यत्वे महान् मतभेदो विवादश्च दृश्यते, किन्तु प्रस्तुते हि पुस्तके इदमित्थन्तया संस्कृतिस्वरूपवर्णननिर्देशेन लेखकस्योत्कृष्टवैदुष्यं स्पष्टतयाऽवभासते। यद्यपि 'अस्माकमीक्षण' मिति स्तम्भे प्रायशः संस्कृतग्रन्था एव समालोच्यन्ते तथापि पुस्तकस्यास्य विषयदृष्ट्या महत्त्वमालक्ष्यात्र समालोच्यते, यदीदं पुस्तकं हिन्दीभाषायां संस्कृतभाषायाञ्चानूदितं स्याचेन्मन्येऽस्य जनोपयोगित्वं उपकारकत्वञ्च प्रकृतावस्थापेक्षया परिवर्धितं भवेत्। अद्यत्व ईदृशानां पुस्तकानां महती आवश्यकता वरीवर्ति।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्राप्तिस्थानम्—मनोभरीदेवी,

'सर्वतन्त्रसिद्धान्तपदार्थलक्षणसङ्ग्रहः' ग्राम-पुट्ठी, पत्रालयो बवानी

प्रदेशो हिसारः [खेडा] मूल्य ॥।)

श्रीमता गौरीशङ्करभिक्षुणा समालोचनार्थं प्रेषितं 'सर्वतन्त्रसिद्धान्तपदार्थलक्षणसङ्ग्रह' नामकं पुस्तकं मया प्राप्तं दृष्टञ्च। अस्मिन् खलु ग्रन्थे व्याकरण-न्याय-वेदान्त-मीमांसा-साङ्ख्य-धर्मशास्त्रादिषु प्रयुक्तानां पारिभाषिकशब्दानां तत्तच्छास्त्रीयाध्ययनाध्यापनविधौ बहुशः समादृतानां सपरिष्कारं लक्षणं सङ्गृहीतमस्ति, अतएव विदुषा लेखकेन सर्वतन्त्रेषु सिद्धान्तितपदार्थानां यानि खलु प्रचलितानि लक्षणानि तेषां सङ्ग्रह इत्यन्वर्थमेव पुस्तकनाम विहितम्। आधुनिकाङ्ग्लभाषीयकोशानामिवात्रापि वर्णक्रमेणैव शब्दाः सङ्गृहीता वर्तन्ते। अत एव सङ्ग्रहोऽयं कोशपुस्तकमिव प्रथमं प्रतिभासते, किन्तु द्राङ् निहितबुद्ध्या दर्शने तु पर्यायशब्दार्थनिरूपकेभ्यः कोशेभ्योऽस्य वैलक्षण्यं स्पष्टं परिलक्ष्यते। कोशेषु पर्यायार्थकानां सर्वेषामपि शब्दानामेकत्रैव सङ्कलनं क्रियते, ततो नानार्थकानाम्, किन्तु ग्रन्थेऽस्मिन् येषां शब्दानां गुर्वध्ययनप्रणाल्यां यादृशाः परिष्कृता अर्थाः प्रचलन्ति तेषामशेषेण सङ्कलनं अप्रचलितपर्यायवाचकस्य अर्थस्तु साधारणतयैव दीयते। यथा—कोप-क्रोध-रोषादीनां कोशे पर्यायतया गणना, अत्र तु—कोपः—उच्छेदबुद्धिः, एक एवार्थः, क्रोधः—रोषः, अनिष्टविषयदर्शनादिहेतुको मनोविकारः, कामितार्थविघातजन्यो बुद्धिक्षोभः, इच्छाप्रतिघातादुत्पद्यमानस्ताडनाक्रोशनादिहेतुः, द्विष्टार्थसाधनीभूतचेतनविषयकद्वेषः, आत्मनः प्रतिकूलेषु दुःखेषु दुःखहेतुषु दृश्यमानेषु श्रूयमाणेषु स्मर्यमाणेषु तत्तद्दोषानुसन्धानाभ्यासेन प्रज्वलनात्मको मन्युः, षडर्थाः। यद्यपि कोपक्रोधयोर्न-कश्चिद्भेदः, किन्तु क्रोधस्य परिष्कारं विधाय विचक्षणैः शिष्यबुद्धिवैशद्यं सम्पाद्यते, एकत्र संस्कृता बुद्धिः पर्यायेष्वपि झटिति सञ्चरिष्यतीत्यहो युक्तिवैशारद्यं मनीषिणाम्। गुरुसन्निधौ यद्यप्येषां सर्वेषामेव पदार्थानां यथावसरं व्याख्या श्रूयते, तथाप्येकत्र सर्वेषामीदृशः सङ्ग्रहोऽद्यावधि न कुत्रापि कृतो दृश्यते। एतया दृशा ग्रन्थस्यास्य प्रभूतं महत्त्वं वरीवर्ति, आसीच्च। संस्कृतच्छात्राणां कृतेऽस्य ग्रन्थस्यात्यर्थं महत्त्वम्। प्रातिदैनिके शास्त्राध्ययनेऽत्रोद्धृतानां पदार्थानां भृशमपेक्षा तिष्ठति। महता श्रमेण ग्रन्थरत्नमिदं सम्पाद्य प्रकाशय्य च विदुषा लेखकेन संस्कृतस्वाध्यायिनां सुमहानुपकार आरचित इति सादरं सधन्यवादञ्च सम्मनुते।

रघुनाथपाण्डेयः १८१

सरस्वतीभवन, काशी।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संस्कृतसमाचाराः

अक्टूबरमासस्य २३ तारिकायां श्रीमन्तो महामहोपाध्यायाः श्रीनारायणशास्त्रिखिस्ते महोदया अवकाशग्रहणमकुर्वन् । एते मोकाटेगणपतिशास्त्रिणामवकाशग्रहणानन्तरं प्रथमप्राध्यापकपदमलङ्कुर्वन्त आसन् । १९४८ ईशवीयस्य जूनमासस्य प्रथमतारिकातः काशिकराजकीयमहाविद्यालयस्याध्यक्षकार्यभारं निभालयन्त एते महानुभावा ३० वर्षपर्यन्तं यावद्धस्तलिखितविभागस्य सहायकपुस्तकालयाध्यक्षपदस्य प्रतिष्ठां समवर्द्धयन् ।

× × ×

श्रीनारायणशास्त्रिखिस्तेमहोदयानामवकाशग्रहणानन्तरं श्रीमन्तः को. अ. सुब्रह्मण्य अय्यरमहोदया महाविद्यालयीयाध्यक्षपदमलङ्कुर्वन्त आसते । इतः प्रागेते लक्ष्मणपुरविश्वविद्यालयस्य संस्कृतविभागाध्यक्षपदं सुशोभयन्त आसन् । एते न केवलं संस्कृताङ्ग्लभाषयोरेव वैदुष्यमावहन्ति प्रत्युत फ्रेञ्च, लैटिन, जर्मन, आदिवैदेशिकभाषासु पालिप्राकृततमिलादिप्राच्यभाषास्वपि प्रामाणिकं वैचक्षण्यं विभ्रति । भाषाविज्ञानविषये तु भारतीयविद्वत्समाजे लब्धप्रतिष्ठेषु विद्वत्सु एषां ख्यातिरस्ति । एते विभिन्नप्राच्यविद्याग्रन्थानपि समपादयन् ।

× × ×

१९५० तमेशवीयस्य सितम्बरमासे श्रीजगन्नाथ उपाध्यायो महाविद्यालये वेदान्तबौद्धदर्शनयोरध्यापनार्थं सहायकदर्शनप्राध्यापकपदे नियुक्तः । इतः पूर्वं सरस्वतीभवनस्थानुसन्धानमन्दिरे क्रमेण कैटलागरपदमस्याश्च सुषमापत्रिकायाः सहायकसम्पादकपदञ्चातिवोढवान् ।

× × ×

महाविद्यालयीयसंस्कृतच्छात्राणां नवीनगणितविषयमध्यापयितुमथ च वेधालयस्थयन्त्रद्वारा खगोलमध्यापयितुञ्च श्रीगौरीशङ्करलाल एम. एस. सी. महोदय उत्तरप्रदेशीयशिक्षासञ्चालकमहोदयैः काशीस्थक्वींसकालेजादत्र स्थानान्तरितः ।

× × ×

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

उत्तरप्रदेशीयशासकैः प्रथममध्यमशास्त्रिपरीक्षासु प्रत्येकं क्रमेण प्राप्तसर्वाधिकाङ्केभ्यो दशभ्यश्छात्रेभ्यः क्रमेण १५) २०) २५) रूप्यकाणां पारितोषिकाणि प्रदत्तानि। संस्कृतविद्यार्थिनामुत्साहवर्धनाय शासकानामयं प्रशस्य उपक्रमः।

× × ×

विदितमस्ति यत् प्रारम्भतोऽद्य यावत् संस्कृतमहाविद्यालयस्य भवने क्वींसकालेजस्योत्तमकक्षाणामध्यापनार्थं भवनस्य कतिपयोंऽशः प्रयुक्त आसीत्। ऐषमः सम्पूर्णं भवनं संस्कृतविद्यालयाय प्रत्यावृत्तम्। अथ च महाविद्यालयस्य सुविपुलमुद्यानमपि संस्कृतमहाविद्यालयप्रबन्धे समायातम्।

× × ×

सरस्वतीभवनादुदीच्यां वर्तमानं 'जौनपुर'महाराजस्य सुविस्तृतमुद्यानं संस्कृतमहाविद्यालयस्य विश्वविद्यालयपरिणमनव्यवस्थायामुत्तरप्रदेशीयशासनेन क्रीतम्। एवं संस्कृतमहाविद्यालयस्य कृते 'तेलियाबाग × चौकाघाट' राजमार्गयोरन्तरे सर्वाऽपि विस्तृता भूमिः स्वायत्तीभूता।

× × ×

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सुषमायामद्यावधिप्रकाशितलेखसूची

प्रथमविशिष्टाङ्के

विषयाः	लेखकाः	पृष्ठसंख्याः
किञ्चित्प्रास्ताविकम्	—सम्पादकः	३–५
संस्कृतं प्रति अस्माकं कर्तव्यम्	—डा० पन्नालालमहोदयः शिक्षासचिवः	७–८
काशिकराजकीयसंस्कृतमहाविद्यालयः (संक्षिप्तमितिवृत्तम्)	—डा० मङ्गलदेवशास्त्री एम. ए., डी. फिल. (ऑक्सन)	९–३४
काशिकराजकीयसंस्कृतमहाविद्यालयीय-परीक्षाणां विस्तारः	,, ,,	३४–३६
काशिकराजकीयसंस्कृतमहाविद्यालयस्य इतिवृत्तम् (चतुर्थकालस्य परिशिष्टम्)	—श्रीनारायणशास्त्री खिस्ते, साहित्याचार्यः सरस्वतीभवन, काशी ।	३७–३९
विदुषां चरितानि—		
म० म० पं० बापूदेवशास्त्री	—श्रीअनन्तशास्त्री फडके, व्याकरणाचार्यः गवर्नमेण्ट संस्कृत कालेज, काशी ।	४१–४५
पं० राजारामशास्त्री	—श्रीनारायणशास्त्री खिस्ते	४५–४७
पं० बालशास्त्री रानड़े	—श्रीअनन्तशास्त्री फडके	४७–५०
म० म० पं० कैलासचन्द्रशिरोमणिः	—श्रीनारायणशास्त्री खिस्ते	५०–५३
म० म० पं० राममिश्रशास्त्री	,, ,,	५३–५४
म० म० पं० सुधाकरद्विवेदी	—श्रीबलदेवमिश्रः, ज्यौतिषाचार्यः सरस्वतीभवन, काशी ।	५४–५९
म० म० पं० गङ्गाधरशास्त्री	—श्रीनारायणशास्त्री खिस्ते	६०–६६
१८४ म० म० पं० शिवकुमारशास्त्री	—श्रीकरुणापतित्रिपाठी एम. ए., व्याकरणाचार्यः	६६–६८

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयाः	लेखकाः	पृष्ठसंख्याः
विदुषां चरितानि—		
म० म० पं० दामोदरशास्त्री	—श्रीनारायणशास्त्री खिस्ते	६८–७०
म० म० पं० तात्याशास्त्री	„	७१–७२
म० म० पं० रामशास्त्री तैलंग	„	७२–७४
म० म० पं० केशवशास्त्री मराठे	—श्रीअनन्तशास्त्री फडके	७४–७५
पं० श्रीमोहनलालोदासीनः	„	७६–७७
म० म० पं० नित्यानन्दपन्तपर्वतीयः	„	७७–७८
पं० अम्बिकादत्तव्यासः	„	७८–८०
पं० लक्ष्मणशास्त्री द्राविडः	„	८०–८२
पं० पञ्चाननतर्करत्नमहोदयः	„	८२–८३
म० म० पं० मुरलीधर झा	—श्रीअनूपमिश्रः, ज्यौतिषाचार्यः ग० सं० का० काशी।	८३–८६
म० म० पं० वामाचरणभट्टाचार्यः	—श्रीराजेश्वरशास्त्री द्राविडः अध्यक्ष-साङ्गवेदविद्यालय, काशी।	८६–८९
पं० रामभवनोपाध्यायः	—प्रेषकः श्रीत्रिभुवनप्रसादोपाध्यायः एम.ए., व्याकरणाचार्यः	८९–९०
पं० देवनारायणत्रिपाठी	—श्रीरघुनाथशर्मा व्याकरणाचार्यः ग० सं० का० काशी।	९०–९२
पं० गङ्गाधरशास्त्री भारद्वाजः	—श्रीनारायणशास्त्री खिस्ते	९२–९३
रा० ब० प्रमदादासमित्रमहोदयः	„ „	९३–९५
अरूर्मघवधः	—म० म० श्रीसीतारामशास्त्री शेंडे	९६–९८
ऋतं च सत्यं च	—म० म० श्रीगिरिधरशर्मा चतुर्वेदः	९९-१०४
श्रौतदेवताविज्ञानम्	—श्रीभगवत्प्रसादमिश्रः वेदाचार्यः ग० सं० का० काशी।	१०५-११३
अथ रुद्रीयम्	—श्रीअनन्तशास्त्री फडके	११४-१२०

१८५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयाः	लेखकाः	पृष्ठसंख्याः
वेदकालीन हिन्दुविवाह	—श्रीकुन्दनलालशर्मा एम. ए., वेदाचार्यः सरस्वतीभवन, काशी ।	१२१–१३२
साहित्यस्य दर्शनत्वम्	—मध्वसंप्रदायाचार्य-गोस्वामी दामोदरशास्त्री	१३३-१३७
दर्शनेषु साहित्यस्य स्थानम्	—श्रीराजेश्वरशास्त्री द्राविडः	१३८-१४०
साहित्यस्य तदितरदर्शनेभ्यो वैलक्षण्यम्	—श्रीनारायणशास्त्री खिस्ते	१४१-१४२
साहित्यदर्शनप्रतिपाद्यरससम्बद्धो विवेकः	—श्रीविद्याविलासशुक्लः, साहित्याचार्यः ग० सं० का० काशी ।	१४३-१४५
उपमायाः सर्वालङ्कारघटकत्वम्	—श्रीमुकुन्दशास्त्री खिस्ते, साहित्याचार्यः ग० सं० का० काशी ।	१४६-१४९
वक्रोक्तिवैभवम्	—श्रीबटुकनाथशास्त्री खिस्ते, साहित्याचार्यः	१५०-१५३
शब्दब्रह्मविमर्शः	—श्रीसमापतिशर्मोपाध्यायः अध्यक्ष-बिरला सं० वि० काशी ।	१५४-१५७
पाणिनिव्याकरण की पारिभाषिक प्रक्रिया का आधार	—डा० मङ्गलदेवशास्त्री	१५८-१६४
भास्कराचार्यस्तत्पूर्ववर्तिनश्च	—श्रीअनूपमिश्रः	१६५-१६९
मीमांसकसर्वस्वम्	—म० म० श्रीचिन्नस्वामिशास्त्री अध्यक्ष-प्राच्यवि० हि.वि.वि. काशी ।	१७०-१७३
मीमांसाया वैशिष्ट्यम्	—श्रीबालबोधमिश्रः ग० सं० का० काशी ।	१७४-१७६
देवता पुरुषकारश्च	—श्री पी.एन्. पट्टाभिरामशास्त्री मीमांसादर्शनाचार्यः	१७७-१८१
ख्यातिविमर्शः	—श्रीरघुनाथशर्मा पाण्डेयः	१८२-१८६
१८६ शाब्दबोधकारणनिर्वचने न्यायमतम्	—श्रीगणपतिशास्त्री मोकाटे ग० सं० का० काशी ।	१८७-१८९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयाः	लेखकाः	पृष्ठसंख्याः
मुक्तिवादसङ्ग्रहः	—श्रीशिवदत्तमिश्रः, न्यायाचार्यः ग० सं० का० काशी।	१९०–१९८
विश्वविद्यालयाः	—म० म० श्रीमाधवशास्त्री भाण्डारी लवपुरीयविद्यालयाध्यक्षः	१९९–२०१
महाकविबिल्हणप्रणीतं विक्रमाङ्क-देवचरितं नाम महाकाव्यम्	—श्रीमुरारिलालशास्त्री नागरः साहित्याचार्यः	२०२–२०६
वाराणसेयराजकीयसंस्कृतपाठशाला-वर्णनाष्टकम् (कविता)	—मध्वसंप्रदायाचार्य-गोस्वामी दामोदरशास्त्री	२०७–२०८
काशिकराजकीयसंस्कृतमहा-विद्यालयः (कविता)	—श्रीनारायणशास्त्री खिस्ते	२०९–२१०
सारस्वती सुषमा (कविता)	,, ,,	२११–२१२
काशिकराजकीयसंस्कृतमहा-विद्यालयः (कविता)	—श्रीकुलचन्द्रगौतमशर्माणः	२१३–२१६
राजकीयसंस्कृतमहाविद्यालय के प्रति (कविता)	—देवपुरस्कारविजेता श्रीश्यामनारायणपाण्डेयः	२१७–२१८
काशिकराजकीयमहाविद्यालयीया छात्रपरिषद्	—श्रीराजारामभट्टभट्टः साहित्याचार्यः परिषन्मन्त्री	२१९–२२०
काशिकराजकीयसंस्कृतमहाविद्यालये विद्वद्गोष्ठ्याः समारम्भः	—श्रीनारायणशास्त्री खिस्ते संयोजकः	२२१–२२३

द्वितीयवर्षाङ्के

ऐतरेयब्राह्मण आचारविचाराः (सावशेषः)	—डा. मङ्गलदेवशास्त्री	३–२९
निर्विकल्पकवादः	—श्रीसूर्यनारायणशुक्लः व्याकरणाचार्यः ग० सं० का० काशी।	३०–३४
रससामान्यविमर्शः	—श्रीनारायणशास्त्री खिस्ते	३५–४०

१८७

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषया:	लेखका:	पृष्ठसंख्या:
लिङ्गतत्त्वविमर्शः	—श्रीसुब्रह्मण्य अय्यर महोदयः एम. ए. (लंदन)	४१–४७
दण्डप्रायश्चित्तविवेकः	—श्रीगोपालशास्त्री नेने व्याकरणाचार्यः ग० सं० का० काशी ।	४८–५०
अयनचलनम्	—श्रीउमाकान्त झा ज्यौतिषाचार्यः ग० सं० का० काशी ।	५१–५६
'आर्यों का आदिदेश' (समालोचनम्)	—डॉ० मङ्गलदेवशास्त्री	५७–६५
वाराणसेयविद्वन्नक्षत्रमाला	—मध्वसम्प्रदायाचार्य-गोस्वामी दामोदरशास्त्री	६६–६९
प्रत्याख्यानसंग्रहः श्रीनागोजीभट्टप्रणीतः (सावशेषः)	—सम्पादकौ- श्रीसूर्यनारायण शुक्लः श्रीअनन्तशास्त्री फडके	१–२४

तृतीयवर्षाङ्के

ऐतरेयब्राह्मण आचारविचाराः (पूर्वतोऽनुवृत्तः)	—डॉ. मङ्गलदेवशास्त्री	३–२४
वैयाकरणमतेन वाचकशब्दस्वरूपविमर्शः	—श्रीगणपतिशास्त्री मोकाटे	२५–३५
वेदापौरुषेयत्वम्	—म० म० श्रीचिन्नस्वामिशास्त्री	३६–४१
श्रौतदेवतास्तत्संज्ञा हवींषि च	—श्रीभगवत्प्रसादमिश्रः	४२–५९
The Bengal Kayasthas and their alleged affinity to the Nagar Brahmanas of Gujrat.	—Shri, S. N. Jharkhandi. M. A., M. Sc.	६०–६५
विद्वद्वरश्रीकाकारामशास्त्री	—सम्पादकः	६७–६९
१८८ प्रत्याख्यानसंग्रहः नागोजीभट्टप्रणीतः (पूर्वतोऽनुवृत्तः)		२५–५५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्थवर्षप्रथमाङ्के

विषयाः	लेखकाः	पृष्ठसंख्याः
राजकीयसंस्कृतमहाविद्यालयस्य प्राथमिकोपाधिवितरणोत्सवविवरणम्		३-३६
चित्रविचारचर्चा (मिताक्षरादायभागयोर्विषये किञ्चित्)	—श्रीविनायकशास्त्री टिल्लुः न्याकरणाचार्यः, धर्मशास्त्री(इन्दौर)	३७-४०
संस्कृत साहित्य में ग्रन्थप्रणयन	—डा. मङ्गलदेवशास्त्री	४१-५०
निगमागमविवेकः	—श्रीरामाज्ञापाण्डेयः न्याकरणाचार्यः सरस्वतीभवन, काशी।	५१-६५
अप्सरा	—आचार्य श्रीवैद्यनाथशास्त्री	६६-७७
एस्ट्रोपैथी (इंग्लिश) (सावशेषः)	—डा. राखालदासराय, एम. बी., डी. पी. एच.	७८-९४

चतुर्थवर्षद्वितीयाङ्के

विषयाः	लेखकाः	पृष्ठसंख्याः
इष्टिपशुसोमानामितिकर्तव्यता	—श्रीपट्टाभिरामशास्त्री मीमांसाचार्यः अध्यक्ष–महा० सं० का० जयपुर।	९-१४
गणिततत्त्वम् (सावशेषम्)	—श्रीविभूतिभूषणभट्टाचार्यः न्यायाचार्यः सरस्वतीभवन, काशी।	१५-१९
आगमपरिचयः	—श्रीबटुकनाथशास्त्री खिस्ते ग. सं. का. काशी।	२०-२५
भास्करीयलीलावत्याः टिप्पणीलेखकानां भ्रमः	—श्रीबलदेवमिश्रः	२६-२८
मनुस्मृतिश्लोकक्रमादिसंशोधनम्	—श्रीअनन्तशास्त्री फडके	२९-३३
सुवर्णमुक्तासंवादः (प्राचीनकाव्यम्)	—सम्पादकः-श्रीबटुकनाथशास्त्री, खिस्ते	३४-४२
कालिदासका ग्रीष्मवर्णन	—श्रीअलखनिरञ्जनपाण्डेयः एम. ए.	४३-५३
एस्ट्रोपैथी (इंग्लिश) (पूर्वतोऽनुवृत्तः)	—डा. राखालदासराय, एम. बी., डी. पी. एच.	५४-६०

१८९

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

चतुर्थवर्षतृतीयाङ्के

विषयाः	लेखकाः	पृष्ठसंख्याः
स्वारं किञ्चित्	—श्रीभगवत्प्रसादमिश्रः	३–१९
प्रत्यासत्तिविमर्शः (सावशेषः)	—श्रीरघुनाथशर्मा पाण्डेयः	२०–२७
गणिततत्त्वम् (पूर्वतोऽनुवृत्तम्)	—श्रीविभूतिभूषणभट्टाचार्यः	२८–२९
किं ज्यौतिषं फलति ?	—श्रीअवधबिहारीमिश्रः ज्यौतिषाचार्यः ग० सं० का० काशी ।	३०–३४
पञ्चाङ्गविमर्शः (सावशेषः)	—श्रीबलदेवमिश्रः	३५–४०
एस्ट्रोपैथी (इंग्लिश) (पूर्वतोऽनुवृत्तः)	—डा० राखालदासराय, एम. बी., डी. पी. एच. विद्याचास्पति, काशी ।	४१–४८
अमरसिंहस्य वैदिकत्वम्	—श्रीरामाज्ञापाण्डेयः	५३–५७
शाण्डिल्यसूत्राणि ? (ग्रन्थपरिचयः)	—श्रीअनन्तशास्त्री फडके	५८–५९
फारसी में संस्कृतवाङ्मयः	—मौलवी श्रीमहेशप्रसाद आलिम फाजिल प्रो० हिन्दूविश्वविद्यालय, काशी ।	६०–६७
भारतीयसंस्कृतिः	—श्री बलदेवमिश्रः	६८–७४
अहिंसक क्रान्तिदर्शन (हिन्दी)	—ठाकुर श्रीराममूर्तिसिंह एम. ए. प्रो० क्वीन्स कालेज, काशी ।	७५–८७
भट्टगोविन्दस्य श्रुतिविकासः	—श्रीव्रजवल्लभद्विवेदः दर्शनाचार्यः सरस्वती भवन, काशी ।	८८–९५

चतुर्थोपाधिवितरणोत्सवविशिष्टाङ्के

विषयाः	लेखकाः	पृष्ठसंख्याः
स्वतन्त्रभारतम् (कविता)	—श्रीआनन्दझा न्यायाचार्यः ब्रह्मविद्यापाठशाला, काशी ।	३
स्वातन्त्र्यस्वागतम् (कविता)	—श्रीबटुकनाथशास्त्री खिस्ते	४
सारस्वतीसुषमाप्रसारः कथं साध्यः ?	—महाभाग डा० भगवद्दासमहोदयानाम्	७–८
वेदान्तेषु ब्रह्मस्वरूपविमर्शः	—श्रीरघुनाथशर्मा पाण्डेयः	९–२९
पौराणिकी सृष्टिः	—श्रीअनन्तशास्त्रीफडके	३०–३५

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयाः	लेखकाः	पृष्ठसंख्याः
रसविवेकः	—श्रीमुकुन्दशास्त्री खिस्ते	३६–४१
अनात्मवादः	—आचार्यो नरेन्द्रदेवः, कुलपतिः–लखनऊ विश्वविद्यालय। अनुवादकः–रघुनाथपाण्डेयः।	४२–४८
पञ्चाङ्गस्य दृश्यत्वम्	—श्रीसीतारामझा ज्यौतिषाचार्यः प्रधानाध्यापकः-संन्यासी संस्कृत महाविद्यालय, काशी।	४९–५३
फलितज्यौतिषविमर्शः	—श्रीबलदेवमिश्रः	५४–५९
ज्यौतिषशास्त्र के रहस्य	—डा० राखालदासराय	६०–७१
द्वन्द्वात्मकप्रधानवादः	—कुमारी शैलबाला बी.ए. जालपादेवी, काशी।	७२–८५
वार्ताशास्त्रीयं किञ्चित्	—श्रीविभूतिभूषणभट्टाचार्यः	८६–९३
गान्धिनः प्रयोगदर्शनम्	—श्रीजगन्नाथ उपाध्यायः वेदान्ताचार्यः सरस्वतीभवन, काशी।	९४–१०२
आर्यकौटिल्यः-अर्थशास्त्रञ्च	—श्रीकेदारनाथशर्मा सारस्वतः	१०३–१०८
संस्कृतकोषविषयकं किञ्चित्	—श्रीरघुनाथपाण्डेयः, व्याकरणाचार्यः सरस्वतीभवन, काशी।	१०९–११४
अस्माकं संस्कृतिसमस्या	—भिक्षुः जगदीशकाश्यपः पालीविभाग, हि० वि० वि० काशी। अनुवादकः–श्रीमहादेवोपाध्यायः साहित्याचार्यः	११५–११८
भारतीयशिल्पचित्रकलयोः काष्ठस्योपयोगः	—मुनिः कान्तिसागरः अनुवादकः–श्रीभूपनारायण झा व्याकरणाचार्यः	११९–१२७
काव्यस्यालेख्यसङ्गीताभ्यां सम्बन्धः	—श्रीमहादेवोपाध्यायः साहित्याचार्यः नित्यानन्दवेदविद्यालय, काशी।	१२८–१३०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयाः	लेखकाः	पृष्ठसंख्याः
सङ्गीतशास्त्रम्	—श्रीव्रजवल्लभद्विवेदः दर्शनाचार्यः	१३१–१३४
वेदान्तसूत्राणां न पाराशर्यकर्तृत्वम्	—श्रीरामाज्ञापाण्डेयः	१३५–१४३
वैयाकरणाचार्याणां लोकविज्ञानानुवर्तित्वम्	—श्रीमुरलीधरमिश्रः व्याकरणाचार्यः	१४४-१४७
विद्यातात्पर्यदर्शनम् (ग्रन्थपरिचयः)	—श्रीअनन्तशास्त्री फडके	१४८–१४९
संस्कृतभाषा	—श्रीगोपालशास्त्री दर्शनकेसरी भूतपूर्वसंस्कृताध्यापकः काशी विद्यापीठ, काशी ।	१५०–१५२
अनुसन्धानमन्दिरपरिचयः	—श्रीबलदेवमिश्रः	१५३–१५७
सुगतिसोपानः (ग्रन्थपरिचयः)	—श्रीतारकनाथभट्टाचार्यः, धर्मशास्त्राचार्यः सरस्वतीभवन, काशी ।	१५८–१६०
'हयत' (ग्रन्थपरिचयः)	—श्रीचन्द्रभानुपाण्डेयः ज्यौतिषाचार्यः सरस्वतीभवन, काशी ।	१६१–१६४
किं नामान्वेषणम्	—श्रीबलदेव मिश्रः	१७४
अनुसन्धानमन्दिरस्यावश्यकता	,, ,,	१७५–१७६

पञ्चमवर्षद्वितीयाङ्क

जय जनतन्त्र (कविता)	—श्रीबटुकनाथशास्त्री खिस्ते	७
हर्षगीतिः (कविता)	—श्रीआनन्दझा	८
दर्शनेषु शब्दस्वरूपम्	—श्रीभूपनारायणझा व्याकरणाचार्यः ग० सं० का० काशी ।	९–१२
प्रत्यासत्तिविमर्शः (४ वर्ष ३ अङ्कतोऽनुवृत्तः)	—श्रीरघुनाथशर्मा पाण्डेयः	१३–२१
पञ्चाङ्गस्य दृश्यत्वम् (पञ्चाङ्गविमर्शस्यावशिष्टांशः)	—श्रीबलदेव मिश्रः ज्यौतिषाचार्यः सरस्वती भवन, काशी ।	२२–३२
किमुपकारा उपसर्गाः किमर्थकाश्च	—प्रो० श्रीचारुदेवशास्त्री एम. ए., ओ. एल. (अम्बाला)	३३–३९
वार्ताशास्त्रीयं किञ्चित्	—श्रीविभूतिभूषणभट्टाचार्यः	४०–४४

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

विषयाः	लेखकाः	पृष्ठसंख्याः
भारतीयसंस्कृतिः	—श्रीजगन्नाथ उपाध्यायः	४५–५१
नाममीमांसा	—श्रीअनन्तशास्त्री फडके	५२–५४
अनङ्गदेशः (बलियामण्डलम्)	—रामाज्ञापाण्डेयः व्याकरणाचार्यः	५५–६४
चतुर्थोपाधिवितरणोत्सवविवरणम्		६५–१०५

पञ्चमवर्षतृतीयाङ्के

विषयाः	लेखकाः	पृष्ठसंख्याः
स्वतन्त्रभारतम् (कविता)	—म.म. श्रीनारायणशास्त्री खिस्ते अध्यक्ष—ग० सं० का० काशी।	७
सुरसरस्वती सेव्यताम् (कविता)	—भट्टश्रीमथुरानाथशास्त्री 'मञ्जुनाथः'	८
प्रत्यभिज्ञादर्शने किञ्चित्	—श्रीकुबेरनाथशुक्लः व्याकरणाचार्यः, एम.ए. पीठस्थविर-राजकीयसंस्कृतपरीक्षा, उत्तरप्रदेश ।	९–१५
काव्यस्य सत्यत्वम्	—श्रीबटुकनाथशास्त्री खिस्ते	१६–२०
बौद्धेषु निर्वाणस्वरूपम्	—आचार्य नरेन्द्रदेवः कुलपति–लखनऊ विश्वविद्यालय अनु० श्रीरामशङ्करभट्टाचार्यः	२१–३६
ज्यौतिषशास्त्रस्य सिंहावलोकनम् (सावशेषम्)	—श्रीबलदेवमिश्रः	३७–४७
हिन्दुसंस्कृतिः	— डा० भगवद्दासमहोदयः	४८–५३
प्राचीनभारते गणतन्त्रप्रणाली	—श्रीप्रभातकुमार पाण्डेयः ग० सं० का० काशी।	५४–६३
प्रतितन्त्रेषु बौद्धप्रसङ्गः	—भदन्तशान्तिभिक्षुः अध्यापकः–शान्तिनिकेतनम् ।	६४–७९
वाल्मीकीयादिकाण्डरहस्यम्	—श्रीरामाज्ञापाण्डेयः	८०–८६
बौद्धशाङ्करयोरद्वयवादः	—श्रीजगन्नाथ उपाध्यायः	८७–९३
संस्कृतपरीक्षासन्तुलनसम्मेलनविवरणम्		९४– १९३

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

सूचना

'सारस्वती सुषमा' पत्रिकायां प्रत्यङ्कं विशिष्टानां हिन्दीसंस्कृत-ग्रन्थानां समालोचनाः प्रकाशयितुमुपक्रान्ताः ।

ये महानुभावाः स्वकीय-हिन्दी-संस्कृतग्रन्थानामस्यां पत्रिकायां समालोचनाः प्रकाशिता दिदृक्षन्ते, तैः स्वस्वग्रन्थानामादर्शद्वयं सम्पादकस्य (प्रिंसिपल, गवर्नमेण्ट संस्कृत कालेज, बनारस) सविधे प्रेषणीयम्, तत्रैव 'समालोचनार्थम्' इत्यप्युल्लेखनीयम् । यथावकाशं ते ग्रन्था: पत्रिकायां समालोचयिष्यन्ते ।

—सम्पादकः

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

काशिकराजकीयसंस्कृतमहाविद्यालयीया

सरस्वतीभवनग्रन्थमाला

प्राप्तिस्थानम्—सुपरिटेंडेंट, प्रिंटिंग एन्ड स्टेशनरी, उत्तर प्रदेश, इलाहाबाद।

(१) किरणावलीभास्करः (वैशेषिकम्) श्रीमदुदयनाचार्यकृतकिरणावली-द्रव्यप्रकरणटीकारूपः, पद्मनाभमिश्रविरचितः । म० म० पं० गोपीनाथ-कविराजमहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादितः । १-१२-०

(२) अद्वैतचिन्तामणिः (अद्वैतवेदान्तः) रङ्गोजिभट्टविरचितः । भूमिकादिभिः परिष्कृत्य साहित्याचार्य-पं० नारायणशास्त्रिखिस्तेशर्मणा सम्पादितः । १-१२-०

(३) वेदान्तकल्पलतिका (अद्वैतवेदान्तः) मधुसूदनसरस्वतीस्वामिभिर्विरचिता । भूमिकादिभिः परिष्कृत्य व्याकरणाचार्य-पं०रामाज्ञापाण्डेयशर्मणा सम्पादिता । १-१२-०

(४) कुसुमाञ्जलिबोधनी (न्यायः) श्रीमदुदयनाचार्यकृतकुसुमाञ्जलिटीकारूपा, वरदराजविरचिता । म० म० पं० गोपीनाथकविराजमहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादिता । २-०-०

(५) रससारः (वैशेषिकम्) श्रीमदुदयनाचार्यकृतकिरणावलीगुणप्रकरणटीका-रूपः, भट्टवादीन्द्रविरचितः । म० म० पं० गोपीनाथकविराजमहोदयैर्भूमि-कादिभिः परिष्कृत्य सम्पादितः । १-२-०

(६) भावनाविवेकः (प्रथमभागः) (मीमांसा) श्रीमन्मण्डनमिश्रविरचितः, भट्टोम्बेककृतटीकासहितः । म० म० डॉ० गङ्गानाथझामहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादितः । ०-१२-०

„ (द्वितीयभागः) „ „ ०-१२-०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(७) **योगिनीहृदयदीपिका** (प्रथमभागः) (तन्त्रम्) वामकेश्वरतन्त्रान्तर्गत-योगिनीहृदयटीकारूपा, अमृतानन्दनाथविरचिता। म० म० पं० गोपीनाथ-कविराजमहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादिता। १-८-०

,, (द्वितीयभागः) १-४-०

(८) **काव्यडाकिनी** (काव्यशास्त्रम्) गङ्गानन्दकवीन्द्रविरचिता। साहित्योपाध्याय-पं० होशिङ्गजगन्नाथशास्त्रिशर्मणा भूमिकादिभिः परिष्कृत्य सम्पादिता। ०-१०-६

(९) **भक्तिचन्द्रिका** (प्रथमभागः) (भक्तिशास्त्रम्) शाण्डिल्यभक्तिसूत्रटीका-रूपा, नारायणतीर्थविरचिता। म० म० पं० गोपीनाथकविराजमहोदयैः प्रास्ताविकलेखपुरःसरं सम्पादिता। ०-१५-०

,, (द्वितीयभागः) पं० अनन्तशास्त्रिफड़केमहोदयैः सम्पादिता। १-८-०

(१०) **सिद्धान्तरत्नम्** (प्रथमो भागः) (गौडीयवैष्णवदर्शनम्) बलदेवविद्या-भूषणविरचितम्। म० म० पं० गोपीनाथकविराजमहोदयैः प्रास्ताविक-लेखपुरःसरं सम्पादितम्। १-२-०

,, (द्वितीयो भागः) २-१२-०

(११) **श्रीविद्यारत्नसूत्रम्** (तन्त्रम्) गौडपादविरचितम्, शङ्करारण्यकृतटीका-सहितम्। साहित्याचार्य-पं० नारायणशास्त्रिखिस्तेशर्मणा भूमिकादिभिः परिष्कृत्य सम्पादितम्। ०-६-०

(१२) **रसप्रदीपः** (अलङ्कारशास्त्रम्) प्रभाकरभट्टविरचितः। साहित्याचार्य-पं० नारायणशास्त्रिखिस्तेशर्मणा भूमिकादिभिः परिष्कृत्य सम्पादितः। १-२-०

(१३) **सिद्धसिद्धान्तसंग्रहः** (नाथमार्गः) बलभद्रविरचितः। म० म० पं० गोपीनाथकविराजमहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादितः। ०-१४-०

(१४) **त्रिवेणिका** (अलङ्कारशास्त्रम्) आशाधरभट्टविरचिता। प्रोफेसरबटुक-नाथ एम० ए० शर्मणा साहित्योपाध्यायहोशिङ्गजगन्नाथशास्त्रिणा च भूमिकादिभिः परिष्कृत्य सम्पादिता। ०-१४-०

(१५) **त्रिपुरारहस्यज्ञानखण्डम्** (प्रथमभागः) (तान्त्रिकदर्शनम्) म० म०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

पं० गोपीनाथकविराजमहोदयैः प्रास्ताविकलेखपुरःसरं सम्पादितम् । ०–१४–०

„ (द्वितीयो भागः) „ २–४–०

„ (तृतीयो भागः) „ २–०–०

„ (चतुर्थो भागः) „ सभूमिकः । १–८–०

(१६) काव्यविलासः (अलङ्कारशास्त्रम्) चिरञ्जीवभट्टाचार्यविरचितः । प्रोफेसर बटुकनाथ एम्० ए० साहित्योपाध्यायेन साहित्योपाध्यायहोशिङ्गजगन्नाथशास्त्रिणा च भूमिकादिभिः परिष्कृत्य सम्पादितः । १–२–०

(१७) न्यायकलिका (न्यायः) भट्टजयन्तविरचिता । म० म० डॉ० गङ्गानाथझामहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादिता । ०–१४–०

(१८) गोरक्षसिद्धान्तसंग्रहः (प्रथमभागः) (नाथमार्गः) म० म० पं० गोपीनाथकविराजमहोदयैः प्रास्ताविकलेखपुरःसरं सम्पादितः । ०–१४–०

(१९) प्राकृतप्रकाशः (प्रथमो भागः) (प्राकृतव्याकरणम्) वररुचिविरचितः । वसन्तराजकृतसञ्जीवन्या सदानन्दकृतसुबोधिन्या च टीकया सहितः । प्रोफ़ेसर बटुकनाथ एम्० ए० साहित्योपाध्यायेन, बलदेवोपाध्याय एम्० ए० साहित्योपाध्यायेन च प्रास्ताविकलेखपुरःसरं संपादितः । २–४–०

„ (द्वितीयो भागः) „ „ २–१२–०

(२०) मांसतत्त्वविवेकः (धर्मशास्त्रम्) विश्वनाथपञ्चाननभट्टाचार्यविरचितः । म० म० पं० गोपीनाथकविराजमहोदयैर्लिखितेन प्राक्कथनेन सह साहित्योपाध्यायहोशिङ्ग पं० जगन्नाथशास्त्रिणा भूमिकादिभिः परिष्कृत्य संपादितः । ०–१२–०

(२१) न्यायसिद्धान्तमाला (प्रथमो भागः) (न्यायः) जयरामन्यायपञ्चाननभट्टाचार्यविरचिता । डॉ० मङ्गलदेवशास्त्रि एम्० ए०, डी० फ़िल्० महोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादिता । १–२–०

„ (द्वितीयो भागः) „ „ २–०–०

(२२) धर्मानुबन्धिश्लोकचतुर्दशी (धर्मशास्त्रम्) श्रीशेषकृष्णविरचिता,

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

रामपण्डितकृतटीकासहिता। साहित्याचार्यखिस्ते पं० नारायणशास्त्रिणा भूमिकादिभिः परिष्कृत्य सम्पादिता। १–०–०

(२३) **नवरात्रप्रदीपः** (धर्मशास्त्रम्) नन्दपण्डितधर्माधिकारिविरचितः। म० म० पं० गोपीनाथकविराजमहोदयलिखितप्राक्कथनेन सह धर्मशास्त्रिणा बरकले पं० वैजनाथशास्त्रिणा भूमिकादिभिः परिष्कृत्य सम्पादितः। २–०–०

(२४) **रामतापिनीयोपनिषद्** (उपनिषद्) 'रामकाशिका' 'आनन्दनिधि' नामिकाभ्यां आनन्दवनविरचिताभ्यां पूर्वोत्तरतापिनीटीकाभ्यां सहिता। म० म० पं० गोपीनाथकविराजमहोदयलिखितप्राक्कथनेन सह साहित्योपाध्यायानन्तरामशास्त्रिवेतालेन भूमिकादिभिः परिष्कृत्य सम्पादिता। ३-१२–०

(२५) **सापिण्ड्यकल्पलतिका** (धर्मशास्त्रम्) आपदेवापराभिधानसदाशिवदेवेन विरचिता, नारायणदेवकृतटीकासहिता। साहित्योपाध्यायजगन्नाथशास्त्रिहोशिङ्गेन भूमिकादिभिः परिष्कृत्य सम्पादिता। १–४–०

(२६) **मृगाङ्करेखा** (नाटिका) विश्वनाथदेवकविरचिता। साहित्याचार्यखिस्तेनारायणशास्त्रिणा भूमिकादिभिः परिष्कृत्य सम्पादिता। १–०–०

(२७) **विद्वच्चरितपञ्चकम्** (चम्पूरूपश्चरितनिबन्धः) साहित्याचार्यखिस्तेनारायणशास्त्रिणा प्रणीतम्। म० म० पं० गोपीनाथकविराजमहोदयलिखितभूमिकया सहितम्। २–०–०

(२८) **व्रतकोशः** (धर्मशास्त्रम्) साहित्योपाध्यायहोशिङ्गजगन्नाथशास्त्रिणा सङ्कलितः। म० म० पं० गोपीनाथकविराजमहोदयलिखितप्राक्कथनेन सहितः। ४–०–०

(२९) **वृत्तिदीपिका** (व्याकरणम्) मौनिश्रीकृष्णभट्टविरचिता। व्याकरणसाहित्याचार्यभारद्वाज पं० गङ्गाधरशास्त्रिभिर्भूमिकादिभिः परिष्कृत्य सम्पादिता। १–२–०

(३०) **पदार्थमण्डनम्** (वैशेषिकम्) श्रीवेणीदत्तविरचितम्। व्याकरणाचार्यपं० गोपालशास्त्रिनेनेमहोदयैर्भूमिकादिभिः परिष्कृत्य सम्पादितम्। ०–१४–०

(३१) **तन्त्ररत्नम्** (प्रथमो भागः) (मीमांसा) पार्थसारथिमिश्रविरचितम्।

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

म० म० डॉ० गङ्गानाथझामहोदयैः सम्पादितम् । १-१४-०

" (द्वितीयो भागः) , पं० गोपालशास्त्रिनेने-
महोदयैः सम्पादितम् । २-४-०

(३२) तत्त्वसारः (न्यायः) म०म० पं० राखालदासन्यायरत्नविरचितः । काशीविश्व-
विद्यालयाध्यापकैः पं० हरिहरशास्त्रिभिर्भूमिकादिभिः परिष्कृत्य सम्पादितः । १-०-०

(३३) न्यायकौस्तुभः (प्रथमो भागः) (प्रत्यक्षखण्डम्) (न्यायशास्त्रम्)
महादेवपुणतामकरविरचितः । डा० उमेशमिश्रैर्भूमिकादिभिः परिष्कृत्य
सम्पादितः । ३-४-०

(३४) अद्वैतविद्यातिलकम् (प्रथमो भागः) (शाङ्करवेदान्तः) श्रीसमरपुङ्गव-
दीक्षितविरचितम् , श्रीधर्मय्यदीक्षितविरचितटीकासहितम् । गणपति-
लालझा एम० ए० महोदयेन भूमिकादिभिः परिष्कृत्य सम्पादितम् । १-४-०

(३५) धर्मविजयनाटकम् भूदेवशुक्लविरचितम् । श्रीपं० नारायणशास्त्रिखिस्ते
साहित्याचार्यमहोदयैर्भूमिकादिभिः सम्भूष्य सम्पादितम् । १-४-०

(३६) आनन्दकन्दचम्पूः मित्रमिश्रविरचिता । महामहोपाध्यायैर्गोपीनाथ-
कविराजमहोदयैर्लिखितेन प्राक्कथनेन समेता, साहित्याचार्येण पं० नन्द-
किशोरशर्मणा सम्पादिता । ३-८-०

(३७) उपनिदानसूत्रम् (सामवेदीयच्छन्दोग्रन्थः) डॉ० मङ्गलदेवशास्त्रि-
भिर्भूमिकया सम्भूष्य सम्पादितम् । १-०-०

(३८) किरणावलीप्रकाशदीधितिः (गुणप्रकरणम्) (वैशेषिकम्) रघुनाथ-
शिरोमणिविरचिता । पं० बद्रीनाथशास्त्रिणा सम्पादिता । १-१२-०

(३९) रामविजयमहाकाव्यम् रूपनाथविरचितम् । पं० गणपतिलालझा
एम० ए० महोदयेन सम्पादितम् । २-०-०

(४०) कालतत्त्वविवेचनम् (प्रथमो भागः) (धर्मशास्त्रम्) रघुनाथभट्ट-
विरचितम् । म० म० पं० गोपीनाथकविराजमहोदयैर्लिखितेन प्राक्कथनेन
समेतम् , साहित्याचार्येण पं० नन्दकिशोरशर्मणा सम्पादितम् । ४-०-०

" (द्वितीयो भागः) " " ३-८-०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(४१) सिद्धान्तसार्वभौमः (प्रथमो भागः) (ज्यौतिषम्) मुनीश्वर-विरचितः। ज्यौतिषाचार्येण मुरलीधरठक्कुरमहोदयेन भूमिकादिभिः परिष्कृत्य सम्पादितः। ३-०-०

„ (द्वितीयो भागः) „ „ २-०-०

(४२) भेदसिद्धिः (न्यायः) विश्वनाथभट्टाचार्यविरचिता। व्याकरणन्यायाचार्येण पं० सूर्यनारायणशुक्लेन टिप्पण्यादिभिरलङ्कृत्य सम्पादिता १-१२-०

(४३) स्मार्तोल्लासः (प्रथमो भागः) (कर्मकाण्डम्) शिवप्रसादविरचितः। पं० भगवत्प्रसादमिश्रवेदाचार्येण भूमिकया टिप्पण्यादिभिश्च परिष्कृत्य सम्पादितः। १-८-०

„ (द्वितीयो भागः) „ „ २-१२-०

„ (तृतीयो भागः) „ „ ०-१४-०

(४४) शूद्राचारशिरोमणिः (प्रथमो भागः) (धर्मशास्त्रम्) साहित्याचार्येण पं० नारायणशास्त्रिखिस्तेमहोदयेन भूमिकादिभिः परिष्कृत्य सम्पादितः। २-४-०

„ (द्वितीयो भागः) „ „ ०-१२-०

(४५) किरणावलीप्रकाशः (गुणप्रकरणम्) (वैशेषिकम्) (प्रथमो भागः) वर्धमानविरचितः। म० म० पं० गोपीनाथकविराजमहोदयैर्लिखितेन प्राक्कथनेन समेतः, एम० ए० पं० बद्रीनाथशास्त्रिणा सम्पादितः। १-८-०

„ (द्वितीयो भागः) „ „ १-८-०

(४६) काव्यप्रकाशदीपिका (प्रथमो भागः) (अलङ्कारशास्त्रम्) श्रीचण्डीदासविरचिता। एम० ए० शिवप्रसादभट्टाचार्येण सम्पादिता। १-१२-०

(४७) भेदजयश्रीः (माध्ववेदान्तः) श्रीतर्कवागीशभट्टवेणीदत्ताचार्यविरचिता, एम० ए० इत्युपाधिधारिणा त्रिभुवनप्रसादोपाध्यायेन व्याकरणाचार्येण भूमिकादिभिः परिष्कृत्य सम्पादिता। १-४-०

(४८) सम्यक्सम्बुद्धभाषितं प्रतिमालक्षणम् (शिल्पशास्त्रम्) विश्व-भारतीयशान्तिनिकेतनस्थेन एम० ए० हरिदासमित्रमहोदयेन सम्बुद्धभाषित-

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

प्रतिमालक्षणविवरण्यभिधेयया टीकया समालोचनात्मिकया भूमिकया च परिष्कृत्य सम्पादितम् । १-४-०

(४९) भेदरत्नम् (न्यायः) शङ्करमिश्रविरचितम् । पं० सूर्यनारायणशुक्लेन भूमिकादिभिरलङ्कृत्य सम्पादितम् । १-८-०

(५०) मातृकाचक्रविवेकः (तन्त्रम्) सटीकः, स्वतन्त्रानन्दनाथविरचितः । म० म० पं० गोपीनाथकविराज एम० ए० महोदयैर्लिखितेन प्राक्कथनेन समेतः, व्याकरणाचार्येण पं० ललिताप्रसादडबरालमहोदयेन सम्पादितः । २-०-०

(५१-५२) (A) अद्वैतसिद्धान्तविद्योतनम् (वेदान्तः) ब्रह्मानन्दसरस्वती-विरचितम् । (B) नृसिंहविज्ञापनम् (वेदान्तः) नृसिंहाश्रमविरचितम् । पं० सूर्यनारायणशुक्लेन टिप्पण्या भूमिकादिभिश्च सम्भूष्य सम्पादितम् । १-१२-०

(५३) नृसिंहप्रसादव्यवहारसारः (धर्मशास्त्रम्) दलपतिराजविरचितः । पं० विनायकशास्त्रिटिल्लूमहोदयेन भूमिकादिभिः परिष्कृत्य सम्पादितः । ४-०-०

(५४) नृसिंहप्रसादप्रायश्चित्तसारः (धर्मशास्त्रम्) दलपतिराजविरचितः । पं० नन्दकिशोरशर्मणा साहित्याचार्येण सम्पादितः । ३-४-०

(५५) नृसिंहप्रसादश्राद्धसारः (धर्मशास्त्रम्) म० म० पं० विद्याधरमिश्रेण सम्पादितः । २-०-०

(५६) भगवन्नाममाहात्म्यसंग्रहः (भक्तिशास्त्रम्) रघुनाथेन्द्रयतिविरचितः । पं० अनन्तशास्त्रिफड़केकृतटीकायुतस्तेनैव सम्पादितश्च । २-१२-०

(५७) गणितकौमुदी (गणितम्) (प्रथमो भागः) नारायणपण्डितविरचिता । पं० पद्माकरद्विवेदेन सम्पादिता । १-१०-०
,, (द्वितीयो भागः) ,, ,, २-८-०

(५८) ख्यातिवादः (वेदान्तः) शङ्करचैतन्यभारतीविरचितः । म० म० पं० गोपीनाथकविराजमहोदयलिखितप्राक्कथनेन समेतः, स्वयं ग्रन्थकृतैव सम्पादितश्च । १-४-०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(५६) सांख्यतत्त्वालोकः (सांख्यम्) हरिहरानन्दविरचितः। म० म० पं० गोपीनाथकविराजमहोदयलिखितेन प्राक्कथनेन समन्वितः। एम० ए० ज्ञानेश्वरघोषमहोदयेन भूमिकादिभिः परिष्कृत्य सम्पादितः। १-६-०

(६०) शाण्डिल्यसंहिता (प्रथमो भागः) (पाञ्चरात्रम्) पं० अनन्तशास्त्रिफड़केमहोदयेन सम्पादिता। १-८-०

„ (द्वितीयो भागः) „ „ २-१२-०

(६१) दक्षिणामूर्तिसंहिता (तन्त्रम्) पं०नारायणशास्त्रिखिस्तेमहोदयेन सम्पादिता। १-०-०

(६२) नृसिंहप्रसादतीर्थसारः (धर्मशास्त्रम्) पं० सूर्यनारायणशुक्लेन सम्पादितः। १-८-०

(६३) भक्त्यधिकरणमाला (भक्तिशास्त्रम्) (प्रथमो भागः) नारायणतीर्थविरचिता। पं० अनन्तशास्त्रिफड़केमहोदयेन सम्पादिता। १-४-०

(६४) वसिष्ठदर्शनम् (वेदान्तः) डॉ० बी० एल० आत्रेयमहोदयेन संगृहीतम् सम्पादितञ्च। ५-०-०

(६५-६७) (A) त्रिस्थलीसेतुः (धर्मशास्त्रम्) भट्टोजिदीक्षितविरचितः।

(B) तीर्थेन्दुशेखरः (धर्मशास्त्रम्) नागेशभट्टविरचितः।

(C) काशीमोक्षविचारः सुरेश्वराचार्यविरचितः। पं० सूर्यनारायणशुक्लेन भूमिकया सम्भूष्य सम्पादितः। १-८-०

(६८) मध्वमुखालङ्कारः (माध्ववेदान्तः) वनमालिमिश्रविरचितः। म० म० पं० गोपीनाथकविराजमहोदयलिखितप्राक्कथनसहितः, पं० नृसिंहाचार्यवरखेडकरमहोदयेन सम्पादितः। १-८-०

* परिशिष्टम्—सारस्वतालोकः (प्रथमः किरणः) (महाकविभारविपरिचयात्मकः) म० म० पं० गोपीनाथकविराजमहोदयैः सम्पादितः। १-४-०

(६९) संक्षेपशारीरकम् (प्रथमो भागः) (वेदान्तः) श्रीसर्वज्ञात्ममुनिविरचितम्, नृसिंहाश्रमविरचितया तत्त्वबोधिन्याख्यया व्याख्यया समन्वितम्। पं० सूर्यनारायणशुक्लशास्त्रिणा सम्पादितम्। १-१२-०

„ (द्वितीयो भागः) „ „ १-८-०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

संक्षेपशारीरकम् (तृतीयो भागः) ,, ,, १-८-०
,, (चतुर्थो भागः) ,, ,, १-१२-०
,, (पञ्चमो भागः) ,, ,, ०-१३-०

(७०) भास्करी (प्रथमो भागः) (शैवदर्शनम्) उत्पलकारिकाटीकाभूताया ईश्वरप्रत्यभिज्ञाविमर्शिन्याष्टीकारूपा (अभिनवगुप्तकृतविमर्शिनीसहिता) भास्करकण्ठविरचिता । एम्० ए० को० अ० सुब्रह्मण्य अय्यरमहोदयेन, डॉक्टर के० सी० पाण्डेयेन च सम्पादिता । ६-०-०

(७१-७२) (A) भक्तिनिर्णयः (भक्तिशास्त्रम्) अनन्तदेवविरचितः ।
(B) नाममाहात्म्यम् (माहात्म्यम्) आश्रमस्वामिविरचितम् ।
अनन्तशास्त्रिफड़केमहोदयेन सम्पादितम् । ०-१०-०

(७३) उपेन्द्रविज्ञानसूत्रम् (वेदान्तः) उपेन्द्रदत्तविरचितं सटीकम् । डॉक्टर मङ्गलदेवशास्त्रिभिः समालोचनात्मिकया भूमिकया सूच्या च परिष्कृत्य सम्पादितम् । १-०-०

(७४) सिद्धान्तिभाष्यसहितम्, आश्वलायनश्रौतसूत्रम् (प्रथमो भागः) (वेदः) डॉ० मङ्गलदेवशास्त्रिभिः ससमालोचनं सम्पादितम् । १-१-०

(७५) द्वैतनिर्णयसिद्धान्तसंग्रहः (धर्मशास्त्रम्) पं० भानुभट्टमीमांसकविरचितः । पं० सूर्यनारायणशुक्लेन सम्पादितः । १-०-०

(७६) मनोऽनुरञ्जननाटकम् अनन्तदेवविरचितम् । पं० अनन्तशास्त्रिफड़केमहोदयेन सम्पादितम् । १-०-०

(७७) सुभद्रापरिणयनाटकम् रामदेवविरचितम् । पं० नारायणशास्त्रिखिस्तेमहोदयेन सम्पादितम् । ०-१०-०

(७८) तत्त्वचिन्तामणिः (न्यायः) (प्रथमो भागः) आलोक, आलोकदर्पण, कण्टकोद्धार, प्रगल्भीतिटीकाभिः सहितः । पं० सूर्यनारायणशुक्लैः सम्पादितः । १-४-०

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

(७६) तौतातितमततिलकः (मीमांसा) (प्रथमो भागः) भवदेवमिश्रविरचितः। म० म० पं० चिन्नस्वामिशास्त्रि पं० पट्टाभिरामशास्त्रिभ्यां सम्पादितः। १–१२–०

„ (द्वितीयो भागः) „ „ १–१०–०

„ (तृतीयो भागः) „ „ २–१२–०

(८०) चलराशिकलनम् (गणितम्) (प्रथमो भागः) म० म० पं० सुधाकरद्विवेदविरचितम्। पं० बलदेवमिश्रैः सम्पादितम्। ०–१४–०

(८१) दशपाद्युणादिवृत्तिः (व्याकरणम्) पं० युधिष्ठिरमीमांसकेन भूमिकादिभिः परिष्कृत्य सम्पादितम्। ३–४–०

(८२) विक्रमाङ्कदेवचरितमहाकाव्यम् महाकविबिल्हणविरचितम्। शास्त्रिमुरारिलालनागरसाहित्याचार्येण भूमिकादिभिः परिष्कृत्य सम्पादितम्। २–१२–०

(८३) भास्करी (द्वितीयो भागः) (शैवदर्शनम्) उत्पलकारिकाटीकाभूताया ईश्वरप्रत्यभिज्ञाविमर्शिन्याष्टीकारूपा (अभिनवगुप्तकृतविमर्शिनीसहिता) भास्करकण्ठविरचिता। एम्० ए० को० अ० सुब्रह्मण्य अय्यरमहोदयेन डॉक्टर के० सी० पाण्डेयेन च सम्पादिता।

SRI JAGADGURU VISHWARADHYA
JNANA SIMHASAN JNANAMANDIR
LIBRARY
Jangamawadi Math, Varanasi
Acc. No. 8371

मुद्रक— पं० [illegible], आनन्दसागर प्रेस, गायघाट, बनारस १.

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi

Digitization by eGangotri and Sarayu Trust. Funding by MoE-IKS

CC0. In Public Domain. Jangamwadi Math Collection, Varanasi